Vol. VI (2019-2020)
ISSN - 2277-7067

राष्ट्रहिताय संस्कृतम्

Peer Reviewed

Journal of Fundamental & Comparative Research

All India Oriental Conference
Centenary Celebration
50th Session

Special Issue - January 2020

शोधसंहिता

A Bi-annual Interdisciplinary Research Journal of KKSU
Peer Reviewed Journal of Fundamental & Comparative Research

All India Oriental Conference
Centenary Celebration - 50th Session
Special Issue - January 2020

शोधसंहिता

Editor in Chief : **Prof. Shrinivasa Varkhedi**
Hon'ble Vice Chancellor

General Editor : **Prof. Madhusudan Penna**

Executive Editor : **Dr. Dinakar Marathe**

Editorial Board : **Prof. Nanda Puri**, **Prof. C.G.Vijaykumar**, **Prof. Lalita Chandratre**, **Prof. K. K. Pandey**, **Dr. Deepak Kapde** (Secretary)

Published by : **Registrar,** KKSU, Ramtek

राष्ट्रहिताय संस्कृतम्

KAVIKULAGURU KALIDAS SANSKRIT UNIVERSITY
RAMTEK

संपादकीयम्...

आचार्यः श्रीनिवासः वरखेडी
कुलगुरुः, ककासंवि

अखिलभारतप्राच्यविद्यासम्मेलनस्य पञ्चाशत्तमम् अधिवेशनम् नागपुरमहानगरे आयोजयितुम् अवसरं प्राप्य महान् प्रमोदो भवति । इदं अधिवेशनम् सम्मेलनस्यापि शततमं वर्षम् पुष्णाति। अतः आगामिनि काले सर्वदा नागपुरम् अधिवेशनम् संस्मरिष्यते ।अखिलभारतप्राच्यविद्यासम्मेलन द्वारा प्राचीनाः महान्तो विद्वांसः यत् प्रमुखं लक्ष्यं संसाधयितुं प्रयत्नमकार्षुः तत् एतावता दीर्घकालेन आधुनिकैरपि युवपण्डितैः स्वकीय—मूल्यवत्—संशोधनद्वारा संसाध्यमानं दृश्यते।

नागपुरे आयोजिते पञ्चाशत्तमे अधिवेशने 17 विभागेषु अनेके विद्वांसः शोधछात्राश्च स्वकीयं संशोधनं प्रास्तुवन् । तत्र आहत्य 1130 प्रतिभागिनः सम्मेलने उपस्थिताः आसन् । तत्रापि, 24 शोधपत्राणां कृते उत्तमशोधपत्ररूपेण पुरस्कारोपि प्रदत्तः।

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयेन प्रतिवर्षम् नियतरूपेण प्रकाश्यते शोधसंहिता नामिका इयं शोधपत्रिका ।अस्या माध्यमेन संस्कृतजगति प्रवर्तमानं समकालीनम् संशोधनम् अवगन्तुं प्रभवन्ति विद्याप्रणयिनः इति महान् विश्वासो मम।

अधुना शोधसंहितायाः अस्मिन् अङ्के अखिलभारतप्राच्यविद्या—सम्मेलनस्य नागपुराधिवेशनस्य उत्कृष्टशोधपत्राणि प्रकाश्यन्ते । एतेषु शोधपत्रेषु विषयवैविध्यं, नावीन्यं तथा विषयप्रतिपादनवैचित्र्यम् अवश्यमेव अस्माकं दृष्टिपथमयाति ।

भारतियानां संशोधनरीतिः न केवलं प्राचीना अपितु अत्यन्तं समसामायिकी उपयुक्ता च वर्तते । इमां रीतिं समवलम्ब्य आधुनिकाः अपि संशोधकाः स्वकीयं संशोधनसारं सम्यक्तया प्रस्तोतुं प्रभवन्ति इति मे भाति । अनया शास्त्रीयसंशोधनरीत्या महान् उपकारो भवेत्।

सर्वेभ्यः शोधकर्तृभ्यः मम सर्वशुभकामनाः ।

Index

1. **संस्कृतपत्रकारितासन्दर्भे संस्कृतभाषाप्रयोगसामर्थ्यविकासाय भर्तृहरिनीतिशतकस्य महत्त्वम्**
विश्वजित् प्रामाणिकः 1

2. **शब्दशास्त्रे शैक्षिकाकूतयः**
डा.वेदप्रकाशमिश्रः 13

3. **वैदिकवाङ्मये पयोजन्यपदार्थानां नामानि विनियोगश्च ।**
डॉ. ओंकार शामसुंदर जोशी 22

4. **पाणिनीयसूत्रणां संख्या, वर्गीकरणं, विषयविभागश्च**
डॉ. गोविन्द नाथ चौधारी 34

5. **मार्कण्डेयपुराणे गान्धर्वसङ्गीतविद्या- एकमध्ययनम्**
Pratyusha Ghosh 50

6. **काव्यव्याकरणयोः सन्मेलनसौन्दर्यम् : अधिरावणार्जुनीयमहाकाव्यम्**
अरिजित् गुप्तः **57**

7. **अर्वाचीनसंस्कृतसाहित्यसन्दर्भे आचार्यसत्यव्रतशास्त्रिमहाभागस्य रचनासमीक्षणम्**
डॉ. शिप्रा राय 66

8. **श्रीजीवन्यायतीर्थप्रणीतस्य चिपिटकचर्वणस्य नाट्यतत्त्वदृष्ट्या विमर्शः**
राकेशदाशः 74

9. **संस्कृतसाहित्ये अनभीप्सितमिति गद्यकाव्यस्य सामाजिकसमीक्षणम्**
सौम्या पाण्डेय 89

10. **An analytical study of Kasisatakam a travelogue authored by Adibhatla Narayanadasu**
डॉ. के. वरलक्ष्मीः 95

11. **रघुवंशमहाकाव्ये द्वितीये सर्गे विशिष्टानां कारकप्रयोगाणां परिशीलनम्**
व्रजेश प्रदिपभाई पण्डित **106**

12. **सिद्धान्तलक्षणे शिवदत्तमिश्रविरचितगङ्गाक्रोडपत्र धर्मदत्त (बच्चा झा) विरचितगूढार्थतत्वालोकक्रोडपत्रयोः विमर्शः।।तत्वचिन्तामणिः।।**
विमर्शकः–पं. यदुपति आचार्य काशी 118

13. **कर्मकारकलक्षणपरिष्कार:**
श्याम-सुन्दर-शर्मा 124

14. **Source and base of Indian Philosophy-few thoughts**
Prof. Madhusudan Penna 144

15. **Poetic Delicacies in सौंदर्यलहरी**
Pankaj Pawar 153

16. **The Constructive Formulations of the Science of Architecture and Buildings: *Vāstukalā* A Thematic Review**
Dr. Beenapani Mishra 157

17. **Dynamics of Distance Devotion: An Historical Study of the Letters Exchanged between Indian Ascetics and the Gujarati Diaspora in East-Africa from 1933-50**
Sahaj Parikh 164

18. **Because Time is not Self: On Ānandajñāna's refutation of Kāla**
Satyan Sharma 189

19. **मराठी संगीत सौभद्र आणि संस्कृत संगीतसौभद्रम् - निवडक पदांचे अवलोकन**
डॉ.मृदुला विजय काळे 202

20. **धर्मशास्त्रीय वाङ्मय में वनस्पति हिंसा पर दण्ड विधान**
डॉ. वन्दना शर्मा 214

21. **आधुनिक भाषाविज्ञान की आधारशिला निरुक्तशास्त्र**
डा०करुणा आर्या 221

22. **शास्त्रों में शौच के संदर्भ**
कुमारी शिवा 240

23. **'छन्दोभ्यस्ता ग्रन्थ में प्रतिपादित वैदिक याग'**
रेखा कुमारी 249

24. **"कालिदास के नाट्य साहित्य में नाट्यशास्त्र सम्मत दृष्टि अभिनय "**
डॉ. मधु सत्यदेव (श्रीमती) 262

25. **पदवृत्ति अनुशीलन : नैयायिक दृष्टिकोण**
रेखा सिंह 275

26.	**संस्कृत प्रहसनः सैद्धान्तिक निरूपण**	
	ऋतेशा	283
27.	आथर्वण–ज्योतिश में पंचाङ्ग विमर्श	
	डॉ॰ वर्षा दीपक द्विवेदी	291
28.	**भारतीय ऐतिहासक अध्ययन के क्षेत्र में पालि साहित्य का स्थान – एक विमर्श**	
	डा॰ विश्वजीत कुमार	309
29.	**आर्य संस्कृति में हवन–यज्ञ पर्यावरण शुद्धिकरण की जैव प्रौद्योगिकी**	
	डॉ. कृष्ण कुमार मिश्र	315

संस्कृतपत्रकारितासन्दर्भे संस्कृतभाषाप्रयोगसामर्थ्यविकासाय भर्तृहरिनीतिशतकस्य महत्त्वम्

Importance of Bhartrihari Ethics for the development of the ability to use Sanskrit language in the context of Sanskrit journalism.

विश्वजित् प्रामाणिकः
शोधच्छात्रः, शिक्षासंकायः,
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

उपोद्घातः-

आधुनिकसभ्यतायाः कश्चन प्रमुखव्यवसायः वर्तते पत्रकारिता। अत्र समाचाराणाम् एकत्रीकरणम्, लेखनम्, एकत्रीकृतानां समाचाराणां प्रेषणम्, सम्पादनम्, पुनश्च तेषां सम्यक् प्रस्तुतीकरणं चेत्यादीनि मुख्यभूतकार्याणि अन्तर्भवन्ति। पत्रकारिता इति शब्दः 'जर्नलिज्म' (Journalism) इति आङ्गलशब्दस्य रूपान्तरणम् अस्ति। शब्दार्थदृष्ट्या जर्नलिज्म इति शब्दः 'जर्नल' इति शब्दात् उत्पन्नः, यस्य अर्थः भवति 'दैनिकम्' इति। अस्मिन् प्रतिदिनात्मकं कार्यं तत्त्वं वा विवृतं भवति। पत्रकारिता लोकतन्त्रस्य अविभक्तम् अङ्गं वर्तते। प्रतिपलं परिवर्तितस्य जीवनस्य जगतः वा दर्शनं पत्रकारितामाध्यमेनैव ज्ञातुं शक्यते। परिस्थितीनाम् अध्ययनम्, चिन्तनम्, मननम्, आत्माभिव्यक्तेः प्रवृत्तिः अपि च अपरेषां कल्याणम् अर्थात् लोकमङ्गलम् इत्येतेषां भावना एव पत्रकारितायाः जन्म अकरोत्। अद्यत्वे पत्रकारितायाः अपि बहूनि माध्यमानि वर्तन्ते, तद्यथा- समाचारपत्रम्, पत्रिका, आकाशवाणी, दूरदर्शनम्, वेबपत्रिका इत्यादि।

सी.जी.मूलरवर्यस्य कथनानुगुणम्- "सामयिकज्ञानस्य व्यवसायः एव पत्रकारिता अस्ति। अत्र प्राप्तानां तथ्यानां मूल्याङ्कनं एवञ्च यथार्थं प्रस्तुतीकरणं क्रियते।"

डा. बद्रीनाथकपूरवर्यस्य मतेन- "पत्रपत्रिकासु समाचारलेखानाम् एकत्रीकरणस्य सम्पादनस्य प्रकाशनादेशस्य च कार्यं करोति पत्रकारिता इति।" हिन्दीशब्दसागरानुगुणं "पत्रकारस्य कार्यं अथवा व्यवसायः पत्रकारिता वर्तते।"

पत्रकारिता लोकतन्त्रस्य चतुर्थस्तम्भः उच्यते। सत्यभूतायाः आधारशिलायाः उपरि पत्रकारितायाः कार्यम् विराजते। जनकल्याणेन सह मिलित्वा पत्रकारिता सामाजिकपरिवर्तनस्य साधनत्वेनापि विद्यते। किमपि लोकतन्त्रं तदैव सशक्तं भवति यदा पत्रकारिता सामाजिकसर्वकारम् उद्दिश्य स्वकीयसार्थकभूमिकां पालयेत्। सार्थकपत्रकारितायाः उद्देश्यमेव भवेत् यत् सा समाजप्रशासनयोः मध्ये काञ्चित् महत्त्वपूर्णभूमिकां पालयेत्। स्वतन्त्रतायाः पूर्वं पत्रकारितायाः मुख्यम् उद्देश्यम् आसीत् स्वतन्त्रतायाः प्राप्तिः। स्वतन्त्रतान्दोलनकाले पत्रकारिता विशिष्टां सार्थकभूमिकाम् अपालयत्। तस्मिन् काले पत्रकारिता सम्पूर्णदेशम् एकसूत्रेण बद्ध्वा सम्पूर्णे समाजे स्वाधीनताप्राप्तेः लक्ष्यं पूरयति स्म। साम्प्रतिके युगे अन्तर्जालस्य कारणेन पत्रकारितायां व्यापकपरिवर्तनं सञ्जातम्। सम्प्रति पलाभ्यन्तरे जनानां नेत्रयोः पुरतः समाचारः समायाति।

रोमे 131 तमे ईस्वीपूर्वकाले प्रप्रथमं ‘Acta Diurna’ इति नाम्ना दैनिकसमाचारः प्रकाशितः। भारते 1776 तमे वर्षे ईस्ट इंडिया कम्पनी इत्यस्य भूतपूर्वः अधिकारी प्रथमवारम् आङ्गलभाषया समाचारपत्रस्य प्रकाशनम् अकरोत्। तदनु 1780 तमे वर्षे बंगाल गजेट इति समाचारपत्रस्य प्रकाशनम् अभवत्। 1819 तमे वर्षे ‘संवादकौमुदी’ (प्रकाशकः राजा राममोहन रायः), 1822 तमे वर्षे गुजरातीभाषया ‘मुंबईना समाचार’ इति समाचारपत्रम्, यच्च अद्यापि प्रकाश्यते। 1826 तमे वर्षे ‘उदंत मार्तंड’ इति प्रथमहिन्दीसमाचारपत्रम्, 1830 तमे वर्षे बहुभाषीयं ‘बंगदूत’ इति समाचारपत्रम्। 1846 तमे वर्षे राजा शिवप्रसादः ‘बनारस अखबार’ इत्येतस्य प्रकाशनम् अकरोत्। इत्थं क्रमशः पत्रकारिता समृद्धा अभूत्। अन्वेषणपत्रकारिता, क्रीडापत्रकारिता, महिलापत्रकारिता, बालपत्रकारिता, आर्थिकपत्रकारिता, ग्रामीणपत्रकारिता, व्याख्यात्मकपत्रकारिता, विकासपत्रकारिता, सन्दर्भपत्रकारिता, विधिपत्रकारिता, अन्तरिक्षपत्रकारिता, कृषिपत्रकारिता इत्यादि पत्रकारितायाः विभागाः विद्यन्ते।

पत्राकारितायां भाषा किञ्चन प्रधानम् अङ्गं वर्तते। जगति विद्यमानाभिः सर्वाभिः अपि कार्यालयीयभाषाभिः समाचाराः प्रकाशेरन्। भारतं बहुभाषाभाषी देशः वर्तते। भारतस्य प्रत्येकस्मिन् राज्ये विद्यमानया प्रान्तीयभाषया समाचारः प्रकाशितः स्यात् इति धिया तत्रत्यैः जनैः तया भाषया समाचाराः प्रकाश्यन्ते। भारते विद्यमानाभिः प्रान्तीयभाषाभिः कार्यालयीयभाषाभिः सह सममहिम्ना विराजते समग्रभारतीयभाषाणां जननीस्वरूपिणी संस्कृतभाषा अपि। संस्कृतभाषा भारतस्य मर्यादासमा इति स्वामिनः विवेकानन्दस्य उक्तिः।

संस्कृतभाषाम् उद्दिश्य भारतीयानां मनसि प्रीतिः आसीत् अस्ति भविष्यत्यपि इत्यत्र नास्ति कश्चन संशयः। सम्प्रति विद्यालयमहाविद्यालयविश्वविद्यालयादिषु संस्कृताध्येतॄणां संख्या महती अस्ति। अधुना संस्कृतभाषिजनानां संस्कृतकुटुम्बानां संस्कृतमातृभाषिबालानां संख्यापि क्रमशः वर्धमाना अस्ति। अद्यापि लक्षशः जनाः संस्कृतभाषया नित्यं परस्परं भाषन्ते। अतः संस्कृतभाषाविषये अपि पत्रकारिता सहजा वर्तते। संस्कृतम् अधिकृत्य समाचारपत्राणि, पत्रिकाः, आकाशवाणी, दूरदर्शने वार्तावली, इ-पत्रिकाः सम्प्रति बहुत्र प्रकाशन्ते। आ बहोः कालात् संस्कृतपत्रकारिता अपि आरब्धा।

1832 तमे वर्षे बंगाल-एशियाटिक-सोसाइटिसंस्थया आंग्लसंस्कृतभाषाभ्यां काचित् द्विभाषिकी शोधपत्रिका प्रकाशिता। 1866 तमे वर्षे ज्ञाननगरीकाशीतः 'काशीविद्यासुधानिधिः' इति मासिकपत्रिका प्रथमतया प्रकाशिता। तदनन्तरं 'पण्डितपत्रिका' इति मासिकपत्रमपि प्रकाशितम् अभूत्। 1867 तमे वर्षे काशीतः एव पुनरपि 'क्रमनन्दिनी' इति नाम्नी काचित् पत्रिका प्रकाशिता अभूत्। अयं कालः एव संस्कृतपत्रकारितायाः आरम्भकालः इति विद्वद्भिः स्वीक्रियते। 1878 तमे वर्षे 'विद्यार्थी' नामकसंस्कृतपत्रं बिहारराज्यस्य पटनातः प्रकाशितम्। 1884 तमे वर्षे केरलराज्यस्य कुन्नूरतः 'विज्ञानचिन्तामणिः' इति मासिकपत्रिका प्रकाशम् आगता। स्वतन्त्रतासंग्रामदिनेषु 'आनन्दपत्रिका', 'गीर्वाणः', 'शारदा', 'श्रीः', 'उषा', 'संस्कृतग्रन्थमाला', 'भारतश्रीः' इति पत्रिकाः प्राकाशन्त। तदनु प्रकाशितासु विशिष्टसंस्कृतपत्रिकासु 'सुधर्मा' इति पत्रिका अद्यापि सगौरवं प्रकाशमाना वर्तते। 1974 तमे वर्षे जूनमासे त्रिंशे दिनाङ्के प्रातः नववादने आकाशवाण्याः दिल्लीकेन्द्रात् राष्ट्रियप्रसारणत्वेन संस्कृतवार्तानां पञ्चनिमेषात्मकं प्रसारणं सोत्साहं प्रारब्धम्। अनेन संस्कृतपत्रकारितायां किञ्चन नवचैतन्यं प्रावहत्। अधुना संस्कृतभारत्या प्रकाशिता 'सम्भाषणसन्देशः' इति पत्रिका संस्कृतपाठकेषु विशिष्टस्थानं भजते। 'संवित्', 'संस्कृतबालसंवादः', 'गीर्वाणः', 'महास्विनी', 'आरण्यकम्', 'अतुल्यभारतम्', 'अभ्युदयः', 'प्रभातम्' इत्याद्यः बहव्यः पत्रपत्रिकाः प्रकाशिताः जायन्ते। ईपत्रिकारूपेण सम्प्रति 'प्रज्ञा', 'जाह्नवी', 'संस्कृतसर्जना', 'सम्प्रति वार्ताः' इत्यादयः प्रकाशन्ते।

प्रत्येकमपि पत्रकारितायां भाषा किञ्चन प्रधानाङ्गस्वरूपं भवति। भाषा पत्रकारितायां साधनत्वेन प्रयुज्यते। हिन्दीभाषिणः जनान् हिन्दीभाषया एव विषयान् बोधयितुं पारयामः, न तु अन्यया कयापि भाषया। तथैव वङ्गभाषिणः जनान् वङ्गभाषया एव समाजे

घटमानान् विषयान् आधिक्येन सूचयितुं शक्नुमः न तु अन्यया कयाचित् प्रान्तीयभाषया। अतः भाषायाः प्रयोगः यथार्थतया न भवति चेत् सः विषयः कदाचित् जनेभ्यः न रोचेत। तस्मादेव कयाचित् भाषया रचितायां पत्रिकायां प्रयुक्ता भाषा सर्वविधदृष्ट्या शुद्धा स्यात्, प्रिया स्यात्, रूचिम् उत्पादयेत्, आनन्दं जागरयेत्, पठने औत्सुक्यम् उत्पादयेत् च। पत्रकारितायां रचिते पत्रे पत्रिकायां वा प्रयुक्ता भाषा एवं सरला सुगमा रुचिपूर्णा शुद्धा यथार्था वा भवति चेत् तस्मिन् पत्रे विद्यमानः मुख्यभूतः विषयः जनेभ्यः अवश्यं रोचेत। इत्थमेव प्रत्येकं पत्रकारः विषयैः सह भाषामपि चिन्तयति। अतः संस्कृतपत्रकारितायां संस्कृतभाषायाः महत्त्वभूतं योगदानमस्ति।

संस्कृतभाषायाः द्विविधं स्वरूपं वर्तते- प्रौढसंस्कृतं सरलसंस्कृतं च। सर्वे अपि जनाः प्रौढसंस्कृतं नावगच्छन्ति। तत्र विद्वांसः एव योग्याः भवन्ति। किन्तु सरलसंस्कृतं सर्वे अपि ज्ञातुं शक्नुवन्ति। संस्कृतभाषाध्ययनं वयं संस्कृतेन रचितान् ग्रन्थान् पठित्वा कुर्मः। प्रायशः संस्कृतसाहित्ये विद्यमाने प्रत्येकस्मिन् अपि ग्रन्थे लेखकैः प्रौढप्रयोगाः अपि क्रियन्ते सरलप्रयोगाः अपि क्रियन्ते। उभयोः भाषारूपयोः संस्कृतभाषाप्रयोगसामर्थ्यविकाशाय दीर्घसमासरहिताः अक्लिष्टाः सर्वैः प्रयोक्तुं योग्याः मानकशब्दाः एव परिशीलनीयाः। संस्कृतपत्रकारितायाम् इमे मानकशब्दाः अवश्यम् उपकुर्युः।

संस्कृतसाहित्ये विद्यमानग्रन्थेषु प्रत्येकस्मिन् अपि ग्रन्थे मानकशब्दाः प्रयुक्ताः सन्ति। संस्कृतभाषायाः परमविद्वान् कविः वैयाकरणश्चासीत् भर्तृहरिः। भर्तृहरिणा 'वाक्यपदीयम्', 'वाक्यपदीयटीका', 'सुभाषितत्रिशती', 'महाभाष्यदीपिकाटीका', 'मीमांसाभाष्यम्', 'वेदान्तसूत्रवृत्तिः', 'शब्दधातुसमीक्षा' इतीमे ग्रन्थाः विरचिताः। एतेषु भर्तृहरेः मौलिकरचनाद्वयम् अत्यन्तं सुप्रसिद्धं वर्तते, प्रथमं वाक्यपदीयम्, द्वितीयं च सुभाषितत्रिशती इति।

सुभाषितत्रिशती इति ग्रन्थे शतकत्रयं वर्तते- 'नीतिशतकम्', 'शृङ्गारशतकम्', 'वैराग्यशतकञ्च'। भर्तृहरिः कुटुम्बे स्थित्वा यथार्थम् अनुभवं प्राप्नोत्। पुनश्च तस्य अनुभवस्य मार्मिकपक्षाणां ग्रहणे सः सर्वदा कृतकार्यः आसीत्। यः कुटुम्बे स्थित्वा अपि स्वानुभवबलेन तस्य हृदयवाणीम् अवगत्य श्लोकरूपेण पूर्णतां प्रदातुं शक्नोति सः एव सत्यः लोकप्रियः कविः भवति। अनया दृष्ट्या भर्तृहरिः सत्यमेव लोककविः आसीत्। यस्य सूक्ष्मदृष्टिः संसारस्य लघुलघुविषयान् परिशील्य तस्मात् उदात्तशिक्षाप्रदानाय सामर्थ्यं प्राप्नोत्।

संस्कृतपत्रकारितासन्दर्भे संस्कृतभाषाप्रयोगसामर्थ्यविकाशाय लोकप्रियेण कविना विरचिते शतकत्रये प्रयुक्तानां संस्कृतमानकशब्दानां परिशीलनम् अत्र करिष्यते। सुभाषितत्रिशतीगता शैली सुलभा, मञ्जुला, अर्थगौरवयुक्ता, आकर्षिका च वर्तते । संस्कृतस्य सामान्यज्ञानवन्तः अपि इदं पठित्वा अवगन्तुं शक्नुवन्ति। अत्र उपयुक्तं वृत्तं सुलभं लघु च विद्यते । अत्रत्याः उपमानोपमेयादयः स्वाभाविकाः इत्यतः पठितृषु नूतनभावोत्पादकाः भवन्ति। इह लोकप्रियकविना भर्तृहरिणा विरचितसुभाषितत्रिशतीतः काश्चन सूक्तयः प्रस्तूयन्ते, यत्र स्थूलाक्षरैः लिखिताः शब्दाः भाषासौष्ठवं दर्शयन्ति-

1. **धिक्** तां च तं च मदनं च इमां च मां च। (नीतिशतकम्, 2)
2. न तु प्रतिनिविष्टमूर्खजनचित्त**माराधयेत्**। (नीतिशतकम्, 4)
3. **सत्सङ्गतिः** कथय किं न करोति पुंसाम्। (नीतिशतकम्, 23)
4. सर्वे गुणाः काञ्चन**माश्रयन्ति**। (नीतिशतकम्, 41)
5. दुर्जनः **परिहर्तव्यो** विद्यया **भूषितो**ऽपि सन्। (नीतिशतकम्, 53)
6. विपदि हन्त सुधापि **विषायते।** (शृङ्गारशतकम्, 34)
7. बोद्धारो **मत्सरग्रस्ताः** प्रभवः **स्मयदूषिताः।** (वैराग्यशतकम्, 2)
8. तृष्णा न **जीर्णा** वयमेव जीर्णाः। (वैराग्यशतकम्, 12)
9. वयमिह **परितुष्टाः** वल्कलैस्त्वं च लक्ष्म्या। (वैराग्यशतकम्, 48)
10. मनसि च **परितुष्टे** कोऽर्थवान् को दरिद्रः। (वैराग्यशतकम्, 48)

भर्तृहरिणा विरचितायां सुभाषितत्रिशत्याम् एकैकं शतकमादाय सविवरणं मानकशब्दसूची प्रस्तूयते। ये खलु शब्दाः संस्कृतपत्रकारितायां भाषाप्रयोगसन्दर्भे निश्चप्रचम् उपकुर्युः।

नीतिशतकम्-

	संस्कृतशब्दाः	संस्कृतार्थः	हिन्द्यर्थः	वङ्गार्थः	आङ्गलार्थः
01	सततम्	सर्वदा, सदा	सर्वदा	সর্বদা	Forever
02	विरक्ता	असन्तुष्टा	विरक्त	অনুরাগহীন	Unconcerned
03	अन्यसक्तः	अन्यस्मिन् रक्तः	अन्य पर आसक्त	অন্যে কামনারত	Enamoured at other

04	परितुष्यति	सन्तोषं प्राप्नोति	प्रसन्न है	পরিতৃপ্ত হয়	Delight
05	आराध्यः	सेव्यः	समझाया जा सकता है	পরিতৃপ্ত করা যায়	Can be satisfied
06	सुखतरम्	अतिसुखेन	अतिसुख से	আরও সুখে	Very happily
07	आराध्यते	सेव्यते	समझाया जा सकता है	পরিতৃপ্ত করা যায়	Can be satisfied
08	रञ्जयति	प्रसादयति	प्रसन्न करना	তুষ্ট করা	Delight
09	प्रसह्य	बलपूर्वकम्	बलपूर्वक	বলপূর্বক	Forcefully
10	उद्धरेत्	निष्कासयितुं समर्थः	निकाल सकता है	উদ্ধার যেতে পারে	Can remove

नीतिविषयान् आधृत्य 110 रमणीयश्लोकैः भर्तृहरिणा आरम्भे नीतिशतकं विरचितम्। अत्र बहूनां नैतिकसिद्धान्तानां प्रतिपादनम् अभूत्। इमे सिद्धान्ताः भेदभावं विना समग्रे जगतितले कल्याणं कुर्वन्ति। सज्जनता, विद्या, वीरता, साहसः, मैत्री, उदारता इत्यादयः मानवीयवृत्तयः अत्र समुल्लिखिताः सन्ति। अस्मिन् नीतिशतके तादृशगुणानाम् उल्लेखः अस्ति येषां गुणानाम् अनुशीलनं मानवसमाजे अत्यन्तं मङ्गलसाधकं वर्तते। भर्तृहरिदृष्ट्या सः एव सज्जनः, यः अपरेषां परमाणुसमानान् लघुगुणान् पर्वतसमानान् कृत्वा स्वचित्ते परमसन्तोषम् अनुभवति। अस्मिन् शतके विविधव्यवहाराणां गुणानां वर्णनसमये रचयिता श्लोकेषु बहूनां रम्यपदानां प्रयोगम् अकरोत्। तेषां शब्दानाम् अध्ययनेन पत्रकारितप्रसङ्गे अस्माकं भाषाप्रयोगसामर्थ्यं वर्धेत। अत्र यथाशक्ति एतेषां शब्दानां संस्कृतार्थः, हिन्द्यर्थः, वङ्गार्थः, आङ्गलार्थः च प्रदर्श्यते।

एतान् शब्दान् अतिरिच्य अत्र नीतिशतके विद्यमानाः अन्ये शब्दाः प्रस्तूयन्ते।

सन्तरेत्	आराधयेत्	छेत्तुम्	रोद्धुम्	सन्नह्यते	विनिर्मितम्	विततमूर्जितम्	सत्वरम्
सर्वज्ञः	अवलिप्तम्	क्लिन्नम्	जुगुप्सितम्	शङ्कते	क्षुद्रः	समाविशतु	सन्तापितः
विवेकभ्रष्टा	विनिपातः	वारयितुम्	भारभूता	भ्रान्तम्	जाड्यम्	उपचीयते	प्रमत्तम्
कुत्साः	पुष्णाति	स्पर्धते	संरुणद्धि	नितराम्	विभूषयन्ति	क्षिप्तः	प्रमाष्टुम्
विलेपनम्	समलङ्करोति	क्षीयन्ते	प्रच्छन्नगुप्तम्	क्षान्तिः	शाठ्यम्	मन्दभाग्यः	वर्षायते
सिञ्चति	अपाकरोति	प्रसादयति	सत्सङ्गतिः	स्निग्धम्	तुष्टः	कुल्यायते	निर्व्याजता
विरहयति	लङ्घनीयः	प्रारभ्यते	प्रारभ्य	विघ्नविहता	विरमन्ति	प्रख्यापय	अवसीदति
प्रतिहन्यमानाः	उद्दिष्टम्	जीर्णम्	निपत्य	विलोकयति	विशीर्येत	यथेष्टम्	अवलोकते
वैरायते	ग्रसते	भ्रान्तः	विधार्यते	सम्पातः	अभिजनः	विमृशन्तः	छित्त्वा
सन्दह्यताम्	प्रतिहता	विरहितः	विचित्रम्	आश्रयन्ति	विनश्यति	भ्राम्यति	निर्दहति
लीढः	परिक्षीणः	कलयति	प्रथयति	सङ्कोचयति	दुधुक्षसि	शिक्षतु	समुन्मीलति
फलति	प्रियवादिनी	अर्थपरा	प्रवृत्ताः	प्रतीक्ष्यते	आर्द्रयन्ति	कुरङ्गायते	स्तुवन्तु
स्पृहा	असहिष्णुता	परिहर्तव्यः	भूषितः	भयङ्करः	ह्रीमति	पर्वतीकृत्य	क्षीणः
निर्घृणता	विमतिता	सौजन्यम्	सुमहिमा	अपयशः	कामिनी	प्रविचलन्ति	मार्जितुम्

दुर्गतः	चाटुलः	जल्पकः	धृष्टः	आस्यते	लुब्धकः	सन्तप्यन्ते	समन्तात्
सज्जनसङ्गमः	अभ्युदयः	विक्रमः	अभिरुचिः	प्रच्छन्नम्	अनुत्सेकः	महासङ्कटः	शिलायते
राजते	सन्तप्ता	संसर्गतः	ख्यापयन्तः	सम्पादयन्तः	दूषयन्तः	विपुलम्	सन्त्यजन्ति
नम्राः	अनुद्धताः	विभाति	योजयते	गूहति	प्रकटीकरोति	गुणायते	प्रवदन्ति

शृङ्गारशतकम्-

रचयिता भर्तृहरिः अस्मिन् शृङ्गारशतकनामकस्य भागस्य शते श्लोकेषु जीवने शृङ्गारमयप्रवृत्तीनां विवेचनं सफलविधिना अकरोत्। असौ शृङ्गारस्य सर्वोच्चस्थानं न कदापि अचिन्तयत्। प्रेमप्रभावात् कामीकामुकयोः चित्ते याः वृत्तयः स्वकीयललितक्रीडाः दर्शयन्ति, ताः क्रीडाः असौ कविः सूक्ष्मदृष्ट्या अपश्यत्। कवेः परिणतिः वर्तते यत् शृङ्गारः मायात्मकव्यापारः वर्तते, सौन्दर्यं मोहजनितविकारः वर्तते, स्त्रिषु यत् अमृतं वर्तते तत् मधुमिश्रितं विषं वर्तते इति। एतस्मात् रक्षणं प्राप्य एव शिवभक्त्या शाश्वतानन्दप्राप्तिः सम्भवति। इत्थम् अत्र विषयदृष्ट्या इमे पक्षाः स्युः। किन्तु भाषादृष्ट्या अपि कश्चन भिन्नः पक्षः स्यात्। कविः विषयवर्णनसमये उत्कृष्टपदानां प्रयोगम् अकरोत्। तानि प्रयुक्तोत्कृष्टानि पदानि वयं परिशीलयेम चेत् पत्रकारितायाम् अस्माकं भाषाप्रयोगः यथार्थं भविष्यति निश्चप्रचम्। इमे प्रयोगाः यथा-

	संस्कृतशब्दाः	संस्कृतार्थः	हिन्द्यर्थः	वङ्गार्थः	आङ्गलार्थः
01	स्मितः	मन्दहसनम्	मन्द मुसुकाना	মৃদুহাস্য	Slow smile
02	कटाक्षः	व्यङ्गदृष्टिः	कटाक्ष	কটাক্ষ	Sarcasm
03	स्निग्धः	स्नेहयुक्तः	मीठी	স্নেহপূর্ণ	Affectionate
04	प्रस्थितम्	चलनम्	चलना	পদবিক্ষেপ	Walk
05	भ्रूभङ्गः	भ्रूसञ्चालनम्	भौंह से कटाक्ष करना	ভ্রূভঙ্গিযুক্ত	Take a look

06	नवोढा	नवविवाहिता	नव विवाहिता	নব বিবাহিতা	Newly married
07	वशीकुरुते	अधिनीकरोति	वश में करना	বশীভূত করা	Bring under control
08	तारुण्यम्	यौवनम्	यौवन	যৌবন	Youth
09	रम्यम्	रमणीयम्	रमणीय	রমণীয়	Delightful
10	नूनम्	निश्चयेन	निश्चित रूप से	নিশ্চয়	Definitely

झङ्कारः	विवशम्	कटाक्षः	अनाघ्रातम्	अनाविद्धम्	कीर्णम्	प्रशान्तम्	उत्सार्य
विचार्य	सम्मोहयन्ति	मदयन्ति	विडम्बयन्ति	निर्भर्त्सयन्ति	विषादयन्ति	विश्रम्य	आमीलितम्
मुग्धप्रायाः	प्रसरति	विषायते	सोत्कण्ठम्	आलोक्यते	विवर्धयन्ति	उत्कण्ठयन्ति	सन्त्रस्तः
प्रथयति	गाढम्	समालिङ्ग्यते	प्रियासङ्गमः	मुकुलयन्	कान्तायते	असाराः	स्फुरति
विहातुम्	प्रसह्य	विरला	समालम्बते	निर्दयतरम्	सुललितम्	सघृतम्	द्रवीयसी
दुस्तरा	आक्रम्य	लुप्यते	विक्रिया	कलयति	उत्सुकः	अतिरमते	प्रस्तौमि
अतिरिच्यते	सन्निधानम्	व्यतीतः	सन्त्यज्यताम्	सविभ्रमः	स्त्रीसंज्ञितम्	विकृष्य	प्रध्वंसम्
घूर्णयति	रज्येत	स्तब्धः	खलायते	क्षपयति	सविभ्रमा	स्फीतम्	विच्छिन्नम्

वैराग्यशतकम्-

उत्कृष्टशैल्या विरचितं वैराग्यशतकं भर्तृहरेः सर्वस्वमिति प्रतीयते। भर्तृहरिः अस्मिन् भागे सन्तोषं परमसुखं तथा वैराग्यम् अस्य साधनमिति अङ्गीकरोति। तस्य दृष्ट्या तपस्विजीवनं श्रेयस्करमस्तीति। एते सर्वे अपि विषयाः त्रिसृषु प्रमुखविचारधारासु अनुस्यूताः वर्तन्ते। तद्यथा- कामविकासेन अस्माकं जीवनम् आक्रान्तम् अस्ति। कामविकारस्य निन्दने भर्तृहरिः बहुशः स्वकीयहार्दिकोद्गारमेव प्रादर्शयत्। द्वितीयं वैराग्यस्य द्वितीया पृष्ठभूमिः भवति संसारस्य नश्वरता इति। तृतीयं भवति धनिकैः राजभिश्च सर्वदा विदुषाम् अनादरः क्रियते। वैराग्यशतके उत्कृष्टविषयवर्णससन्दर्भे भर्तृहरिणा उत्कृष्टप्रयोगाः अपि कृताः।

	संस्कृतशब्दाः	संस्कृतार्थः	हिन्द्यर्थः	वङ्गार्थः	आङ्गलार्थः
01	विजयते	जयं प्राप्नोति	जय पाना	বিজয় লাভ করুক	Win
02	स्मयदूषिताः	गर्वपरिपूर्णाः	गर्व से पूर्ण	অহঙ্কারে অভিভূত	Full of ego

03	अनुपश्यामि	अवलोकयामि	देखता हूँ	দেখছি	I see
04	जनयति	उत्पादयति	उत्पादन करना	উৎপন্ন করা	To produce
05	उत्खातम्	खनितम्	खोदा गया	খনন করা	Dug up
06	निस्तीर्णः	सीमालङ्घितः	पार चलना	অতিক্রম করা	Cross over
07	भ्रान्तम्	भ्रमणं कृतम्	भ्रमण किया	ভ্রমণ করা	Visited
08	साशङ्कया	आशङ्कया सहितम्	आशङ्का के साथ	ভীত হয়ে	With apprehension
09	सन्तुष्यसि	सन्तोषं प्राप्नोषि	सन्तोष मिलना	সন্তুষ্ট হওয়া	Get satisfaction
10	नर्तयसि	नर्तनं कारयसि	नचाना	নাচানো	To dance

सङ्क्षीयते	विज्ञायते	उत्पद्यते	मोहमयी	निवृत्ता	नालिङ्गति	भुक्ता	तप्तम्
जीर्णा	आक्रान्तम्	शिथिलायते	तरुणायते	शाम्यति	स्फुरति	निन्द्यम्	विजित्य
प्रतन्वति	निस्पृहाः	भुज्यते	समाराध्य	प्रसन्नः	विमुक्तेः	अभिलषितम्	पुष्यति
संवृद्धाः	सम्प्राप्स्यन्ते	अधिगता	उपार्जितम्	समाहितः	सम्पादिता	आलिङ्गितः	वितीर्णम्
परितोषः	निर्विशेषावशेषः	परितुष्टः	विस्तीर्णम्	निर्मूलयन्ति	दुराराध्यः	आदाय	श्रूयते
संयमः	मत्काङ्क्षिणी	पवित्रीकृतम्	समीहामहे	दृष्टिपाताः	वराकी	विरमति	श्राव्यम्
आकलय्य	सकलम्	वीक्षन्ते	शुष्यन्ति	निःस्पृहः	जीर्णा	विलङ्घ्य	लज्जामहे
महाशासने	जृम्भते	उपगूढम्	प्रणीतम्	क्षुब्धता	समीभूता	प्रणामाञ्जलिः	प्रोद्दीप्तम्
प्रत्युद्यमः	अभ्यस्ता	विनीतोचिता	निष्फलम्	शून्यालयः	विविक्तम्	अभ्युपैति	मुक्त्वा
कवलयति	क्षुधार्तः	सुदृढतरम्	आश्लिष्यति	प्रतीकारः	विपर्यस्यति	नियोज्य	तीव्रातितीव्रम्
समुत्पद्यते	परिहृत्य	निधाय	पिण्डीकृत्य	विधास्यति	कदर्थयसि	जर्जरतरम्	निश्चिन्तम्

परिभ्रमत	समाधीयताम्	आनन्दाश्रुजलम्	परिक्षीयते	आघ्रान्तम्	ग्रस्तम्	विलसति	सौख्यम्
निस्पृहाः	दृढप्रत्ययः	परितर्जयन्ती	प्रहरन्ति	परिस्रवति	सम्पत्स्यते	सङ्कुचितम्	विगलिता
लालायते	नाद्रियते	अमित्रायते	क्षणम्	जराजीर्णम्	कामरसिकः	समदृशः	पुण्यारण्यम्

भर्तृहरेः भाषाशैली-

शतकत्रये प्रयुक्ता भर्तृहरेः भाषा अत्यन्तं सरला सुबोधा परिष्कृता च वर्तते। तस्य शैली प्रसादगुणयुक्ता। शब्दयोजना अतिव्यवस्थिता। भावानाम् अभिव्यक्तीकरणयोग्याः प्रयोगाः अत्र विद्यन्ते। भाषायां स्वाभाविकप्रवाहे प्रयुक्तेषु पदेषु लालित्यं वर्तते। प्रो. लैसेनवर्यः भर्तृहरेः विषये वदति यत्- "अल्पैः शब्दैः अधिकभावानां विचाराणां वा कलात्मकशैल्या अभिव्यक्तीकरणस्य अद्भुतक्षमता भर्तृहरेः विशेषता अस्ति। इयमेव विशेषता तस्मै संस्कृतसाहित्ये मूर्धन्यकविषु योग्यस्थानं कल्पयति इति। लघुषु छन्दःसु कथं स्वाभाविकशब्दयोजना वर्तते। अत्र विद्यमानः एकैकः अपि शब्दः कर्णे झङ्कारं करोति। अत्र कृत्रिमतायाः कोऽपि स्पर्शः एव न भवति। पाठकहृदये स्वभावानाम् अङ्कने कवेः शैली मनः रञ्जयति।

उपसंहारः-

संस्कृतजगतितलेऽस्मिन् संस्कृतपत्रकारिता सम्प्रति विशिष्टं स्थानम् आवहति। सम्प्रति जनाः संस्कृतपत्रकारितां जीविकात्वेनापि गृह्णन्ति इति महतः हर्षस्य विषयः। आ बहोः कालात् प्रचलिता संस्कृतपत्रकारिता सम्प्रति किञ्चन नवस्वरूपं प्राप्नोत्। आधुनिकसंस्कृतपत्रकारत्वेन डा. बलदेवानन्दसागरवर्यः सर्वविदितः एव। भारते संस्कृतप्रियेषु प्रायशः सर्वे एव वार्तावली इति रोचकं मनोहरं कार्यक्रमं पश्यन्ति इत्यत्र नास्ति संशयः लेशमात्रमपि। इत्थं सम्प्रति संस्कृतपत्रकारिता प्रसिद्धा अभवत्। संस्कृतपत्रकारिता संस्कृतसाहित्यम् उपकरोति पुनश्च संस्कृतसाहित्यं संस्कृतपत्रकारिताम् उपकरोति। संस्कृतसाहित्ये विद्यमानं प्रत्येकमपि ग्रन्थं परिशीलयेम चेत् तत्रत्या भाषा, तत्रत्याः मानकशब्दप्रयोगाः, तत्रत्या विषयाः अस्मान् नितराम् उपकुर्युः। तथा कृते सति संस्कृतपत्रकाराः समृद्धाः भवन्ति, भाषाप्रयोगपटवः भवन्ति तस्मात् पुनः संस्कृतपत्रकारिता समृद्धा भवति। प्रत्येकेनापि पत्रकारेण निश्चप्रचं भाषानिष्णातेन भाषाविदा वा भवितव्यम्। अनया दृष्ट्या संस्कृतपत्रकारेणापि संस्कृतभाषानिष्णातेन भवितव्यम्। संस्कृतपत्रकारः

भाषानिष्णातः भवति चेत् संस्कृतपत्रकारिता यथार्था समृद्धा वा जायेत। अन्ततो गत्वा वक्तुं कामये यत् संस्कृतमानकपत्रकारिताम् उद्दिश्य वयं मानकसंस्कृतभाषाज्ञानाय संस्कृतग्रन्थेषु मानकशब्दानां परिशीलने मतिं कुर्मश्चेत् अस्माकं संस्कृतमपि समृद्धं भवति। जयतु संस्कृतं, जयतु संस्कृतपत्रकारिता।

सन्दर्भग्रन्थसूची-

1. डा. ददन उपाध्याय, भर्तृहरिशतकत्रयम्, वाराणसी, चौखम्बा सुरभारती प्रकाशन, 2010
2. डा.शिवबालक द्विवेदी एवं डा. प्रत्यूषवत्सला द्विवेदी, नीतिशतकम्, दिल्ली, चौखम्भा ओरियन्टालिया, 2018
3. यूथिका घोष, शतकत्रय, कोलकाता, पश्चिमवङ्ग राज्य पुस्तक पर्षद, 1991
4. डा. बलदेवानन्दसागरः, संस्कृतपत्रकारिता इतिवृत्तम् अधुनातनं स्वरूपञ्च
5. hi.wikipedia.org/wiki/पत्रकारिता
6. hi.wikipedia.org/wiki/पत्रकारिता_का_इतिहास

शब्दशास्त्रे शैक्षिकाकूतयः

डा.वेदप्रकाशमिश्रः
असि.प्रोफेसर(संस्कृतम्)
रा.शै.अ.प्र.परिषद्, नवदेहली 16

दृग्गोचरीभूतेऽस्मिन् निखिलेऽपि विश्वे ध्वन्यात्मक-वर्णात्मकोभयभेदेन शब्दाः प्रयुक्ताः वर्तन्ते। लोके तेषामेव मिथः भावावबोधनाय शब्दव्यवहारो दृश्यते। शब्दजव्यापारो हि महान् साधनाविषयः, यतो हि शब्दान् अविज्ञाय तेषाम् अर्थम् अज्ञात्वा यदि प्रयोगः क्रियते चेन्महान् हानिः सम्भाव्यते। साधुशब्दानामेव प्रयोगं कुर्मः नापशब्दानां तदर्थम् आचार्यैः विविधव्याकरणशास्त्राणां शिक्षाशास्त्राणां निरुक्त-कल्पादिशास्त्राणां प्रणयनं कृतम्। अस्माकं परम्परायां भणितिर्विद्यते "अपदं न प्रयुञ्जीत"। मात्रापरिमेयधारिण्यां शब्दशास्त्रीयपरम्परायां महर्षिपतञ्जलिना असकृदुक्तं यद् साध्वनुशासनं कर्तव्यं साधुशब्दानामेवान्वाख्यानं करणीयम्, तेषामभिमतिर्वर्तते यदि एकोऽपि शब्दः सम्यग् ज्ञायते तर्हि तदेव स्वगार्थं लोकार्थञ्चाभ्युदयकारी भवति न तु कदाचिदेवमेव जल्पिताः म्लेच्छितापभाषिताश्च शब्दाः। शब्दव्यवहारविषये भाष्ये नैकधा आचार्याः प्रोचुः- साधुशब्देन असाधुशब्देन चोभाभ्यामप्यर्थबोधस्य समानतायां सत्यामपि साधुप्रयोग एव कर्तव्यः न त्वसाधुशब्दप्रयोगः, एतदर्थमेव शब्दापशब्दानां परिज्ञानाय साध्वनुशासकस्य व्याकरणशास्त्रस्य महती भूमिका वरीवर्ति। व्याकरणशास्त्रस्यैवापरं नाम शब्दशास्त्रमिति। महाभाष्ये महर्षिपतञ्जलिः व्याजहार– "शब्दानुशासनमिदानीं कर्तव्यम्" "शब्दप्रमाणका वयम्" इत्यादयः। यद्यपि लोके उभयविधशब्दैः अर्थावगतिः सम्भवति तथापि व्याकरणनियमानुबोधितैः शब्दैः जायमानो व्यवहारः साधुतां भजते। यतो हि समानायामर्थावगतावपि साधुशब्दविषये शास्त्रेण धर्मनियमः क्रियते। एतदेव भर्तृहरिणा प्रतिपादितम् – **"अर्थप्रत्ययनाभेदे विपरीतास्त्वसाधवः"** ।

लोकव्यवहारज्ञापके साध्वनुशासके गभीरतमेऽस्मिन् महनीयशब्दशास्त्रे चतुष्टयीशब्दानां प्रवृत्तिरिति वचनपुरस्सरं सर्वविधानां शब्दानां प्रयोगो वर्तते। अत्र संकीर्तितोदाहरणैः विश्लेषितनियमैः प्रतिपादितसिद्धान्तैः प्रोक्तादर्शन्यायैः उररीकृतवचनैश्च तत्कालीनव्यवस्थानां लोकसंस्कृतीनां प्रचलितसामाजिकराद्धान्तानां ज्ञानमवाप्यते । अत्र शास्त्रे शब्दसिद्धान्तप्रतिपादनप्रसङ्गे विविधसूत्रोदाहरणादिषु शिक्षायाः दार्शनिकपक्षाणाम्, शैक्षिकविचाराणाम्, शैक्षिकनिहितार्थानाम्, स्त्रीशिक्षायाः, गुरुकुलव्यवस्थायाः, पाठ्यचर्यायाः, गुरुपरम्परायाः, शिक्षणविधेः, पाठ्यविषयस्य, विद्यामहत्त्वस्य,

उच्चारणकौशलस्य, विद्यार्थिनां परीक्षणस्य, गुरोः कर्तव्यस्य च निरूपणं प्राप्यते । तद्यथा– शिक्षादर्शनस्य पक्षं समुद्भावयता काशिकायां "सप्तम्या: पुण्यम्" 6/2/152 अस्मिन् सूत्रे प्रोक्तम् "अध्ययने पुण्यम्, अध्ययनपुण्यम्। वेदे पुण्यम् वेदपुण्यम् इति।। एतच्छिक्षायाः दार्शनिकं स्वरूपं विद्यते। तत्कालीनशिक्षाव्यवस्थायाः दृष्टौ विविधेषु पुण्यदायककर्मसु अध्ययनमपि सुकृतातिधायकं कर्म आसीत्।

काशिकायाम् "यज्ञे समि स्तुव:" 3/3/31 इति सूत्रस्य व्याख्यावसरे प्रोक्तं यत् समेत्य स्तुवन्ति यस्मिन् देशे छन्दोगाः स देशः संस्तावः। एष घञ् प्रत्ययः यज्ञविषये भवति न त्वन्यत्र अतः परस्परं छात्रयोः छात्राणां वा परिचयप्रसङ्गे संस्तवो व्यवह्रियते। अत एवोदाहरणं दत्तं 'संस्तवश्छात्रयो:' अस्यार्थो द्वयोः छात्रयोः मिथः परिचयः। सम्प्रत्यपि छात्राणां परस्परं परिचयः सत्रारम्भे नवप्रवेशावसरे आचर्यते।

शैक्षिकविचाराणामपि निदर्शनं वर्तते "भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा" 3/4/68 अस्य सूत्रस्योदाहरणेषु काशिकाकौमुद्यादिटीकासु प्रोक्तम् "प्रवक्तीति प्रवचनीयो गुरु: स्वाध्यायस्य, प्रवचनीयो गुरुणा स्वाध्यायः इति वा । उपस्थानीयोऽन्तेवासी गुरो:, उपस्थानीय: शिष्येण वा गुरुः" अस्यार्थो भवति– प्रवचनकर्ता गुरुः स्वाध्यायं कृत्वा प्रवचनं करोति तेन स्वाध्यायस्य प्रवचनं क्रियते। अन्यच्च अन्तेवासिभिः शिष्यैः गुरुं निकषैव स्थातव्यः, तैरध्येतृभिः शिष्यैः गुरोः सकाशे अवस्थीयते। अनेन वाक्येन विज्ञायते यद् प्रवक्ता यो गुरुरासीत् स स्वाध्यायशीलः सन्नेव स्वाध्यायस्य शिक्षां यच्छति स्म न तु केवलं प्रवचनम्, स्वयमधीयानः सन् अध्यापनमनेनैषा परम्परा द्योत्यते। पुनश्च द्वितीयेन वाक्येन छात्राणां वासः गुरुसन्निकटे स्यादिति कल्पते, वाक्यमिदं तत्कालीनशिक्षाव्यवस्थायाम् आवासीयगुरुकुलानां मतं द्रढयति। अत्रैवोपात्तापरोदाहरणेन "गेयो माणवकः साम्नाम्, गेयानि माणवकेन सामानि" इति वा अनेन सामगानस्य कस्यचित् पाठ्यविषयवस्तुनः अपि परिज्ञानं भवति।

"इदमोऽन्वादेशेऽशनुदात्तस्तृतीयाऽऽदौ" 2/4/32 अत्र कथनाऽनुकथनोदाहरणेषु अहर्निशाध्ययनपरम्परायाः, छात्राणाङ्कृते देयकम्बलादिवस्तूनां तेषामाढ्याधिक्याद् भासमानशीलादिगुणानां सङ्केतः प्राप्यते। तद्यथा– आभ्यां छात्राभ्यां रात्रिरधीता अथो आभ्यामहरप्यधीतम्। अस्मै छात्राय कम्बलं देहि, अथो अस्मै शाटकमपि देहि। अस्य छात्रस्य शोभनं शीलम्। अथो अस्य प्रभूतं स्वम्।

स्त्रीशिक्षाविषये पाणिनिसूत्रेषु तत्रोक्तोदाहरणेषु बहुप्रोक्तं तद्यथा– **"प्रोक्ताल्लुक्"** (4/2/64) पाणिनिना प्रोक्तं पाणिनीयं तदधीते पाणिनीय:। पाणिनीया ब्राह्मणी। "स्त्रियां स्वरे च विशेष:" अस्य तात्पर्यं लुको फलं स्त्रीलिङ्गे एव दृश्यते असति लुकि टिड्ढाणञ्.. इति ङीप् ततः अणः स्वरेणान्तोदात्तः कृते सति टाब्-भवति स्वरश्चापि मध्योदात्तेति वैशिष्ट्यम्। अनेन ज्ञायते शब्दशास्त्रनैपुण्यं स्त्रीष्वासीदिति तेन पाणिनिशास्त्रविज्ञा वैयाकरणी पाणिनीयेति भवति स्म। महाभाष्ये प्रोक्तम् आपिशलमधीते आपिशला ब्राह्मणी, काशकृत्स्नमधीते काशकृत्स्ना ब्राह्मणी, औदमेध्यमधीते औदमेध्या: छात्रा:। अर्थात् तत्तदध्ययनशीलाः स्त्रियः छात्राश्च।

एवमेव **"नात: परस्य"** (7/3/27) अस्य सूत्रस्य काशिकायां विलिखितं यद् वैयाकरणी भार्या यस्य स वैयाकरणभार्य:। व्याकरणशास्त्रविज्ञा अध्ययनशीला वा यस्य जाया सः वैयाकरणभार्य: इत्यभिधयाभिधीयते। अनेनापि नारीणां शब्दशास्त्रशौण्डत्वं विज्ञायते अपरञ्च तस्या एव नाम्ना समाजे तस्य पत्युरपि नाम वैयाकरणभार्य: इति प्रसिद्ध्यति स्म।

"प्रीतौ च" (6/2/16) अस्मिन् सूत्रे स्त्रीशिक्षाप्रसङ्गे ध्यातव्यमेतद्वर्तते यत्तासां संगीतशिक्षासु विशिष्टा रुचिरासीत् तदर्थमेवास्मिन् सूत्रे प्रोक्तम् "कन्या प्रियो मृदङ्गः" कन्याः मृदङ्गप्रियाः आसन्। अर्थात् कन्याकानां मृदङ्गं प्रियं वाद्यमासीत्। "गस्थकन्" (3/1/146) अस्मिन् सूत्रे गाथिका इति निष्पद्यते अस्य निष्पत्तिः गै-धातोः थकन् प्रत्ययविधानेन स्त्रीलिङ्गे शिल्पीकर्तृत्वे गम्यमाने सत्येव भवति, अर्थात् गायनकर्त्री या सा गाथिका। "अव्ययं विभक्तिसमीपसमृद्धि......." (2/1/6) अत्र सूत्रे प्रथमोदाहरणे एव स्त्रीष्वधिकृत्य कथा प्रवर्तत इति अधिस्त्रि, अधिकुमारि इत्येतौ प्रोक्तौ। "अधिकृत्य कृते ग्रंथे" (4/3/87) सुभद्रामधिकृत्य कृतो ग्रन्थ:, सौभद्र:। गौरिमित्र:। सुभद्रामाश्रित्य विलिखितो ग्रन्थः सौभद्र:। एतदप्युदाहरणं तासां कथा-नाटक-ग्रन्थादिव्याजेन महत्त्वातिधायकं पक्षं द्योतयति।

गुरुकुलेषु अनध्यायदिवः आसन्, तेषु दिनेष्ववकाशोऽनुष्ठीयते स्म। तद्दिनं छात्राणां प्रियतमं दिनमित्यप्यत्रैव "प्रीतौ च" (6/2/16) अस्मिन् सूत्रे उररीकृतम्। तद्यथा- छात्रप्रियोऽनध्याय:।

शैक्षिकक्रिया/पाठ्यक्रमसङ्केतोप्यत्र सूत्रेषूपलभ्यते तद्यथा "एतदस्त्रतसोस्त्रतसौ चानुदात्तौ" (2/4/33) अस्मिन् सूत्रे निर्दिष्टम्– "एतस्मिन् ग्रामे सुखं वसाम:, अथो अत्र युक्ता अधीमहे। एतस्माच्छात्राच्छन्दोऽधीष्व, अथो अतो व्याकरणम् अप्यधीष्व"।

अत्रोररीकृतोदाहरणेषु अध्ययनानुकूलवातावरणनिमित्तकवासस्य छन्द-व्याकरणयोर्विषययोः निर्देशः प्राप्यते।

अपरत्रापि "द्वितीया टौस्वेन: (2/4/34) अन्वादेशप्रसङ्गे छन्द-व्याकरणाध्यापनाय निर्देशो वर्तते तद्यथा- "इमं छात्रं छन्दोऽध्यापय, अथो एनं व्याकरणमध्यापय। अनेन छात्रेण रात्रिरधीता, अथो एनेनाहरप्यधीतम्। एतयो: छात्रयो: शोभनं शीलम्, अतो एनयो: प्रभूतं स्वम्"। अस्योदाहरणेषु विषयमतिरिच्य अहर्दिनं साकल्येनाध्ययनस्य तथा च छात्रयोः शीलं दृष्ट्वा प्रभूतसमृद्धेः परिज्ञानं क्रियते इति तात्कालिकी शिक्षाव्यवस्था विज्ञायते।

एवमेव "चरणे ब्रह्मचारिणि" (6/3/86) अस्मिन् सूत्रे प्रोक्तं यत् ब्रह्मशब्दस्यार्थो भवति वेदः तस्य अध्ययनार्थं यद् व्रतं क्रियते तदपि ब्रह्म तदाचरति/पठति यः स ब्रह्मचारी अर्थात् वेदाध्ययनशीलो वटुः। तथा चोक्तम्– ब्रह्मचारी कः? "ब्रह्म वेद: तदध्ययनार्थं व्रतमपि ब्रह्म, तच्चरतीति ब्रह्मचारी"।

अधीयमानविषयाणामुल्लेखः "तदधीते तद्वेद" (4/2/59) इत्यस्मिन् सूत्रे वर्तते। अत्र पाठ्यविषयमाश्रित्य तत्तद्विषयविज्ञानां नाम विषयविशेषज्ञत्त्वेनापि आसीत् येन तन्नाम्नैव तस्य वैषयिकज्ञानवैदुष्यं प्रतीयते स्म। यथा- छन्दोऽधीते य सः छान्दस:, व्याकरणमधीते वेत्ति वा वैयाकरण:, निरुक्तमधीते वेत्ति वा नैरुक्तः, निमित्तानि वेद नैमित्त:, मुहूर्तं वेद मौहूर्त:, उत्पातं वेत्तीति औत्पात:। छन्द-व्याकरण-निरुक्त-निमित्त-मुहूर्त-उत्पातादिविषयाः आसन् येषामध्ययनेन तत्तद्विषयविज्ञानां नामान्यपि भवन्ति स्म।

पाठ्यविषयाणां निर्देशः "क्रतूक्थादिसूत्रान्तात् ठक्" 4/2/60 अस्मिन् सूत्रे विशदेन वर्तते। तद्यथा- "अग्निष्टोमम् अधीते वेद वा आग्निष्टोमिकः। वाजपेयम् अधीते वेद वा वाजपेयिकः। उक्थादिभ्यः औक्थिकः। लौकायतिकः। सूत्रान्तात् वार्त्तिकसूत्रिकः। साङ्ग्रहसूत्रिकः। सूत्रान्तादकल्पादेरिष्यते। कल्पसूत्रम् अधीते काल्पसूत्रः। अणेव भवति। उक्थशब्दः केषुचिदेव सामसु रूढः। यज्ञायज्ञीयात् परेण यानि गीयन्ते, न च तान्यधीयाने प्रत्यय इष्यते, किं तर्हि, सामलक्षणे औक्थिक्ये वर्तमानः उक्थशब्दः प्रत्ययम् उत्पादयति। उक्थम् अधीते औक्थिकः। औक्थिक्यम् अधीते इत्यर्थः। विद्यालक्षणकल्पसूत्रान्तादिति वक्तव्यम्। वायसविद्यिकः। सार्पविद्यिकः। गौलक्षणिकः। आश्वलक्षणिकः। मातृकल्पिकः। पाराशरकल्पिकः। विद्या च न अङ्गक्षत्रधर्मसंसर्गत्रिपूर्वा। अङ्गविद्याम् अधीते आङ्गविद्यः। क्षात्रविद्यः। धार्मविद्यः। सांसर्गविद्यः। त्रैविद्यः। आख्यानाख्यायिकेतिहासपुराणेभ्यष्ठग्

वक्तव्यः। आख्यानाख्यायीकयोरर्थग्रहणम्, इतिहासपुराणयोः स्वरूपग्रहणं यावक्रीतिकः। प्रैयङ्गविकः। वासवदत्तिकः। सौमनोत्तरिकः। ऐतिहासिकः। पौराणिकः। सर्वसादेर् द्विगोश्च लः। सर्ववेदः। सर्वतन्त्रः। सादेः सवार्त्तिकः। ससङ्ग्रहः। द्विगोः द्विवेदः। पञ्चव्याकरणः। अनुसूर्लक्ष्यलक्षणे च। अनुसूर्नामग्रन्थः, तम् अधीते आनुसुकः। लाक्षिकः। लाक्षणिकः। इकन् बहुलं पदोत्तरपदात्। पूर्वपदिकः। शतषष्टेः षिकन् पथो बहुलम्। शतपथिकः। शतपथिकी। षष्टिपथिकः। षष्टिपथिकी। बहुलग्रहणादणपि भवति। शातपथः। षाष्टिपथः। उक्थ। लोकायत। न्याय। न्यास। निमित्त। पुनरुक्त। निरुक्त। यज्ञ। चर्चा। धर्म। क्रमेतर। श्लक्ष्ण। संहिता। पद। क्रम। सङ्घात। वृत्ति। सङ्ग्रह। गुणागुण। आयुर्वेद। सूत्रान्तादकल्पादेः। विद्यालक्षणकल्पान्तात्। विद्याचानङ्गक्षत्रधर्मसंसर्गत्रिपूर्वा। आख्यानाख्यायिकेतिहासपुराणेभ्यष् ठक्। सर्वसादेर् द्विगोश्च लः। अनुसूर्लक्ष्यलक्षणे च। द्विपदि ज्योतिषि। अनुपद। अनुकल्प। अनुगुण इत्यादयः।

अस्मिन्नेव सूत्रे सिद्धान्तकौमुद्यामुक्तम्- उक्थं सामविशेषस्तल्लक्षणपरो ग्रन्थविशेषो लक्षणयोक्थम्। तदधीते वेद वा औक्थिकः। न्यायम्, नैयायिकः। वृत्तिम्, वार्तिकः । लोकायतम्, लौकायतिकः इत्यादिः । सूत्रान्तात्त्वकल्पादेरेवेष्यते (वा) सांग्रहसूत्रिकः। विद्यालक्षणकल्पान्ताच्चेति वक्तव्यम् (वा) वायसविद्यिकः, गौलक्षणकः, आश्वलक्षणिकः, पाराशरकल्पिकः। अङ्गक्षत्रधर्मत्रि-पूर्वाद्विद्यान्तान्नेति वक्तव्यम् (वा) आङ्गविद्यः, क्षात्रविद्यः, धार्मविद्यः, त्रिविधा विद्या त्रिविद्या तामधीते वेद वा त्रैविद्यः। आख्यानाख्यायिकेतिहासपुराणेभ्यश्च (वा) यवक्रीतमधिकृत्य कृतामाख्यानमुपचाराद्यवक्रीतं तदधीते वेत्ति वा यावक्रीतिकः। वासवदत्तामधिकृत्य कृता आख्यायिका वासवदत्ता। वासवदत्तिकः, ऐतिहासिकः, पौराणिकः। सर्वादेः सादेश्च लुग्वक्तव्यः (वा) सर्ववेदानधीते सर्ववेदः, सर्वतन्त्रः, सवार्तिकः, द्वितन्त्रः। इकन्पदोत्तरपदाच्छतषष्टेः षिकन्पथः (वा) पूर्वपदिकः, उत्तरपदिकः, शतपथिकः, शतपथिकी, षष्टिपथिकः, षष्टिपथिकी इत्यादयः।

भाषाशिक्षणस्य विधेरुच्चारणप्रकारश्चोभयोः निदर्शनम् "एकं बहुव्रीहिवत्" (8/1/2) इत्यस्मिन् सूत्रे वर्तते। तद्यथा– एकैकमक्षरं पठति। अर्थात् ये पाठदोषाः निगदिताः तान् विहाय विस्पष्टरूपेण प्रत्येकं शब्दान् उच्चारयति। पाणिनीयशिक्षायां पाठकानां गुणाः दोषाश्चोक्ताः, तद्यथा–

गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः॥

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥

वर्णोच्चारणप्रसङ्गे शब्दानामुच्चारणं कथं करणीयमिति विज्ञापयन् प्रोक्तं यत् सशङ्कितं भीतम् अव्यक्तं सानुनासिकं काकस्वरं स्थानदग्धम् उपांशु-क्षिप्र-निरस्त-विलम्बित-गद्गदित-प्रगीत-निष्पीडित-ग्रस्तपदाक्षर-दीनोच्चारणं तथा च सानुनास्यम् इत्यादिविविधदोषान् परित्यज्यैव व्यवहारो विधातव्यः। तद्यथोक्तम् –

शङ्कितं भीतमुद्घुष्टमव्यक्तमनुनासिकम् ।
काकस्वरं शिरसिगं तथा स्थानविवर्जितम् ॥ ३४॥
उपांशुदंष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम् ।
निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानुनास्यम् ॥ ३५॥

शब्दोच्चारणस्य निर्देशः कालनानुगुणमपि वर्तते। संगीतशास्त्रे अपि प्रातःकालीनगायनं मध्याह्नकालीन-सायन्तनगायनात् पृथग् भवति तथैव मध्याह्नकालीनगायनं प्रातःकालीन-सायन्तनगायनाद् भिन्नं भवति। तात्पर्यमिदं वर्तते यत् गायनमपि कालानुगुणं दृश्यते। तथैव पाठस्य पठनं वेदमन्त्राणामुच्चारणमपि प्रातः मध्याह्नादिषु कालेषु शार्दूलरुत-संकूजित-मयूरहंसान्यमृतस्वराणां भेदपुरस्सरं भवति। तद्यथा–

प्रातः पठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन ।
मध्यंदिने कण्ठगतेन चैव चक्राह्वसंकूजितसन्निभेन ॥
तारं तु विद्यात्सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम् ।
मयूरहंसान्यमृतस्वराणां तुल्येन नादेन शिरःस्थितेन ॥

अपरत्राप्युच्चारणकौशलं संलक्ष्य निगदितम् “मिथ्योपपदात् कृञोऽभ्यासे” (1/3/71) अभ्यासः पुनः पुनः करणमावृत्तिः। पदं मिथ्या कारयते। सापचारं (सदोषम्) स्वरादिदुष्टमसकृदुच्चारयति इत्यर्थः। मिथ्योपपदादिति किम्? पदं सुष्ठु कारयति। कृञः इति किम्? पदं मिथ्या वाचयति। अभ्यासे इति किम्? पदं मिथ्या कारयति। सकृदुच्चरति।

पठनशिक्षणकौशलयोः निदर्शनम् “संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु” इत्यत्रापि वर्तते (5/1/58) अध्ययन-पञ्चकोऽधीतः सप्तकोऽधीतः, अष्टकः, नवकः,

अधीतिरध्ययनम्, तस्य संख्या परिमाणं पञ्चावृत्तय: पञ्चवारा:। पञ्च रूपाण्यस्याध्ययनस्य पञ्चकमध्ययनम्।

शिक्षणविधिः “अनोरकर्मकात्” 1/3/49 अनुवदते कठ: कलापस्य, अनुवदते मौद्ग: पैप्पलादस्य। अनु: सादृश्ये यथा कलापो अधीयानो वदति यथा कठ इत्यर्थ:। अकर्मकादिति किम्? पूर्वमेव यजुरुदितम् अनुवदति। अर्थात् यथा कलापशाखाध्यायी वदति तथैव कठशाखाध्यायी अप्युच्चरति।

वर्णोच्चारणशिक्षायाः प्रसङ्गमुद्भाव्य तेषां परिगणनं विधाय वाच उच्चारणविधिः निर्दिष्टा वर्तते। तद्यथा –

प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः।
पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ॥२॥
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥ ४॥

प्रारम्भिकीं शिक्षां बोधयन् तत्र वर्णाः उच्चारणस्थानानि तेषां भेदोपभेदादीनां विषये पाणिनीयशिक्षायां नातिविस्तरेण दर्शितम् । तद्यथा–

अनुस्वारो विसर्गश्च ^क ^पौ चापि पराश्रितौ ।
दुःस्पृष्टश्चापि विज्ञेयो ऌकारो प्लुत एव सः ॥ ५॥

तत्र वर्णानां विभागः तेषां स्वरसाम्यात् कालानुगुणं स्थानप्रयत्नादीनां भेदमङ्गीकृत्य पाणिनिशास्त्रे दृग्गोचरीभवति। तद्यथा–

स्वरतः कालतः स्थानात्प्रयत्नादनुप्रदानतः।
इति वर्णविदः प्राहुर्निपुणं तन्निबोधत ॥ १०॥ ॥२॥

वर्णोच्चारणशिक्षा छात्राणां कृते आदावेव शिक्षणप्रक्रियायां वर्णोच्चारणविधिः शिक्ष्यते स्म। तत्र वर्णान् कथं प्रयुञ्जीरन् इत्येतस्मिन् विषयेऽपि प्रोक्तम् –

व्याघ्री यथा हरेत्पुत्रान्दन्ताभ्यां न तु पीडयेत।
भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ॥ २५॥
यथा सौराष्ट्रिका नारी तक्रँ इत्यभिभाषते।

एवम् रङ्गाः प्रयोक्तव्याः खे अराँ इव खेदया ॥ २६॥
रङ्गवर्णं प्रयुञ्जीरन्नो ग्रसेत्पूर्वमक्षरम्।
दीर्घस्वरं प्रयुञ्जीयात्पश्चान्नासिक्यमाचरेत् ॥ २७॥

पाठ्यक्रमः पाठ्यचर्या चा "सूत्राच्च कोपधात्" 4/2/65 महावार्तिकं सूत्रमधीते माहावार्तिकः, कालापकमधीते कालापकः। चतुष्टयमधीते चातुष्टयः। पाणिनीयमष्टकं सूत्रम्, तदधीते अष्टकाः पाणिनीयाः। दशका वैयाघ्रपदीयाः। त्रिकाः काशकृत्स्नाः। "आख्यातोपयोगे" (1/4/29) आख्याता प्रतिपादयिता। उपयोगो नियमपूर्वकं विद्या ग्रहणम्। नियमपूर्वके विद्याग्रहणे सति यः आख्याता पाठयिता तत्कारकम् अपादानसंज्ञकं भवति। यथा – उपाध्यायादधीते, उपाध्यायाद् आगमयति। नियमविशेषपूर्वकमुपाध्यायस्योच्चारणमनूच्चरतीत्यर्थः। उपेत्य अस्मादधीयते इति उपाध्यायः, अध्ययनं तु गुरूच्चारणोत्तरोच्चारणं नियमपूर्वकमिति तत्त्वबोधिनी।

"गोत्रचरणाच्छलाघात्याकारतदवेतेषु" – (5/1/34) गार्गिकया श्लाघते, काठिकया श्लाघते, गार्ग्यत्वेन कठत्वेन च विकत्थते। गार्गिकया अत्याकुरुते, काठिकया अत्याकुरुते। गार्ग्यत्वेन कठत्वेन च परानधिक्षिपतीत्यर्थः। गार्गिकामवेतः, काठिकाम् अवेतः। गार्ग्यत्वं कठत्वं च प्राप्त इत्यर्थः।

"वृद्धिरादैच्" 1/1/1 अस्य सूत्रस्य महाभाष्ये प्रोक्तम् आचार्याणामुपचारात् उपचारः व्यवहारः, स च शक्तिग्रहकशिरोमणिः व्याकरणस्य सत्वात्। शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च। वाक्यस्य शेषाद् विवृतेर्वदन्ति सानिध्यतः सिद्धपदस्य वृद्धा।। इति।

ग्रन्थेषु शब्दशास्त्रे प्रवर्तनार्थं न केवलं प्रवृत्तिजनकव्यापारविधिः संदर्शितोऽस्ति, अपितु तद् व्यवहाराभावे जायमानप्रतिघातानां प्रत्यवायानाञ्चापि संकेतो दृश्यते। तद्यथा–

कुतीर्थादागतं दग्धमपवर्णं च भक्षितम्।
न तस्य पठे मोक्षोऽस्ति पापार्हीरिव किल्बिषात् ॥ ५०॥
सुतीर्थदागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितम्।
सुस्वरेण सुवक्रेण प्रयुक्तं ब्रह्म राजते ॥ ५१॥
मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तदर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ ५३॥

अनक्षरं हतायुष्यं विस्वरं व्याधिपीडितम्।
अक्षता शस्त्ररूपेण वज्रं पतति मस्तके ॥ ५४॥

निष्कर्षरूपेणैतद् वक्तुं पार्यते यद् पाणिनिसम्प्रदाये व्याकरणसूत्रेषु वार्तिकेषु कारिकासु शिक्षासु च विविधशैक्षिकस्वरूपाणि समुपलभ्यन्ते। तत्र प्रारम्भिकशिक्षायाः स्वरूपं वर्णोच्चारणाद्यसकृदभ्यासप्रभृतयः शिक्षादिग्रन्थेषु निगदिताः सन्ति, माध्यमिकस्तरे कोश-प्रक्रियाबोधकग्रन्थाः महत्त्वातिधायकाः वर्तन्ते, उच्चस्तरे शास्त्रार्थनिर्णायकाः चिन्तनवर्धकाः महाभाष्यप्रभृतयः नैके टीकाग्रन्थाः राजन्ते। अत्र निकाये संकीर्तितशैक्षिकतत्त्वेषु वर्णोच्चारणविधयः, शिक्षाप्रकारः, शिक्षणप्रकारः, पाठ्यविषयाः, पाठ्यचर्या, स्त्रीशिक्षादयः विविधाः विषयाः यथाप्रसङ्गं सङ्कीर्तिताः सन्ति।

सन्दर्भाः -

1. श्रोत्रग्राह्यो गुणः शब्दः। स द्विविधः, ध्वन्यात्मकः वर्णात्मकश्च। तत्र ध्वन्यात्मकः भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः॥१५॥ तर्कसंग्रहः
2. वाक्यपदीयम् १/२७ –
3. महाभाष्यम् 4/1/14
4. [1] वैयाकरणसिद्धान्तकौमुदी
5. [1] काशिका अत्रैव सूत्रे
6. [1] पाणिनीयशिक्षा श्लोकसंख्या –३३
7. [1] पाणिनीयशिक्षा
8. [1] पाणिनीयशिक्षा श्लोकसंख्या –३६-३७
9. [1] पाणिनीयशिक्षा
10. [1] पाणिनीयशिक्षा
11. [1] पाणिनीयशिक्षा
12. [1] पाणिनीयशिक्षा
13. [1] पाणिनीयशिक्षा
14. [1] पाणिनीयशिक्षा

वैदिकवाङ्म्ये पयोजन्यपदार्थानां नामानि विनियोगश्च ।

डॉ. ओंकार शामसुंदर जोशी, डेक्कन कॉलेज, पुणे

ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च चत्वारः वेदाः सन्ति । प्रत्येकं वेदस्य चत्वारः विभागाः विद्यन्ते । ते यथा – संहिता, ब्राह्मणम् ,आरण्यकम् ,उपनिषत् इति । यज्ञीयकर्मणां विषये ब्राह्मणम् अन्यतमं वर्तते । यज्ञविधिं बृंहते इति ब्राह्मणम् इयं ब्राह्मणग्रन्थस्य व्याख्या । यज्ञसंस्थायाः मूलस्वरूपं ब्राह्मणग्रन्थेषु विकसितं दृश्यते । परं यज्ञसंस्थायाः अधिकः विस्तारः श्रौतसूत्रेषु विशेषतः विद्यते । ब्राह्मणग्रन्थेषु श्रौतसूत्रेषु च विविधयज्ञविधीनां वर्णनावसरे नैकेषां यज्ञीयानां पदार्थानां विस्तृतं विवेचनं लभ्यते । तेषु पदार्थेषु पयः, दधी, घृतं , शरः, फाण्टं, नवनीतं, मस्तु च इत्यादयः पयोजन्याः पदार्थाः हवीरूपेण विनियुक्ताः। एषां पयोजन्यपदार्थानां विविधानि नामानि विविधस्वरूपाणि च उपलभ्यन्ते। यज्ञविधिषु एतेषां प्रत्येकं पयोजन्यपदार्थानां विशेषमहत्त्वञ्च वर्तते। अतः एतेषां पयोजन्यपदार्थानां स्वरूपावगमनमेवं तेषां यज्ञेषु विनियोगश्च विवेचनार्हौ। वैदिककाले एव पयोजन्यपदार्थानां ईदृशी विस्तृतता अनेन निबन्धेन प्रकटीकर्तुं यत्नोऽयं प्रसक्तः। सामान्यतः पयोजन्यपदार्थवाचकशब्दानां संख्या सप्तदश वर्तते। तेषां पदार्थानां पर्यायशब्देन सह विवेचनं क्रमेण प्रतिपाद्यते।

१. दुग्धम् –

दुग्धवाचिनः चत्वारः शब्दाः विद्यन्ते । दुग्धम्, पयस् , क्षीरं गोश्च । दुग्धशब्दः दुह् धातोः निष्पन्नः। कृतदोहगवादिकम्[1] इति अनेन सन्दर्भेन ज्ञायते यत् गवादिप्राणिभ्यः दोहेन प्राप्यमानः पदार्थः दुग्धशब्देन द्योत्यते। तथापि संहितासु गोः दुग्धम् अयमेव अर्थः स्वीकृतः।[2]
२. पयः – पयः इति शब्दः पी (पाने) इत्यस्मात् धातोः सञ्जातः। पयः इति शब्दस्य जलं[3], वनस्पतिरसाः[4], द्रवपदार्थाः , मद्यम्[5] , अमृतम् [6]इत्यादयः नैके अर्थाः। विशेषेण पयः इति

[1] ऋ. viii.50.3

[2] ऋ. x.67.1, वासं xxviii .16.39

[3] यशसः ... अभि स्वेम पयसा पीप्याताः । ऋ. vii.36.6

[4] सं ते पयांसि समु यन्तु वाजाः। वासं १२.११३, शतब्रा. I.ii.1.22.

[5] एतद्वै संवत्सरस्य स्वं पयः यदाज्यम् । शतब्रा. I.v.3.5

[6] शिवशर्मा ... पुनर्मायां चकाराय कुम्भादपहृतं पयः।पद्म. ii.4.46

शब्दः 'गोदुग्धम् ' अस्मिन्नर्थे ऋग्वेदसंहितायां[7] आश्वलायनश्रौतसूत्रे[8] च प्रयुक्तः । ऋग्वेदे दृश्यमाने सन्दर्भे पयसः पीतवर्णेन सह सम्बन्धस्य उल्लेखः प्राप्यते ।[9] गोदुग्धमेव पीतवर्णीयम् अतः पयः नाम गोदुग्धमेव इति निश्चितम् । शतपथब्राह्मणे पयोव्रतस्य निर्देशः अस्ति ।[10] तत्र व्रतसम्बन्धिदुग्धे पयः इति शब्दः प्राधान्येन प्रयुज्यते ।

३. क्षीरम् –

निरुक्ते क्षीरशब्दस्य व्युत्पत्तिः 'क्षरते इति क्षीरम् ' लभ्यते ।[11] अतः क्षीरं क्षर् धातोः निष्पन्नम् । क्षीरशब्दस्य मधु , मद्यं, जलं, वृक्षरसम् इति नैके अर्थाः। शतपथब्राह्मणे क्षीरशब्दः अजाक्षीरम् [12]इति रूपेण योजितः। 'अजायाः दुग्धम् ' इति अर्थे प्रामुख्येन क्षीरशब्दः उपयोजितः शतपथब्राह्मणे ।

४. गोः -

गम् धातोः गोशब्दः निर्मितः। गोशब्दस्य अष्टाविंशतिः अर्थाः।[13] रुढ्या गोशब्दः प्राणिवाचकः किन्तु वैदिकवाङ्मये गोशब्दस्य गोदुग्धम्[14] इत्यपि एकः विशेषः अर्थः दरीदृश्यते।

५. प्रतिधुक् -

प्रतिधुक् इत्येषः विशेषः शब्दः वैदिकवाङ्मये अन्यतमं पयोजन्यं पदार्थं निर्दिशति। यत् प्रत्यदुहत् तत् प्रतिधुषः प्रतिधुक्त्वम्[15] इत्यनेन सन्दर्भेण ज्ञायते यत् दोहनक्रियायाः अनन्तरं प्राप्यमानम् उष्णं दुग्धम् इत्येव प्रतिधुक् शब्दस्य अर्थः। अत्र अग्निसंयोगाभावात् तथा च अग्निसंयोगात् प्राक् दोहनप्रक्रियायाः अनन्तरं प्रथमः विकारः इत्ययम् अर्थः प्रतिधुक् शब्देन ज्ञायते । प्रतिधुक् अयःपात्रे न पाचनीयम् इत्यनेन काठकसंहितायाः सन्दर्भेण

---

[7] ऋ. i.164.28, iv.3.9, v.85.2

[8] आश्वश्रौसू. I.ii.3.1

[9] गौरस्य यः पयसः पीतिमानशे । ऋ. x.100.2

[10] शतब्रा.IX.v.1.1

[11] नि. 2.5.

[12] शतब्रा. XIV.i.2.13

[13] आपटे शब्दकोशः पृ. 192

[14] गोऋजीका मधूनि । ऋ. iii.58.4

[15] तैसं. II.v.3.3

वैदिकविज्ञानस्य विशेषता दृश्यते ।[16] शतपथब्राह्मणे गोवैं प्रतिधुक्[17] इति उल्लेखः विद्यते। प्रातःसवने प्रतिदुहा श्रयणम्[18] इत्यनेन सन्दर्भेण ज्ञायते यत् अस्य विनियोगः प्रातःसवने भवति।

६. शृतम् -

शृतम् इति शब्दः क्वथितं , पक्वम् , उष्णदुग्धम् इति नैकेषु अर्थेषु उपयुज्यते। अग्निसंयोगात् निष्पन्नं यत् पक्वदुग्धं तन्नाम शृतम् ।[19] तैत्तिरीयगोपथब्राह्मणयोः प्रतिधुकः विनियोगः प्रातःसवने भवति तथा च शृतस्य माध्यन्दिनसवने इति स्पष्टोल्लेखाः ।[20]

७. आतञ्चनम् -

आतञ्चनशब्दस्य त्रयोदशार्थाः।[21] तेषु प्रतिवापकरणम् [22](coagulation) इत्येषा प्रक्रिया प्रामुख्येन विचारणीया । शाबरभाष्ये दध्युत्पन्ने प्राक् दधीकरणाय या क्रिया सा आतञ्चनशब्देन अभिप्रेता । अतः आतञ्चनं नाम दध्युत्पादनाय क्षीरे दध्यादिप्रक्षेपणम् इति स्पष्टमेव।[23] शतपथब्राह्मणे आतञ्चनं पूर्वेद्युः करणीयम् इति विशेषेण उक्तम् ।[24]

८. दधि -

तैत्तिरीयसंहितायां [25]'धा' धातोः दधातीति नाम यद् एनमधिनोत् तत् दध्नो दधित्वम् इति दधिशब्दस्य व्युत्पत्तिः प्राप्यते । शतपथब्राह्मणे क्षीरं दधिभावेन परिणमते इति स्पष्टोल्लेखः तथा च शतपथब्राह्मणे दधिः , मस्तु इत्यादयः पयोजन्यपदार्थानां क्रमोऽपि निर्दिष्टः।[26] हविरूपेण आग्रायणेष्ट्यां दध्नः विनियोगः ।

---

[16] तस्मादत्रप्वयःपात्रं प्रतिधुक् कूडयति । कासं. 6.3

[17] शतब्रा. III.iii.3.2

[18] कात्याश्रौसू. xxii.9.9

[19] तैब्रा. I.iv.7.6

[20] प्रतिधुक् च प्रातः पूतिकाश्च शृतं च माध्यन्दिने पूतिकाश्च । गोब्रा. ii.1.9

[21] आपटे शब्दकोशः पृ. 78

[22] आपश्रौसू. vi.15.6

[23] शाभा. vi.5.4

[24] यत् पूर्वेद्युर्दुग्धं दधि हविरातञ्चनं तत्कुर्वन्ति । शतब्रा. XI.i.4.1

[25] तैसं. II.v.3.4.

[26] Eggling. Sacred book of the East 12.218, शतब्रा.I.viii.1.8

९. पयस्या -

सामान्यतया पयस्या इत्ययं शब्दः दधिशब्दस्य समानार्थकः। किन्तु शतपथब्राह्मणे उष्णदुग्धं, शीतदुग्धम् इत्यादयः अर्थाः अपि पयस्याशब्देन युज्यते ।[27] तैत्तिरीयसंहितायां दधिमिश्रितपदार्थाः तथा च पयोजन्यपदार्थाः इति पयस्या शब्दस्य अर्थभिन्नता स्पष्टीकृता ।[28] पयस्यापदार्थस्य विनियोगः प्रामुख्येन मैत्रावरुणीयागे दृश्यते ।[29]

१०. आमिक्षा -

अतितप्ते दुग्धे यदा दधि निक्षिप्यते तदा तत् दुग्धं विदीर्णं भवति एवं तस्य उपरि दधिसदृशः घनीभूतः पदार्थः निष्पद्यते अधस्तात् जलम् इति सद्यो जायते। तत्र घनीभूतपदार्थः आमिक्षा[30] इति पदेन सम्बोध्यते । अतः एव पूर्वमीमांसासूत्रं वर्तते 'दधिसंयुक्ततप्तपयसो घनीभूतो भागः '।[31] दर्शयागे[32] चातुर्मास्ययागे[33] च आमिक्षायाः विनियोगः उक्तः । कात्यायनश्रौतसूत्रव्याख्याकारस्य याज्ञिकदेवस्य मतानुसारेण आमिक्षाशब्दः पयस्याशब्दस्य समानार्थकः ।

११. वाजिनम् -

तप्ते पयसि दधिसंयोजने घनीभावातिरिक्तः अवशिष्टः पयसः जलभागः वाजिनम् इति उच्यते ।[34] शाबरभाष्यानुसारेण दध्ना संयुक्तस्य तप्तपयसः द्रवीभूतो अंशः नाम वाजिनम् ।[35] याज्ञिकदेवस्य मतानुसारेण वाजिनम् इति 'तिक्तकटुको रसः। सुरा इत्यपि वाजिनस्य अपरार्थः ।[36] वाजिनस्य विनियोगः स्विष्टकृते न कर्तव्यः इति ऐतरेयब्राह्मणस्य विधानम् ।[37]

---

[27] Eggling. Sacred book of the East 12.पृ .381 शतब्रा.II.iv.4.21

[28] धानाः करम्भः परिवापः पुरोडाशः पयस्या तेन पङ्क्तिराप्यते । तैसं. VI.v.11.4

[29] मित्रावरुणाभ्यां …. पयस्या वासं.29.60 , शतब्रा.II.iv.4.10,21

[30] तत्वचिं. IV.2.पृ.702

[31] पूमी. VIII.ii.4.19(1608)

[32] मैत्रावरुण्यामिक्षयामावास्यायां यजेत । तैसं.V.vii.6.5, II.v.5.4

[33] चातुर्मास्येषु ... वैश्वदेव्यामिक्षेति । तन्त्रवा. ii.2.23 (530.4)

[34] कोशक. 5605

[35] शाभा. viii.2.1

[36] न्यायमावि. viii.2.1 (iv.4.32)

[37] ऐब्रा. 4.5(95)

१२. मस्तु –

मस्तु इति एकः वैशिष्ट्यपूर्णः पयोजन्यपदार्थवाचकः शब्दः । मस्तुशब्दस्य अर्थः राजनिघण्टौ 'दधिद्विगुणितं वारियुक्तः पदार्थः'[38] इति दत्तः। शाबरभाष्ये तु दधिगते जलभागः तथा च दधिभवं मण्डम् इति उदितम् ।[39] मस्तु इति शब्दः काठकतैत्तिरीयसंहितयोः शतपथब्राह्मणे च वर्तते न तु अन्यत्र । प्रायः मस्तु इति शब्दः तक्रशब्दस्य पर्यायवाची ।

१३. शरः –

नवार्थाः भवन्ति शरशब्दस्य । तस्य पक्वक्षीरस्योऽपरि सारभूतं तारिका इति प्रमुखः अर्थः ।[40] तथा च दध्याग्रसारः[41] इत्यपि अपरो मुख्यार्थः। निरुक्तानुसारेण शरः श्रुणातेः।[42] शरशब्दस्य पयोजन्यपदार्थरूपेण बहवः सन्दर्भाः आयुर्वेदे लभ्यन्ते ।

१४. फाण्टम् -

वैशिष्ट्यपूर्णम् अयं शब्दः केवलं शतपथब्राह्मणे एव उपलभ्यते ।[43] यद् अशृतम् अपिष्टं च कषायम् उदकसम्पर्कमात्रात् विभक्तरसम् ईषदुष्णं तत् फाण्टम् इति काशिकायाम् ।[44] चूर्णं ,वनस्पतिरसः, दुग्धजन्यपदार्थः इति फाण्टस्य अर्थाः।

१५. नवनीतम् –

नवं नीयते अनेन इति नवनीतम् । वैदिकसंहितासु[45] शतपथब्राह्मणे[46] च अस्योल्लेखः । सोमयागे दीक्षाविधौ लेपनार्थे नवनीतस्य विनीयोगः ।[47]

१६. आज्यम् –

आज्यते इति आज्यम् इति रूढीभूता व्युत्पत्तिः आज्यशब्दस्य । निरुक्ते आजिमायुः तस्मात् आज्यानाम् आज्यत्वम् इति व्युत्पत्तिः दत्ता । आज्यं नाम द्रवपदार्थः , घृतस्य

---

38 राजनि. पृ.331.पं.12

39 शाभा. iii.4.11

40 तैसं. v.44.3, वैखाश्रौसू. ix.2.5,ix.3.7, भारश्रौसू.viii.12.1

41 शरो दध्याद्यग्रसारे बाणे काण्डे तृणान्तरे । नाना. पं .905

42 नि. 5.4

43 फाण्टं मनुष्याणाम् । शतब्रा. III.i.3.8

44 का.vii.2.18

45 तैसं.II.iii.10.1, कासं. xi.7, मैत्रासं.ii.3.4

46 शतब्रा. III.i.3.7,8

47 शतब्रा. III.i.3.7,8

पूर्वावस्था इति सायणाचार्येण ऐतरेयब्राह्मणस्य भाष्ये कथितम् ।[48] हविर्द्रव्यरूपेण आज्यं प्रसिद्धम् ।[49]

१७. घृतम् –

जिघर्ति क्षरतीति घृधातोः निष्पन्नः घृतशब्दः । घनीभूतं आज्यं एव घृतम् । घृतस्य विनीयोगः हवीरूपेण प्रसिद्धः।[50]

उपसंहारः –

लघुनिबन्धेऽस्मिन् ब्राह्मणग्रन्थेषु उपलभ्यमानानां पयोजन्यपदार्थाणां विवेचनं कृतम् । तेषां संज्ञा विनियोगश्च विवेचितौ । तत्र कानिचित् निरीक्षणानि अत्र उपस्थाप्यन्ते -

१. शतपथब्राह्मणे पयोजन्यपदार्थवाचकाः प्रायः सप्तदश शब्दाः दरीदृश्यन्ते ।
२. एते शब्दाः दुग्धस्य प्रत्येकम् अवस्थानुरूपाः प्रयुक्ताः।
३. पयोजन्यपदार्थानां दुग्धात् घृतपर्यन्तं सर्वाः प्रक्रियाः तथा च प्रक्रियाणां क्रमः अपि वैदिकवाङ्मये सूक्ष्मरूपेण अवलोकितः ।
४. मस्तु , शरः , फाण्टम् एते पयोजन्यपदार्थवाचकशब्दाः प्रामुख्येन वैदिकवाङ्मये एव समागताः।
५. यागेषु च तेषां विनियोगः दृश्यते ।

एतेन न केवलं यागानां समृद्धिः दृश्यते, किन्तु लौकिकव्यवहारस्यापि अतिवृद्धिः अभिलक्ष्यते । विशेषतः पयः एवं तदुत्पन्नानां पदार्थानां इतोऽपि अधिका चर्चा विद्यते ।बहुत्र एतेषां पदार्थानां निष्पादनप्रक्रियापि ब्राह्मणग्रन्थेषु विवेचिता अस्ति । एतस्मात् पयः एवं तज्जन्यानां वैदिकसंस्कृतौ प्रामुख्यं प्रकटीभवति । भाषाशास्त्रदृष्ट्या अपि प्रत्येकं पदानां व्युत्पत्तिः निरुक्तिः च लभ्यते । न केवलं ब्राह्मणग्रन्थेषु अपि तु श्रौतसूत्रेषु मीमांसाशास्त्रे निरुक्तादिग्रन्थेषु च अयं विषयो दृश्यते । तेषामाधारः अपि कदाचिद् वेदे एव ।

---

[48] सर्पिर्विलीनमाज्यं स्याद् घनीभूतं घृतं भवेत् । (i.3 p.240 edition Aufrecht) VedI. 250

[49] कात्याश्रौसू. i.8.37

[50] ऋ. i.134.6, ii.10.4, iv.10.6, शतब्रा. I.viii.1.7

आधारग्रन्था।:

सन्दर्भग्रन्था:।

- अभ्यंकर, काशीनाथ वासुदेवशास्त्री (संशो.) १९८४. *श्रीमज्जैमिनिप्रणीते मीमांसादर्शने (भट्टकुमारिलप्रणीत – तन्त्रवार्तिकसहितशाबरभाष्योपेतः)* . पुणे: आनन्दाश्रम:.
- आगाशे, काशीनाथशास्त्री (संशो.) १९७७. *ऐतरेयब्राह्मणम् सायणाचार्यविरचित भाष्यसमेतम्*. पुणे: आनन्दाश्रम.
- आपटे, नारायण (संशो.) १९९९. *तैत्तिरीयब्राह्मणम् सायणाचार्यविरचितभाष्यसमेतम्*. पुणे: आनन्दाश्रम:.
- आपटे, महादेव (संशो.) १८९३ . *पद्मपुराणम् (प्रथमो भागः)*. पुणे: आनन्दाश्रम:.
- आपटे, विनायक (संशो.) १९३३. *श्रीमज्जैमिनिप्रणीते मीमांसादर्शने (भट्टकुमारिलप्रणीत – तन्त्रवार्तिकसहितशाबरभाष्योपेतः)*. पुणे: आनन्दाश्रम:.
- आपटे, विनायक (संशो.) १९२५. *राजनिघण्टुसहितो धन्वन्तरीयनिघण्टुः* . पुणे: आनन्दाश्रम:.
- आपटे, हरि नारायण (संशो.) १९१६. *जैमिनीयन्यायमाला अर्थात् मीमांसाधिकरणन्यायमाला* . पुणे: आनन्दाश्रम:.
- कलाण्ड, डब्ल्यु. (सम्पा.) १९९१. *वैखानसश्रौतसूत्रम्*. द्वितीय संस्करण.दिल्ली: मुन्शीराम मनोहरलाल प्रकाशन.
- काशीकर, चिं.ग. (सम्पा.). १९६४. *भारद्वाजश्रौतसूत्रं पैतृमेधिकपरिशेषसूत्राभ्यां सहितम्*. पुणे: वैदिकसंशोधनमण्डल.
- काशीकर, चिं.ग.१९७७. *श्रौतधर्मांची स्वरूप चिकित्सा*,पुणे: टिळक महाराष्ट्र विद्यापीठ.
- काशीकर, चिं.ग., सोनटक्के, नारायण. (सम्पा.)१९०५. *ऋग्वेदसंहिता सायणाचार्यविरचितभाष्यसमेता ९-१० मण्डलात्मकः चतुर्थो भागः*.पुणे: वैदिकसंशोधनमण्डल.
- के . साम्बसदाशिवशास्त्री.१९२९.*मीमांसाश्लोकवार्तिकं सुचरितमिश्रप्रणीतया काशिकाख्यया टीकया समेतम्* .त्रिवेन्द्रम् .राजकियमुद्रणयन्त्रालयः.

- गर्बे, रिचर्ड (सम्पा.) १८८५.*आपस्तम्बश्रौतसूत्रं रुद्रदत्तटीकासमेतं*, द्वितीय:खण्ड:. कलकत्ता: एशियाटिक सोसायटी.
- देशपांडे, मैत्रेयी (सम्पा.) २०१२. *कृष्णयजुर्वेदीयतैत्तिरीयसंहिता श्रीमत्सायणाचार्यविरचितभाष्यसमेता प्रथम: भाग:* दिल्ली : न्यू भारतीय बुक कारपोरेशन.
- धर्माधिकारी, त्रिविक्रम (सम्पा.) १९८५. *तैत्तिरीय-संहिता, भट्टभास्कर-सायणाचार्य-विरचित-भाष्याभ्यां समेता.* पुणे: वैदिकसंशोधमण्डल.
- नरसिंहाचार्य: १९४४. *आपस्तम्बश्रौतसूत्रं धूर्तस्वामिभाष्यभूषितं श्रीरामाग्निचिद्वृत्तिसहितम्*.मैसूर: ओरियण्टल लायब्ररी प्रकाशनम्.
- प्रज्ञा देवी, मेधा देवी, सेठ, इन्द्रदयाल. १९७७. *गोपथब्राह्मणम्*. इलाहाबाद. अथर्ववेदभाष्य कार्यालय.
- बहादुर:, स्यार-राजा-राधाकान्तदेव:. १८८६. *शब्दकल्पद्रुम:*. कालिकाता: श्रीवरदाप्रसादवसु: श्रीहरिचरणवसुश्च.
- बावा रणवीरसिंग (सम्पा.) १९८६. *आश्वलायनश्रौतसूत्रं देवत्रातभाष्यसङ्कलितम्*. होशियारपूरम्: पंजाबविद्यापीठम्.
- भट्टाचार्य, श्रीतारनाथ. १९६२. *वाचस्पत्यम्*. वाराणसी: चौखम्बा संस्कृत सिरीज आफिस.
- भिडे,विद्याधर.(अनु.) १९८७.*तैत्तिरीय-संहिता मराठी अनुवाद*. पुणे: पुणे विद्यापीठ.
- मीमांसक, युधिष्ठिर (सम्पा.). १९८४. *श्रौतपदार्थनिर्वचनम्*. हरियाना
- राजवाडे, वैजनाथ (संशो.). १९२६. *निरुक्तं दुर्गाचार्यकृतवृत्तिसमेतं, द्वितीय: भाग:*. पुणे: आनन्दाश्रम.
- राजवाडे, व्हि.के., वासुदेवशास्त्री, एम. एम., अभ्यंकर, सोनटक्के, एन. एस., वरदराजशर्मा, टी. एस. (सम्पा.)१९७२. *ऋग्वेदसंहिता सायणभाष्यसमेता, प्रथमोभाग:*. पुणे: वैदिकसंशोधनमण्डल.

- वेबर, अल्बेर्त (सम्पा.) १९९७. *शतपथब्राह्मणं माध्यन्दिनीयां शाखामनुसृत्य श्रीमत्सायणाचार्यहरिस्वामिद्विवेदङ्गकृतभाष्येभ्य: सारमुद्धृत्य,* तृतीय संस्करण. वाराणसी: चौखम्बा प्रकाशन.
- शास्त्री, पीताम्बरदत्त. २००५. *श्रौतयज्ञप्रक्रिया-पदार्थानुक्रमकोश:.* नवदेहली: राष्ट्रियसंस्कृतसंस्थान.
- शास्त्री, महादेव. (सम्पा.) १९८५. *तैत्तिरीयब्राह्मणम्.* (पुनर्मुद्रणम्). दिल्ली: मोतीलाल बनारसीदास.
- शास्त्री, महादेव., श्रीनिवासाचार्य:(सम्पा.). १९८५. *तैत्तिरीयब्राह्मणं भट्टभास्करमिश्रविरचितभाष्यसहितम्.* देहली:मोतीलालबनारसीदास.
- शास्त्री, माधव (सम्पा.) १९१५. *शुक्लयजुर्वेदकाण्वसंहिता श्रीमत्सायणाचार्यविरचितभाष्यसमेता.* बनारस: विद्याविलासप्रकाशन.
- सातवळेकर, श्रीपाद (सम्पा.) १९४३. *काठकसंहिता.* औन्ध: स्वाध्यायमण्डलप्रकाशन.
- सोनटक्के (सम्पा.). १९४१. *ऋग्वेदसंहिता सायणभाष्यसमेता, तृतीयोभाग:.* पुणे: वैदिकसंशोधनमण्डल.
- सोनटक्के, नारायण,काशीकर,चिन्तामणि,शर्मा, वरदराज, उमराणीकर,बी. व्ही. २००१.*ऋग्वेदसंहिता सायणाचार्यविरचितभाष्यसमेता २-५ मण्डलात्मक: द्वितीयो भाग: (पुनर्मुद्रणम्).* पुणे: वैदिकसंशोधनमण्डल.
- सोनटक्के, नारायण,काशीकर, चिन्तामणि. १९७८.*ऋग्वेदसंहिता सायणाचार्यविरचितभाष्यसमेता ६-८ मण्डलात्मक: तृतीयो भाग:.*पुणे: वैदिकसंशोधनमण्डल.
- Apte, S. 2012. *Sanskrit – English Dictionary.* Delhi: Motilal Banarasidas.
- Caland, W. (Ed.). 1991. *Vaikhānasa Śrautasūtra.* Delhi: Munshiram Manoharalal.
- Dharmadhikar, T. N. 2008. *Maitrāyiṇī Saṁhitā Its Ritual and Language*. Pune: Adarsh Sanskrit Shodh Samsathan.

- Eggeling Julius (Tr.). 2001. *Śatapatha Brāhmaṇa (1st ed. by Oxford University Press 1882)*. Delhi: Motilal Banarsidass.
- Keith (Tr.) 1914. *Taittiriya Saṁhitā. Part 1 Kāṇdas I-II.* Cambridge: The Harvard University Press..
- Macdonnell Arthur. 1958. *Vedic Index of Names and Subjects Vol II*. Delhi: Motilal Banarasi Dass.
- Mathuranatha Tarkavagisha and Jayadeva Mishra.1990. *The Tattvacintāmaṇi of Gaṅgeśa Upādhyāya (Vol.iv.2)*. Delhi. Chaukhamba Sanskrit Pratishthan.
- Patkar Madhukar Mangesh and Sharma K.V.Krishnamoorthy.1966.*Koṣakalpataru(Fascicule II).*Poona.Deccan College.
- Sharma Bellikoth Ramchandra.1954. *Nānārtha-ratnamālā of Irugapa Daṇḍāhinātha*. Poona.Deccan College.
- Shastri Pandit Jagdishlal.1971. Vājasaneyi-Mādhyandina Śukla Yajurveda *Saṁhit with the Mantra –Bhāṣya of Uvaṭa,the Vedadīpa-Bhāṣya of Mahīdhara.*Delhi.Motilal Banarasidass
- Sen, Chitrabhanu. 1982.*A Dictionary of The Vedic Rituals Based on The Śrauta and Gṛhya Sūtras. Reprint* Delhi: Concept Publishing Company.
- Suryakanta. 1981. *A practical Vedic Dictionary*. Delhi: Oxford University Press.
- Thite, G. U. (Tr.). 2006. *Kātyāyana Śrautasūtra Text with English Translation & Notes Vol.1*. Delhi: Bhāratīya Book Corporation.

- Thite, G. U. (Tr.). 2004. *Āpastamba ŚrautasŪtra Text with English Translation & Notes Vol.1*. Delhi: Bhāratīya Book Corporation.
- Williams, Monier. 1899. *Sanskrit -English Dictionay*. London: Oxford University Press.

गौणग्रन्था: ।

- विश्वबन्धु: (सम्पा.). १९८९. *वैदिकपदानुक्रमकोश: संहिताभाग: खण्ड:* ३होशियारपुर: विश्वेश्वरानन्द-वैदिकशोध-संस्थान.
- Ranade, H. G. (Tr.) 1981. *ĀŚvalāyan Śrauta SŪtra*. Poona: Ranade Publication.
- Ranade, H.G. (Tr.) 1978. *Kātyāyana Śrauta SŪtra (Rules for the Vedic Sacrifices)* Pune: H.G.Ranade & R.H.Ranade.
- Ranade, H.G. 2006. *Illustrated Dictionary of Vedic Rituals*. New Delhi: Indira Gandhi National Centre for the Arts & Aryan Books International.

ग्रन्थसंक्षेपा:

आपश्रौसू .	आपस्तम्बश्रौतसूत्रम्। -
आश्वश्रौसू .	आश्वलायनश्रौतसूत्रम्। -
ऋ .	-ऋग्वेद|:
ऐब्रा .	-ऐतरेयब्राह्मणम्।
का.	- काशिका।
कात्याश्रौसू .	कात्यायनश्रौतसूत्रम्। -
कासं.	-काठकसंहिता।
कोशक.	- कोशकल्पतरु ।
गोब्रा .	–गोपथब्राह्मणम्।
तत्वचिं.	- तत्वचिंतामणिः ।
तन्त्रवा.	- तन्त्रवार्तिक ।

तैब्रा. - तैत्तिरीयब्राह्मणम्।
तैसं. - तैत्तिरीयसंहिता।
नाना. - नानार्थरत्नमाला।
नि. - निरुक्तम्।
न्यायवि. - न्यायमालाविस्तर ।
पं. - पङ्क्तिः।
पद्म. - पद्मपुराणम् ।
पूमी. -पूर्वमीमांसासूत्र।
पृ. - पृष्ठम्।
भारश्रौसू. – भारद्वाजश्रौतसूत्रम्।
मैसं . -मैत्रायणीसंहिता।
राजनि. - राजनिघण्टु।
वासं - वाजसनेयी संहिता।
वैखाश्रौसू. - वैखानसश्रौतसूत्रम्।
शतब्रा. - शतपथब्राह्मणम्।
शाभा. - शाबरभाष्यम् ।
VedI. - Vedic Index.

पाणिनीयसूत्रणां संख्या, वर्गीकरणं, विषयविभागश्च

डॉ. गोविन्द नाथ चौधारी,
सहायक प्राचार्यः (अतिथिः)
व्याकरणविभागः,
राजकीय संस्कृत महाविद्यालयः,
भागलपुरम्, बिहारः– 812007
मो.– 09973341297
मेल– govindnathchaudhary@gmail.com

पूर्वपीठिका–

संस्कृतवाङ्मये श्रौतसूत्र–गृह्यसूत्र–न्यायसूत्र–मीमांसासूत्रद्यनेकानि सूत्राणि विराजन्ते। तेषु सूत्रसाहित्येषु महर्षि–पाणिनि–विरचिताष्टाध्याय्याः सर्वशास्त्रोपकारकत्वात् सर्वातिशायि महत्त्वं वर्तते। तद्यथा–[(1)]

'यो वेद वेदवदनं सदनं हि सम्यग्,
ब्राह्मयाः स वेदमपि वेद किमन्यशास्त्रम्।
यस्मादतः प्रथमतदधीत्य धीमान्,
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी।।' इति।

यद्यपि–

'इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः।।
ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकलं पाणिनीयकम्।।' इति।

इत्यादिप्रसिद्धश्लोकानुसारेण नैकानि व्याकरणानीति श्रूयते, तथापि सम्प्रत्युपलभ्यमानेषु व्याकरणेषु अष्टाध्यायी, पाणिनीयाष्टकम्, पाणिनीयशब्दानुशासनमित्याद्यनेकनामभिर्विश्रुतं महर्षिपाणिनिना प्रणीतं व्याकरणमेव सर्वतः प्राचीनं लौकिकवैदिकोभयशब्दान्वाख्यायकं विद्वद्भिः स्वीकृतम्, अध्ययनेऽध्यापने च प्रचलितमस्ति। पाणिनीयव्याकरणं पञ्चाङ्गमिति कथ्यते। तानि च पंचांगानि सन्ति – सूत्रपाठ – धातुपाठ – गणपाठ – उणादिसूत्रपाठ

– लिंगानुशासनम् चेति। केचित्खलु उणादिसूत्रपाठस्थाने परिभाषापाठं समावेशयन्ति। पाणिनीयव्याकरणस्य पूर्णता, रहस्यज्ञानञ्च कात्यायनकृत–वार्त्तिकेन, पतंजलिकृतभाष्येण च भवतीति। अतः पाणिनीयव्याकरणं त्रिमुनिव्याकरणमित्यपि कथ्यते।

पाणिनीयव्याकरणे सत्स्वप्यनेकाङ्गेषु तत्रांगान्तराणां तदर्थत्वात् सूत्रपाठः सर्वप्रधानं विद्यते। वार्त्तिकस्य, महाभाष्यस्य चाधारः सूत्रपाठ एवेति। सूत्रपाठस्य च संग्रहः अष्टाध्याय्यां वर्त्तते। अष्टाध्याय्यां हि अष्टौ अध्यायाः सन्ति तथा प्रत्येकेष्वध्यायेषु चत्वारश्चत्वारः पादाः विराजन्ते। तत्र प्रत्येकस्मिन् पादे यथासंख्यकानि सूत्राणि सन्ति। एवं हि द्वात्रिंशत्पादात्मके ग्रन्थेऽस्मिन् अष्टौ अध्यायाः सन्तीति ग्रन्थोऽयमष्टाध्यायीति कथ्यते।

एतस्याः रचनाशैलीं वीक्ष्य भगवत्पतञ्जलिः स्वकीयमुद्गारं निम्नलिखितशब्देषु प्रकटयति। तद्यथा–[(2)] 'प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयतिस्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण' इति। अपि च–[(3)] 'सामर्थ्ययोगान्नहि किंचिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यादि'ति। वामनजयादित्यौ हि काशिकायां महर्षिपाणिनेः सूत्रशैलीविषये स्वकीयमुद्गारं प्रकटयति। तद्यथा–[(4)] 'महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्ये'ति।

पाणिनीयाष्टाध्याय्याः सम्बन्धे श्रूयते यत् प्रो. मोनियर विलियम्स, प्रो. मैक्समूलरप्रभृतयः पाश्चात्त्य–विद्वांसः स्वकीयमुद्गारं प्रकटयन्तः कथितवन्तः यदियमष्टाध्यायी मानवीयमस्तिष्कस्य सर्वोत्कृष्टा रचना अस्तीति।

अत्राष्टाध्याय्यां सूत्राणां कति संख्या, कीदृशं वर्गीकरणं, कश्चात्र विषयः प्रतिपादितोऽस्तीति एतेषां समेषां विवरणमिह **सङ्क्षेपेण** प्रस्तूयते–

पाणिनीयसूत्राणां संख्या–

ननु पाणिनीयाष्टके सूत्राणां सङ्ख्याविषये मतभेदो दृश्यते। तत्र विभिन्नेषु ग्रन्थेषु भिन्नाः भिन्नाः संख्याः स्वीकृताः सन्ति। पाणिनीयसूत्राणां

संख्याविषये विभिन्नग्रन्थानामवलोकनेन याः याः संख्याः समक्षमागतास्तासां सर्वासां संक्षेपेण विवरणमत्र प्रस्तूयते–

1. श्रीगोपालशास्त्री 'दर्शनकेशरी' द्वारा संगृहीतस्य ऋजुपाणिनीयमिति ग्रन्थस्यारम्भे टिप्पण्यां स्वरसिद्धान्तचन्द्रिकाया एको निम्नलिखितः श्लोक उद्धृतो विद्यते। तद्यथा–(5)

   'चतुःसहस्रीसूत्राणां पंचसूत्रविवर्जिता।
   अष्टाध्यायी पाणिनीया सूत्रैर्माहेश्वरैः सह।।' इति।

   एतदनुसारेण चतुर्दशमाहेश्वरसूत्रैः सहाष्टाध्याय्यां सूत्राणां संख्या– 3995 इति भवति।

2. श्रीकाशीसंस्कृतग्रन्थमाला– 37 इत्यन्तर्गते चौखम्बा संस्कृत सीरीज ऑफिस वाराणसीतः 1969 तमे वर्षे प्रकाशितायाः काशिकायाः प्रथमभागस्य प्रस्तावनायामेको निम्नलिखितः श्लोकः उद्धृतो विद्यते। तद्यथा–(6)

   'त्रीणि सूत्रसहस्राणि तथा नवशतानि च।
   षण्णवतिं सूत्राणां पाणिनिः कृतवान् स्वयम्।।' इति।

   एतदनुसारेण एषा संख्या– 3996 इति भवति।

3. उपर्युक्त काशिकायाः प्रस्तावनायामेव सम्पादकेन डॉ.श्रीनारायणमिश्र महाभागकृत–संकलनेन काशिकानुसारेण एषा संख्या– 3983 इति भवति।
4. वैयाकरणसिद्धान्तकौमुद्यनुसारेण चैषा संख्या– 3976 इति भवति।
5. पाणिनीयव्याकरणतत्त्वप्रदीपे पं.दीनबन्धुझामहोदयेन 'अष्टाध्यायीसूत्रसंख्या'(7) इति शीर्षके लघुनिबन्धे एषा संख्या– 3883/3983 इत्युक्ता।
6. म.म. पण्डितराज डॉ. गोपालशास्त्री 'दर्शनकेशरी' महोदयेन सम्पादिताष्टाध्याय्यनुसारेण एषा संख्या– 3983 इति भवति(8)।
7. दिल्लीस्थित गुरुकुलवृन्दावनस्नातक शोधसंस्थानान्तर्गतादित्यप्रकाश आर्य आदित्यपीठेन प्रकाशिताष्टाध्यायी–पाठानुसारेण एषा संख्या– 3973 इति भवति(9)।

8. संस्कृतग्रन्थागार, दिल्ली नामकेन प्रकाशकेन ईश्वरचन्द्रस्य सम्पादकत्वे प्रकाशिते पाणिनीयशब्दानुशासनमिति नामकेऽष्टाध्यायीसूत्रपाठात्मके ग्रन्थे इयं संख्या– 3965 एव भवति[10]।
9. डॉ.जयशंकरलालत्रिपाठी, डॉ.सुधाकरमालवीयः, एतदुभाभ्यां सम्पादितायाः काशिकायाः प्रथमे भागे उभाभ्यां लिखिते सम्पादकीये एषा संख्या– 3997 इत्युक्ता[11]।
10. पुनश्च उपर्युक्त काशिकाया एव डॉ.जयशंकरलालत्रिपाठिना लिखितायां भूमिकायामेषा संख्या काशिकानुसारेण– 3992 इत्युक्ता[12]।
11. कामेश्वरसिंह–दरभंगा संस्कृत–विश्वविद्यालयद्वारा प्रकाशितायां प्रो. सुरेश्वरझामहाभागेन रचितायाम् अष्टाध्यायीसूत्रार्थप्रकाशिकायां सूत्राणां संख्या– 3972 इति स्वीकृता अस्ति[13]।

इत्थं ह्यष्टाध्यायीसूत्राणां याः याः संख्याः समक्षमागतास्ताः एवं सन्ति– 3965, 3972, 3973, 3976, 3983, 3995, 3996, 3997 इति। एतादृशमतभेदस्य यानि कारणानि समक्षमागतानि तानीमानि सन्ति–

1. केषांचिन्मतानुसारेण माहेश्वरसूत्राण्यपि पाणिनीयान्येव सन्ति।
2. अपरेषां मतानुसारेण माहेश्वरसूत्रैः सह 'अथ शब्दानुशासनमि'ति[14] महाभाष्ये प्रयुक्तं प्रारम्भवाक्यमपि पाणिनेरेवेति।
3. कतिपयानि एतादृशान्यपि वचनानि श्रूयन्ते यानि केचित् पाणिनेः सूत्राणि मन्यन्ते, केचिच्च वार्तिककारस्य वार्तिकानीति। यथा षष्ठाध्यायस्य प्रथमे पादे 'ये च तद्धितः'[15] इति सूत्रानन्तरं पठितम् 'अचि शीर्षः[16] इति सूत्रविषये कैयटेनोक्तम्–[17] 'अचि शीर्षः इति वार्तिकं दृष्ट्वा सूत्रेषु कैश्चित्प्रक्षिप्तमि'ति। एवमेव षष्ठाध्याये एव 'नाम्रेडितान्त्यस्य तु वा'[18] इति सूत्रानन्तरं पठितस्य 'नित्यमाम्रेडिते डाचि'[19] इति वचनस्य विषये, 'सुट्कात्पूर्वः'[20] इति सूत्रानन्तरं पठितस्य 'अड्व्यवायेऽपि'[21] इति वचनस्य च विषयेऽपि एतादृश्येव स्थितिर्विद्यते। केषांचिन्मतानुसारेण एतद्वचनद्वयं पाणिनेः सूत्ररूपे विद्यतेऽन्येषां च मतानुसारेण तु कात्यायनस्य वार्तिकरूपे इति।
4. कानिचिदेतादृशान्यपि सूत्राणि सन्ति येषां विषये मतभेदो विद्यते यत् सूत्रद्वयम्, एकमेव वा सूत्रम्। तद्यथा– 'उञः' (1.1.17) इति सूत्रविषये केचिदत्र सूत्रद्वयं स्वीकुर्वन्ति, केचिच्चैकमेव। ईश्वरचन्द्रेण सम्पादिते

पाणिनीयशब्दानुशासने 'उञ ऊँ'[22] इत्येकमेव सूत्रं स्वीकृतम्। गुरुकुलवृन्दावनेन प्रकाशिते अष्टाध्यायी–सूत्रपाठे, अन्येषु च वैयाकरणसिद्धान्तकौमुद्यादिषु ग्रन्थेषु अत्र सूत्रद्वयं स्वीकृतम्। एषैव स्थितिः 'प्रादयः, उपसर्गाः क्रियायोगे (1.4.58–59), विभाषाऽपपरि–बहिरंचवः, पंचम्या (2.1.11–12), संज्ञायाम्, कुलालादिभ्यो वुञ् (4.3.117–118), ह्वः सम्प्रसारणम्, अभ्यस्तस्य (6.1.32–33), दीर्घात्, पदान्ताद्वा (6.1.74–75), औत्, अच्च घेः (7.3. 118–119), अनितेः, अन्तः' (8.4.19–20) इति सूत्रयुग्मविषयेऽपि दृश्यते।

अतः पाणिनीयव्याकरणे सूत्रसंख्याविषयको मतभेदोऽद्यापि अनिर्णीत एवास्ति। अस्तु तावद्! एतद् निर्विवादरूपेण कथयितुं शक्यते यत् पाणिनीयव्याकरणे सूत्राणां संख्या चतुःसहस्रन्यूना पंचषष्ट्यधिक–नवशतोत्तरसहस्रत्रयादधिका (3965–3997) विद्यते।

पाणिनीयसूत्राणां वर्गीकरणम्–

पाणिनीयाष्टकसूत्राणां वर्गीकरणविषये निम्नलिखितः श्लोकः प्रसिद्धोऽस्ति–

'संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।।'

इति श्लोकानुसारेण सूत्राणां निम्नलिखिताः षड्वर्गाः भवन्ति–

1. संज्ञासूत्राणि।
2. परिभाषासूत्राणि।
3. विधिसूत्राणि।
4. नियमसूत्राणि।
5. अतिदेशसूत्राणि।
6. अधिकारसूत्राणि च।

उपर्युक्त एव श्लोकः किंचित्पाठान्तरेण एवमपि पठितो दृश्यते–[23]

'संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च निषेधः सूत्रसप्तकम्।।' इति।

उपर्युक्तश्लोकानुसारेण पाणिनीयसूत्राणामेकः सप्तमोऽपि वर्गो निष्पद्यते, यत्र निषेधसूत्राणि आयान्ति।

नागेशेनापि निषेधसूत्राणामेकः पृथग्वर्गः स्वीकृतः। अत एव परिभाषेन्दुशेखरस्य यथोद्देशपरिभाषाया व्याख्यानक्रमे तेन स्पष्टीकृतं यद् भाष्यकारेण 'क्ङिति च' (1.1.5) इति निषेधसूत्रविषयेऽपि 'कार्यकालं संज्ञापरिभाषम्'(24) इति परिभाषायाः संचारः कृतः तन्निषेधसूत्रे परिभाषासादृश्येन परिभाषात्वारोपात्। तथा ह्युक्तं तत्र नागेशेन–(25) 'निषेधवाक्यानामपि निषेध्यविशेषाका**ङ्क्षि**त्वाद्विध्येक– वाक्यतयैवान्वय इति परिभाषासादृश्यात् परिभाषात्वेन व्यवहारः 'क्ङिति च' (1.1.5) इति सूत्रे भाष्ये' इति।

यथोद्देशकार्यकालेतिपक्षद्वयस्य संज्ञापरिभाषामात्रविषयकत्वेऽपि 'क्ङिति च' (1.1.5) इत्यत्र भाष्ये कार्यकालपक्षोपन्यासेन निषेधवाक्येष्वपि परिभाषात्वमारोप्यते इति नागेशस्याशयो विद्यते।

एवं हि 'क्ङिति च' (1.1.5) इत्यत्रत्यं भाष्यम्–(26) 'अथवा कार्यकालं संज्ञापरिभाषम्। यत्र कार्यं तत्र द्रष्टव्यम् पुगन्तलघूपधस्य गुणो भवति' इत्युपस्थितमिदं भवति– 'क्ङिति च' इति।

पाणिनीयव्याकरणतत्त्वप्रदीपेऽपि प्रतिषेधस्यापि एको वर्गः स्वीकृतोऽस्ति। तत्रोद्धृतः श्लोको निम्नलिखितो विद्यते–(27)

'संज्ञा च परिभाषा च विधिनियम एव च।
प्रतिषेधोऽधिकारश्च षड्विधं सूत्रलक्षणम्।।' इति।

श्लोकेऽस्मिन् अतिदेशस्य स्थाने प्रतिषेधस्य पाठो दृश्यते। अत्रापि स्पष्टमेव प्रतिषेधस्यैको वर्गः स्वीकृतोऽस्ति।

यद्यपि सूत्राणां प्रकारान्तरेणापि वर्गीकरणं कर्तुं शक्यते। तद्यथा– सामान्यसूत्राणि विशेषसूत्राणि च। तथाहि पस्पशाह्निके भाष्येऽप्युक्तम्–(28) 'कथं तर्हीमे शब्दाः प्रतिपत्तव्याः? किंचित्सामान्यविशेषवल्लक्षणं प्रवर्त्त्यम्। येनाल्पेन महतो महतः शब्दौघान् प्रतिपद्येरन्। किं पुनस्तत्? उत्सर्गापवादौ। कश्चिदुत्सर्गः कर्त्तव्यः कश्चिदपवाद' इति।

पुनश्च लौकिकवैदिकशब्दसिद्धिदृष्ट्यापि पाणिनीयाष्टकसूत्राणां वर्गीकरणं कर्तुं शक्यते। एतदनुसारेण सूत्राणां निम्नलिखिता वर्गा भविष्यन्ति–

1. लौकिकशब्दसाधकानि सूत्राणि।
2. वैदिकशब्दसाधकानि सूत्राणि।
3. लौकिकवैदिकोभयविधशब्दसाधकानि सूत्राणि।

लौकिकशब्दसाधकानि सूत्राणि पृथक्कृत्य आचार्यपुरुषोत्तमदेवस्य भाषावृत्तिनामको ग्रन्थः, वैदिकशब्दसाधकानि सूत्राणि पृथक्कृत्य वैयाकरणसिद्धान्तकौमुद्याः स्वरवैदिकीप्रक्रियाभागोऽपि विद्यते। वैयाकरणसिद्धान्तकौमुद्या एव स्वरवैदिकीभागतः अवशिष्टा अधिकतरभागाः लौकिकवैदिकोभयविध– शब्दसाधकानां सूत्राणां व्याख्यानात्मकाः सन्त्येव।

एवं हि विविधप्रकारेण सूत्राणां वर्गीकरणं सम्भवति। तथापि 'संज्ञा च परिभाषा चे'ति प्रसिद्धश्लोकानुसारेणैव पाणिनीयसूत्राणां वर्गीकरणं प्रमुखतया गृह्यते। अतएव नागेशेन–[(29)] 'अइउण्' इत्यादि–माहेश्वरसूत्राणां कस्मिन् वर्गे समावेश इति जिज्ञासायाः शान्तये **उक्तं** –[(30)] 'एषां क्रमबोधकत्वेऽप्यादिरन्त्येनेत्यनेनैकवाक्यतया वृत्तिपरिच्छेदकत्वेन संज्ञासूत्रत्वमि**त्युक्तम् इति।**

एवमेव म.म. पण्डितराज डॉ.श्रीगोपालशास्त्री दर्शनकेशरी महाभागेनापि ऋजुपाणिनीयमिति ग्रन्थस्य प्रस्तावनायां 'सूत्रों के प्रकारभेद' इति शीर्षके निबन्धे संज्ञादिवर्गा एव आदृताः। अतोऽत्रापि पाणिनीयाष्टकसूत्राणां निषेधवर्गेण सह सप्तवर्गान् स्वीकृत्य तेषां संक्षेपेणेह विवरणं प्रस्तूयते। तत्र निषेधवर्गेण सह सूत्राणां निम्नलिखिताः सप्त वर्गा भवन्ति–

1. संज्ञासूत्रम्
2. परिभाषासूत्रम्
3. विधिसूत्रम्
4. नियमसूत्रम्
5. अतिदेशसूत्रम्
6. अधिकारसूत्रम्

7. निषेधसूत्रञ्चेति।

अष्टाध्याय्याः विषयाणां विभागः–

व्याकरणशास्त्रसम्बन्धी प्रक्रियायाः विचारेण अष्टाध्याय्याः त्रयो विभागाः कर्तुं शक्यन्ते। तत्र डॉ.गोपालशास्त्री दर्शनकेशरी द्वारा संगृहीतम् ऋजुपाणिनीयमिति ग्रन्थस्यामुखे एवं प्रकारेण विषयाणां विभागः कृतो दृश्यते। तद्यथा–

1. वाक्येभ्यः पदानां संकलनम्– (1–2 अध्यायौ)।
2. पदानां प्रकृतिप्रत्ययविभागः– (3–5 अध्यायाः)।
3. प्रकृतिप्रत्ययैः सह आदेशस्य आगमस्य च संयोजनं कृत्वा परनिष्ठितपदानां निष्पत्तिः– (6–8 अध्यायाः)।

एतदनुसारेण प्रथमाध्याये संज्ञासूत्राणां समावेशो विद्यते। द्वितीयाध्याये पादद्वयं यावत् समाससूत्राणि, तृतीये पादे कारकविभक्तिसूत्राणि, चतुर्थे पादे चैकवद्भाव–नपुंसकविधि–अन्वादेश– धात्वादेश–लुग्विधानादिविषयाः वर्णिताः सन्ति। तृतीयाध्याये तिङ्–कृत्प्रत्ययानां समावेशोऽस्ति। चतुर्थे पंचमे चाध्याये तद्धित–स्त्री–समासान्त–प्रत्ययानां विवरणं प्रदत्तमस्ति। षष्ठाध्याये तिङन्तानां, सन्धीनां स्वराणाञ्च सम्बद्धाः नियमाः कथितास्सन्ति। सप्तमोऽध्यायः (सुबन्तः तिङन्तश्च) अंङ्गाधिकारनाम्ना प्रख्यातोऽस्ति। अन्तिमे चाष्टमेऽध्याये द्वित्वविधान–स्वरवैदिकीप्रक्रिया–सन्धिप्रकरण–षत्व–णत्वादिविधायकसूत्राणां समावेशः कृतोऽस्ति। तद्यथा–[31]

'संज्ञासूत्रचयं चकारप्रथमेऽध्याये द्वितीये पुरः,
संक्षेपात् समाससूत्रनिवहं पश्चाद् विभक्त्येकवत्।
धातोः प्रत्ययमादधान्मुनिवरोऽध्याये तृतीये समं,
तुर्ये पंचमके च प्रत्ययविधिं शब्दाद् व्यधात् षष्ठके।।
द्वित्वं सांहितसौवरालुकमपि द्विष्ठं **तथाङ्गं** विधिम्।
षष्ठात् सप्तमगं पदाधिकृतिमष्टमान्ते त्रिपादीविधिम्।।' इति।

पुनश्च ऋजुपाणिनीये एव परिशिष्टभागे 'सूत्राधिकारश्लोकाः' इति शीर्षकान्तर्गते निम्नाङ्कितेषु श्लोकेषु अष्टाध्याय्याः विषयाणामित्थं विभाजनं कृतमस्ति–[32]

'संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च निषेधश्चेति सप्तकम्।।
संज्ञा च परिभाषाश्चाद्यद्वितीयांघ्रिगाः पुरः।
इत्सूत्राणि तृतीयांघ्रौ तङ् परस्मैपदानि च।।
तुर्यांघ्रौ कारकं ज्ञेयं द्वितीयाध्यायगोचरः।
समासश्च विभक्त्यर्थः पुरः पादत्रयावधिः।।
चतुर्थ एकवद्भावो धात्वादेशस्ततोऽथ लुक्।
तृतीये धातुविहिताः प्रत्ययास्तद्विकारिणः।।
तुर्ये पंचमके चैव शब्दतश्च समासगाः।
षष्ठे प्रकृतिकार्याणि सन्धयः सौवरो विधिः।।
तृतीयांघ्रावलुग् ज्ञेयः पूर्वप्रकृतिविकृतिः।
सोऽङ्गाधिकारः षष्ठान्तात् सप्तमान्तं प्रयाति वै।।
सप्तमे प्रत्ययस्थानि द्विष्ठानि च ततः परम्।
अष्टमे परद्वित्वं प्राक् ततो वै वस्नसादयः।।
पदस्याधिकृतिः पूर्वं संहिताधिकृतिस्तथा।
पूर्वत्र यान्यसिद्धानि त्रिपाद्यां तान्यवेशयेत्।।' इति।

सूत्राणामध्यायानुसारेण विषयविभागः–

डॉ.श्रीगोपालशास्त्री दर्शनकेशरी महाशयेन प्रस्तुतानामुपर्युक्तश्लोकानुसारेण अष्टाध्याय्याः विषयविभागः एवंप्रकारेण निश्चीयते–

अध्यायः	**पादः**		**विषयः**
प्रथमाध्यायः–	1–2	पादौ–	संज्ञा परिभाषा च।
प्रथमाध्यायः–	03	पादः–	इत्संज्ञा, आत्मनेपदम्, परस्मैपदम्।

प्रथमाध्यायः— 04 पादः— कारकम्।

द्वितीयाध्यायः— 1—3 पादाः— समासः विभक्त्यर्थश्च।

द्वितीयाध्यायः— 04 पादः— एकवद्भावः, धात्वादेशः लुक् च।

तृतीयाध्यायः— 1—4 पादाः— धातुभिः विधीयमानाः प्रत्ययाः।

चतुर्थपंचमौ— 1—4 पादाः— प्रातिपदिकैः विधीयमानाः सुप्—स्त्री—समासान्तसहिताः

तद्धितप्रत्ययाः।

षष्ठाध्यायः— 01 पादः— षाष्ठद्वित्वप्रकरणं, प्रकृतिकार्यं सन्धयश्च।

षष्ठाध्यायः— 02 पादः— स्वरविधानम्।

षष्ठाध्यायः— 03 पादः— उत्तरपदाधिकारः।

षष्ठाध्यायः— 04 पादः— अङ्गाधिकारः।

सप्तमाध्यायः— 01 पादः— प्रत्ययेषु भाव्यमानाः आगमसहितविकाराः।

सप्तमाध्यायः— 02 पादः— निषेधः, सिचि परे वृद्धिः, इडागमः, युष्मदस्मद् सम्बन्धी

आदेशश्च।

सप्तमाध्यायः— 3—4 पादौ— वृद्धिप्रकरणं कृत्वप्रभृतयश्च।

अष्टमाध्यायः— 01 पादः— आष्टमिकद्वित्वप्रकरणं, पदविकारः अनुदात्तविधिश्च।

अष्टमाध्यायः— 02 पादः— मतोर्वः, लत्वविधिः, लोपविधिः, झलि परे पदान्ते जायमानो

विकारः—निष्ठाविकारः—कुत्व —रुत्व—प्लुतोदात्तश्च।

अष्टमाध्यायः— 03 पादः— रुविधिः, विसर्जनीयः षत्वविधिश्च।

अष्टमाध्यायः— 04 पादः— णत्वविधिः, सन्धिः (श्चुत्वं—ष्टुत्वमित्यादि)।

सूत्राणां प्रकरणानुसारेण विषयविभागः—

विषयानुसारेण अष्टाध्याय्याः निम्नांकितप्रकारेणापि प्रकरणेषु विभागः प्रदर्शितः गुरुवरैः आचार्य सुरेश्वरझा महाभागैः, 'अष्टाध्यायी के विषयविभाग' इति शीर्षके निबन्धे। तदेवम्—[33]

1. संज्ञा—परिभाषाप्रकरणे— प्रथमाध्यायस्य (1—2 पादौ)।
2. एकशेषप्रकरणम्— सरूपाणामेकशेष एकविभक्तौ (1. 2.64—1.2.73)।
3. आत्मनेपदप्रकरणम्— अनुदात्तङित आत्मनेपदम् (1. 3.12—1.3.77)।
4. परस्मैपदप्रकरणम्— शेषात्कर्तरि परस्मैपदम् (1. 3.78—1.3.93)।
5. कारकप्रकरणम्— कारके (1. 4.23—1.4.55)।

6. निपातप्रकरणम्– प्राग्रीश्वरान्निपाताः (1.
4.56–1.4.98) ।

7. समासप्रकरणम्– प्राक्कडारात्समासः (2.
1.3–2.2.38) ।

8. विभक्त्यर्थप्रकरणम्– अनभिहिते (2.
3.1–2.3.73) ।

9. प्रत्ययप्रकरणम्– प्रत्ययः (3.
1.1–5.4.60) ।

10. सनादिप्रकरणम्– गुप्तिज्किद्भ्यः सन् (3.
1.5–3.1.32) ।

11. विकरणः– स्यतासी लृलुटोः (3.
1.33–3.1.86) ।

12. कृत्प्रकरणम्– कृदतिङ् (3.
1.93–3.4.76) ।

13. कृत्यप्रकरणम्– कृत्याः (3.
1.95–3.1.132) ।

14. लादेशप्रकरणम्– लस्य (3.
4.77–3.4.117) ।

15. प्रातिपदिकाधिकारः– ङ्याप्प्रातिपदिकात् (4.
1.1–5.4.60) ।

16. स्त्रीप्रत्ययप्रकरणम्– स्त्रियाम् (4.
1.3–4.1.81) ।

17. तद्धितप्रकरणम्– तद्धिताः (4.
1.76–5.4.160) ।

18. समासान्तप्रकरणम्– समासान्ताः (5.
4.68–5.4.160) |

19. षाष्ठद्वित्वप्रकरणम्– एकाचो द्वे प्रथमस्य (6.
1.1–6.1.12) |

20. सम्प्रसारणप्रकरणम्– ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे (6.
1.13–6.1.34) |

21. सन्धिप्रकरणम्– संहितायाम् (6.
1.72–6.1.157) |

22. स्वरप्रकरणम्– अनुदात्तं पदमेकवर्जम् (6.
1.158–6.2.199) |

23. अलुक्समासप्रकरणम्– अलुगुत्तरपदे (6.
3.1–6.3.24) |

24. उत्तरपदप्रकरणम्– अलुगुत्तरपदे (6.
3.1–6.3.139) |

25. अङ्गाधिकारप्रकरणम्– अङ्गस्य (6.
4.1–7.4.97) |

26. द्विरुक्तप्रकरणम्– सर्वस्य द्वे (8.
1.1–8.1.15) |

27. पदाधिकारप्रकरणम्– पदस्य (8.
1.16–8.4.54) |

28. पूर्वत्रासिद्धाधिकारः– पूर्वत्रासिद्धम् (8.
2.1–8.4.68) |

29. रुत्वप्रकरणम्– मतुवसो रु सम्बुद्धौ छन्दसि (8.
3.1–8.3.12) |

30. मूर्धन्यप्रकरणम्– अपदान्तस्य मूर्धन्यः (8.3.55–8.3.119)।

31. णत्वप्रकरणम्– रषाभ्यां नो णः समानपदे (8.4.1–8.4.39)।

32. श्चुत्वादिप्रकरणम्– स्तोः श्चुना श्चुः (8.4.40–8.4.68)।

निष्कर्षः–

एवं हि पाणिनीयसूत्राणां संख्याविषये, वर्गीकरणविषये, अष्टाध्याय्याः विषयाणां विभागविषये, सूत्राणामध्यायानुसारेण विषयाणां विभागविषये प्रकरणानुसारेण विभागविषये च समीक्षा समुपस्थापिता। तत्र सूत्राणां संख्याविषये यानि मतभिन्नानि प्रस्तुतानि तेषु आचार्यपादानां प्रो. सुरेश्वरझामहाभागानां मतं समीचीनं प्रतीयते। तत्रैतेषां महाभागानां मतमस्ति यत् काशिकायाः– 3983 सूत्रेषु 'वृद्धश्च पूजायाम् (4.1.166), यूनश्च कुत्सायाम् (4.1.167), कौपिञ्जलहस्तिपदादण् (4.3.132), आथर्वणिकस्येकलोपश्च (4.1.133), अचि शीर्षः (6.1.62), नित्यमाम्रेडिते डाचि (6.1.100) तथा अडभ्यासव्यवायेऽपि' (6.1.136) एतानि सप्तसूत्राणि महाभाष्य–प्रदीप–पदमंजर्याधारोपरि वैयाकरणसिद्धान्तकारोऽपि वार्त्तिकरूपे पठितवान्। अतः वैयाकरणसिद्धान्तकौमुद्यां सूत्राणां सम्पूर्णा संख्या– 3976 एव भवति।

अष्टाध्यायीसूत्रार्थप्रकाशिकायामुपर्युक्तानि सप्तसूत्राण्यतिरिच्य काशिकावृत्तौ वैयाकरणसिद्धान्तकौमुद्यांञ्च सूत्ररूपे पठितं 'कारस्करो वृक्षः' (6.1.156) इति वचनं 'पारस्करप्रभृतीनि च' (6.1.153) इति सूत्रानुसारेण पारस्करादिगणान्तर्गते 'एति संज्ञायामगात् (8.3.99), नक्षत्राद्वा' (8.3.100) इमे द्वे वचने 'सुषामादिषु च' (8.3.98) इति सूत्रानुसारं सुषामादिगणान्तर्गतत्वेन पठितत्वाद् 'आत्मनश्च पूरणे' (6.3.6) वचनमिदं च महाभाष्ये वार्त्तिकरूपे पठितत्वाद् अष्टाध्यायीसूत्रार्थप्रकाशिकायामिमानि चत्वारि वचनान्यपि सूत्ररूपेण न स्वीकृतानि। एवं हि उपर्युक्तानि एकादशवचनानि सूत्ररूपे न स्वीकृतत्वादष्टाध्यायीसूत्रार्थप्रकाशिकायां सूत्राणां सम्पूर्णा संख्या– 3972 एव भवति।

सन्दर्भाः–

01. सिद्धान्तशिरोमणिः (गोलप्रशंसाध्यायः)– 8

02. महाभाष्यम्– 1.1.1

03. महाभाष्यम्– 6.1.77

04. काशिका– 4.2.74

05. स्वरसिद्धान्तचन्द्रिका– 15

06. काशिका (प्रथमो भागः)– प्रस्तावनायाम्

07. पाणिनीयव्याकरणतत्त्वप्रदीपः (का.सिं.द.सं.वि.वि.दरभंगा), पृ.– 2

08. अतिदेशसमीक्षा (का.सिं.द.सं.वि.वि.दरभंगा)– प्रथमः परिच्छेदः, पृ.– 2

09. अतिदेशसमीक्षा (का.सिं.द.सं.वि.वि.दरभंगा)– प्रथमः परिच्छेदः, पृ.– 2

10. पाणिनीयशब्दानुशासनम् – ईश्वरचन्द्र संस्कृतग्रन्थागार– 46, ई.– 1999

11. काशिका (तारा प्रिंटिंग वर्क्स, कमच्छा, वाराणसी, ई.– 1986)– सम्पादकीयम्

12. काशिका (तारा प्रिंटिंग वर्क्स, कमच्छा, वाराणसी, ई.– 1986)– भूमिका

13. अष्टाध्यायीसूत्रार्थप्रकाशिका (का.सिं.द.सं.वि.वि.दरभंगा)

14. महाभाष्यम्– आदौ

15. अष्टाध्यायी– 6.1.61

16. अष्टाध्यायी– 6.1.62

17. महाभाष्यम् (प्रदीपः)– 6.1.62

18. अष्टाध्यायी– 6.1.98

19. अष्टाध्यायी– 6.1.99

20. अष्टाध्यायी– 6.1.133

21. अष्टाध्यायी– 6.1.134

22. पाणिनीयशब्दानुशासनम्– 1.1.17
23. ऋजुपाणिनीयम् (पाणिनिपद्धतिमाहात्म्यम्)– 24
24. परिभाषेन्दुशेखरः– 3
25. परिभाषेन्दुशेखरः– 3
26. महाभाष्यम्– 1.1.5
27. पाणिनीयव्याकरणतत्त्वप्रदीपः (का.सिं.द.सं.वि.वि.दरभंगा) पृ.– 51
28. महाभाष्यम्– पस्पशाह्निकम्
29. अष्टाध्यायी– (माहेश्वरसूत्रम्)– 1
30. लघुशब्देन्दुशेखरः– संज्ञाप्रकरणम्
31. ऋजुपाणिनीयम्– आमुखे
32. ऋजुपाणिनीयम्– परिशिष्टे
33. डॉ. जगन्नाथ झा सारस्वताभिनन्दनग्रन्थ, प्रधान सम्पादक– डॉ. इन्द्रनाथ झा, सेवानिवृत्त अध्यक्ष, भीमराव अम्बेदकर बिहार विश्वविद्यालय, मुजफ्फरपुर, (बिहार), प्रकाशक– सत्यम् पब्लिशिंग हॉउस N–3/25 मोहन गार्डन, नई दिल्ली– 110059, पृष्ठ संख्या– 226–230

मार्कण्डेयपुराणे गान्धर्वसङ्गीतविद्या- एकमध्ययनम्

Pratyusha Ghosh
Purbasthali College, Dept of Sanskrit, West Bengal

शास्त्रज्ञैरुक्तं समग्रं जगदिदम् एकेन अव्यक्तेन मधुरध्वनिना परिपूर्णमस्ति । मानवसभ्यतायाः इतिहासानुसन्धानं क्रियते चेत् ज्ञायते यत् मानवमुखे यदा भाषाया आविर्भावः नाभवत् तदा तस्य कण्ठे जागरितमासीत् सङ्गीतम् । सङ्गीतस्य माहात्म्यं वर्णयता शार्ङ्गदेवेनोक्तम्-

"गीतेन प्रियते देवः सर्वज्ञः पार्वतीपतिः ।
गोपीपतिरनन्तोऽपि वंशध्वनिवशंगतः।।"[51] (१/२६)

प्राचीनशास्त्राध्ययनकाले एतद् द्रष्टुं शक्यते यत् शैलीभेदेन प्राचीनभारतीयसङ्गीतस्य भेदद्वयमासीत्- गान्धर्वं देशीयश्च । नामकरणेन अनुमीयते यद् गान्धर्वसङ्गीतेन सह धर्मभावो धर्मचर्चा च विजडिताऽऽसीत् । नगरस्य आध्यात्मिकचर्चाकेन्द्रेषु सङ्गीतमिदं गीयते स्म । अस्य विकाशः परिशीलनं तु गान्धर्वैः परिचालितमासीत् । गन्धर्वैः परिवेषितं सङ्गीतमतः गान्धर्वसङ्गीतम् । सङ्गीतमिदं न केवलम् अभिजातमपि तु विज्ञानभित्तिकमपि आसीत् । अस्य भाषा आसीत् संस्कृतम्, अतः सर्वसाधारणानां कृते एतद् बोधगम्यं नासीत् । सर्वेषां कृते आसीत् देशीयसङ्गीतम् । शार्ङ्गदेवेन वर्तमाने गान्धर्वसङ्गीतस्य किमपि अस्तित्वं नास्तीति उक्तम् । परन्तु तस्य सङ्गीतविषयकाः वैज्ञानिकविधयः अधुनापि विद्यमानाः सन्ति । देशकालानां व्यवधानेन ते तिरोहिता न भवन्ति । । प्रबन्धेऽस्मिन् अष्टादशमहापुराणेषु मार्कण्डेयपुराणे वर्णितं गान्धर्वसङ्गीतम् आलोचितव्यम् ।

गान्धर्वसङ्गीतमिति नाम्ना ज्ञायते यद् एतद् सङ्गीतं गन्धर्वाणां मध्ये प्रचलितमासीत् `गन्धर्व` इत्यनेन सह अण्-प्रत्ययनिष्पन्नः शब्दो गान्धर्वः। गन्धर्वैः परिवेषितं सङ्गीतमतः गान्धर्वसङ्गीतम् । अत्र प्रश्नः भवितुं शक्यते यद् गन्धर्वाः के ?

ऋग्वेदे `गन्धर्व` इति शब्दस्य व्यवहारो बहुत्र दृश्यते । तन्मध्ये शब्दोऽयं एकवचने व्यवहृतः सप्तदशवारम् । अनुमान एषोऽस्ति यद् गन्धर्वः प्रथमतः एककदेवतारूपेण परिचित आसीत् । अनन्तरं तेन आर्यदेवतामण्डलेषु स्थानं प्राप्तम् । परिवर्तनमिदं कालं व्यप्य संघटितम्

[51] *शार्ङ्गदेवप्रणीतं सङ्गीत-रत्नाकर*, ड. प्रदीपकुमार घोषः ।

। वेदेषु वायुकेशादि शब्दाः गन्धर्वाणां विशेषणरूपेण व्यवहृताः सन्ति । गन्धर्वा आसन् अन्तरीक्षचारिणः।[52]

रामायणे महाभारते च गन्धर्वस्य गान्धर्वस्य च शब्दस्य प्रयोगः बहुवारं परिलक्ष्यते । तत्र ते सङ्गीतविद्यापारदर्शिरूपेण परिचिताः। तेषां नामानि यथा चित्रसेनः, विश्वावसुः, हाहा, हुहु आदि । ते नृत्यकुशला अपि आसन् । मार्कण्डेयपुराणे उक्तं यद्- "प्रगीतगान्धर्वगणाः प्रनृत्याप्सरसाङ्गणाः"[53] श्लोके गन्धर्वा अप्सरसश्च नृत्यशिल्पीरूपेण उल्लिखिताः।

शिक्षाकारेण नारदेनोक्तम-

"गेति गेयं विदुः प्राज्ञा धेति कारुप्रवादनम् ।
वेति वाद्यस्य संज्ञेयं गान्धर्वस्य विरोचनमिति ।।"

अत्र 'ग' इति गानम्, 'ध+व' इति कारु, यस्यार्थः वंशध्वनिः बोध्यः। अतः कण्ठसङ्गीतस्य वेणुस्वरस्य च समवेतरूपमेव गान्धर्वम् ।[54] श्रूयते यद् गान्धारनिवासिनः गन्धर्वाः आसन् सङ्गीतस्य आजन्मसाधकाः। ते देवैः यथा समादृता आसन् तथा मनुष्यसमाजेऽपि आसीत्तेषाम् अव्याहतगतिः।[55] गन्धर्वैः प्रवर्तिता त्रौर्यत्रिकविद्या आसीत् गान्धर्वसङ्गीतम् । नाट्यशास्त्रकारेण भरतेनोक्तम्-

"गान्धर्वं त्रिविधं विद्या स्वरतालपदात्मकम् ।
त्रिविधस्यापि बक्ष्यामि लक्षणं चैव कर्मभिः।।"[56]

स्वर-ताल-पदानां समवेतरूपस्य गान्धर्वस्य परिचयः प्रदत्तः भरतेन । तेन स्वरप्रसङ्गे षड्जादि सप्तस्वराणां तथा तेषां अन्तर्वर्ति-सूक्ष्मस्वररूपेण श्रुति, ग्राम, मूर्च्छना, स्थान, साधारण, अष्टादशजातिराग-अलङ्कार, धातु, वर्ण, गीत,वीणा प्रभृतीनां नामोल्लेखः कृतः।

नाट्याचार्येण भरतेन सङ्गीतं पारिभाषिकशब्दरूपेण व्याख्यातं यत्र तेनोक्तं-

"नृत्तं गीतं तथा वाद्यं त्रयं सङ्गीतमुच्यते ।"

---

[52] *प्राचीन संस्कृत नाट्ये सङ्गीत*, कल्पिका मुखोपाध्याय, पृ. 18.

[53] मार्कण्डेयपुराणम्, पञ्चानन तर्करत्नः (सं), दशमोऽध्यायः

[54] सङ्गीत ओ संस्कृति, स्वामी प्रज्ञानानन्दः, उत्तरभागः, पृ. 122.

[55] सङ्गीतशब्दकोश, ड. विमल रायः, पृ. 77.

[56] भारतीय सङ्गीतेर कथा, प्रभात कुमार गोस्वामी, पृ. 12.

गान्धर्वसङ्गीतस्य आङ्गिक-उपादानानि विश्लेषणं क्रियते चेत् दृश्यते यद् अत्र स्वर-ताल-पदानां समावेशोऽस्ति। रामायणे कुशीलवस्य कण्ठे गान्धर्वसङ्गीतं गीतमासीत्। महाभारते नायकः, नर्तकः, वादकः, देवदुन्दुभिः, गाथागानम्, शङ्खम्, वेणुः, मृदङ्गम्, तालः, लयः, मूर्च्छना प्रभृतीनामुल्लेखोऽस्ति।

अष्टादशमहापुराणेषु वायुपुराणे, मार्कण्डेयपुराणे, लिङ्गपुराणे, वृहद्धर्मपुराणे इत्यादिपुराणे गान्धर्वसङ्गीतस्य आलोचनमस्ति । तन्मध्ये मार्कण्डेयपुराणे यद् गान्धर्वसङ्गीतमालोचितं तद् निम्नरूपम्-मार्कण्डेयपुराणं २३७ अध्यायैः विभक्तमस्ति । अस्मिन् पुराणे त्रयोवंशतमेऽध्याये सङ्गीतस्य विशेषपरिचयं प्रदत्तम्। अत्र दृश्यते यद् नागराज अश्वतरः तस्य भ्रात्रा कम्बलेन सह देव्या सरस्वत्या सह च सङ्गीतालोचने अंशग्रहणं कृतवान्। शार्ङ्गदेवेनोक्तम्-

"सामगीतिरतो ब्रह्मा वीणासक्ता सरस्वती।"

नागराजः तपोबलेन सरस्वतीं सन्तुष्टां कृतवान्, भ्रातुः कम्बलस्य कृते सङ्गीतशास्त्रीयज्ञानप्रदानस्य वरं च लब्धवान्। वरप्रदानकाले देव्या उक्तम्-

"सप्तस्वराः ग्रामरागाः सप्त पन्नगसत्तम्।
गीतकानि स सप्तैव तावतीश्चापि मूर्च्छनाः॥
ताणाश्चैकोनपञ्चाशत् तथा ग्रामत्रयञ्च यत्।
एतत् सर्वं भवान् गाता कम्बलश्च तथानघ॥"
ज्ञास्यसे मत्प्रसादेन भुजगेन्द्रापरं तथा।
चतुर्विधं पदं तालं त्रिप्रकारं लयत्रयम्॥
यतित्रयं तथा तोद्यं मया दत्तं चतुर्विधम्।
एतद्भवान् मत्प्रसादात् पन्नगेन्द्रापरञ्च यत्॥
अस्यान्तर्गतमायत्तं स्वरव्यञ्जनसम्मितम्।
तदशेषं मया दत्तं भवतः कम्बलस्य च॥
तथा नान्यस्य भूर्लोके पाताले चापि पन्नग।
प्रणेतारौ भवन्तौ च सर्वस्यास्य भविष्यतः।
पाताले देवलोके च भूर्लोके चैव पन्नगौ॥"[57]

[57] *मार्कण्डेयपुराणम्*, पञ्चानन तर्करत्नः, अध्याय: २३, श्लोक ५१–५६।

देव्या सरस्वत्या नागराज अश्वतरः तस्य च भ्राता कम्बलः सप्तस्वराः, सप्तग्रामरागाः, सप्तगीतयः, सप्तमूर्च्छनाः, ऊनपञ्चाशत् तानाः, षड्जादि ग्रामत्रयविषये ज्ञानं लब्धुं वरं प्रदत्तमासीत् । यद्यपि पुराणेऽस्मिन् सङ्गीतस्य आलोचनं सामान्यं तथापि तस्य मूल्यम् असामान्यम् । चत्वार पदाः, त्रय तालाः त्रय प्रकाराः, त्रय लयाः, यतित्रयम्, चत्वार तोद्यविषयेऽपि च ते ज्ञानं लभ्यन्ते । तेषु स्वर-व्यञ्जनसमन्वितसङ्गीतस्य तेऽधिकारी भवन्ति । स्वर्गे, मर्त्ये पाताले च कार्यतः सर्वलोके ते सङ्गीतविद्यायाः साधकरूपेण धारकरूपेण च समादृताः भवन्ति ।

अस्य पुराणस्य त्रयोविंशतितमेऽध्याये षट्षष्ठिप्रकाराः, पुनः षडधिक एकशततमेऽध्याये वीणा, वेशु, दोर्दुर, पणव, पुष्कर, मृदङ्ग, पटाह, देवदुन्दुभि आदि बहुवाद्यानामुल्लेखोऽस्ति । पुराणेऽस्मिन् सप्तमूर्च्छनानामपि उल्लेखोऽस्ति । मूर्च्छनाप्रसङ्गे भरतेनोक्तम्-

"क्रमयुक्ता स्वराः सप्त मूर्च्छनास्तमिसंगिताः।"

सङ्गीतदर्पणकारेण पण्डितदामोदरेण मूर्च्छनाप्रसङ्गे उक्तम्-

"क्रमात् स्वराणां सप्तानामारोहश्चावरोहनम् ।
मूर्च्छनेत्युच्यते ग्रामत्रये ताः सप्त सप्तय ।।"

क्रमानुसारं सप्तस्वराणाम् आरोहण-अवरोहनेन मूर्च्छना भवति । ग्रामेषु प्रत्येकं सप्त सप्त मूर्च्छना सन्ति ।

मार्कण्डेयपुराणे गान्धर्वसङ्गीतस्य लक्षणे "सप्तस्वराः..."[58] यदुक्तं तत्र सप्तस्वराः भवन्ति षड्जः, ऋषभः, गान्धारः, मध्यमः, पञ्चमः, धैवतः, निषादश्च । प्रसङ्गेऽस्मिन् शार्ङ्गदेवेनोक्तम् षड्जादि-सप्तस्वराणां प्रत्येकानां स्वतन्त्र्या उच्चारणभङ्गिः अस्ति । स्वरस्य एतां विशिष्टाम् उच्चारणभङ्गिम् अवगमयितुं प्राचीनशिक्षाकारैः जीवजन्तूनां रवेन सह तुल्यन्ते ।[59] यथा माण्डुकीशिक्षाकारेण ऋषिणा मण्डुकेनोक्तम्-

"षड्जे वदति मयूरो गाभो रम्यति चर्षभः।
अजा वदति गान्धारो क्रौञ्चनादस्तु मध्यमे ।।
पुष्प साधारणे काले कोकिलः पञ्चम स्वरे ।

[58] मा. पु. अध्याय २३, श्लोक ५१

[59] *निःशङ्कशार्ङ्गदेवप्रणीतं सङ्गीतरत्नाकरम्,* ड. प्रदीप कुमार घोषः, पृ. 66.

अश्वस्त धैवते प्राह कुञ्जरस्तु निषादवने ।।"[60]

सप्तस्वराणाम् उत्पत्तिप्रसङ्गे पण्डितेन अहोबलेनोक्तम्-

"अनिलाऽनलसकाशात्ते चश्वध्वानाः सुराध्वनः।
नाना रूप धराऽऽधाताज्जायन्ते च स्वजापिते ।।"[61]

अग्निना वायुना च सप्तस्वराः आकाशात् सञ्जायन्ते । ते स्वयमेव उत्पन्नस्वरेषु वाद्याघातेन नानारूपाः आधृताः।

एते सप्तस्वराः पुनः द्वाविंशतिश्रुतिभिः निबद्धाः सन्ति । एतेषु षड्जस्वरस्य चतस्रः श्रुतयः, ऋषभस्वरस्य तिस्रः श्रुतयः, गान्धारस्वरस्य द्वे श्रुती, मध्यमस्वरस्य चतस्रः श्रुतयः, पञ्चमस्वरस्य चतस्रः श्रुतयः, धैवतस्वरस्य तिस्रः श्रुतयः, निषादस्य च द्वे श्रुती स्तः।[62] 'श्रुति' इति सङ्गीतस्य अस्य पारिभाषिकशब्दस्योल्लेखः मार्कण्डेयपुराणे प्रत्यक्षरुपेण नास्ति, परन्तु तत्रैव उल्लिखितस्य गान्धर्वसङ्गीतस्य व्याख्याप्रसङ्गे श्रुतेः आलोचनमावश्यकमस्ति । अतिप्राचीनसङ्गीताचार्यः विश्वावसु उक्तवान्- "श्रवणेन्द्रियग्राह्यत्वाद् ध्वनिरेव श्रुतिर्भवेत् ।"[63] मतङ्गेन तस्यप्रणीते 'वृहद्देशी'ति ग्रन्थे श्रुतिप्रसङ्गे उक्तम्- "...श्रु श्रवणे चास्य धातोः क्ति प्रत्ययसमुद्भवः। श्रुयन्त इति श्रुतयः। "[64]

अन्यत्र श्रुतिप्रसङ्गे उक्तं यद् नादस्य अनुकरणेन श्रुतेः उत्पत्तिर्भवति । श्रुतितः स्वरस्य उत्पत्तिर्भवति । स्वरस्य सूक्ष्मविभागाः अपि श्रुतिः।[65]

नाट्यशास्त्रकारो भरतोऽपि द्वाविंशतिश्रुतीनां समर्थकः। उक्तं यद्-

"तिस्रो द्वे च चतस्रश्च चतस्रस्तिस्र एव च ।
द्वे चतस्रश्च षड्जाख्ये ग्रामे श्रुतिनिदर्शम् ।।"[66]

---

[60] *सङ्गीतमनीषा,* प्रथमखण्डम्, अमल दाशशर्मा, पृ, 29.

[61] *सङ्गीतपारिजातम्,* अहोबलपण्डितः, गीता सोम (सं), पृ. 10-11.

[62] ड. प्रदीप कुमार घोषः, पृ. 45-46.

[63] *सङ्गीतमनीषा,* द्वितीयखण्डम्, अमल दाशशर्मा, पृ, 6.

[64] *मतङ्गप्रणीतं वृहद्देशी,* श्रीराज्येश्वरमित्र, पृ. 5.

[65] *भारतीयसङ्गीतवेद,* सुधांशु कुमार वन्द्योपाध्यायः, पृ. 2.

[66] नाट्यशास्त्रम्, काशी सं, २८/२२

पुराणकारेण 'ग्राम' प्रसङ्गे उक्तम्- " ताणाश्चैकोनपञ्चाशत् तथा ग्रामत्रयञ्च यत् ।"[67] मार्कण्डेयपुराणे त्रयानां ग्रामानाम् ऊनपञ्चाशत् तानानां च उल्लेखोऽस्ति । वायुपुराणकारेणापि गान्धर्वसङ्गीतस्य लक्षणप्रसङ्गे ग्रामत्रयाणामुल्लेखः कृतः-

"सप्त स्वरास्त्रयो ग्रामा मूर्च्छनास्त्वेकमिंशतिः।"[68]

त्रयः ग्रामाः भवन्ति यथानुसारं षड्जः मध्यमः गान्धारश्च । सङ्गीतरत्नाकरे ग्रामप्रसङ्गे उक्तम् मूर्च्छनाभिः आश्रयकृतः स्वरसमष्टिः ग्राम इत्युच्यते । द्वौ ग्रामौ अस्मिन् जगति प्रचलितौ स्तः- षड्जः मद्यमश्च । तेनोक्तम्-

"गान्धारग्रामसमाचष्ट तदा तं नारदो मुनिः।
प्रवर्तते स्वर्गलोके ग्रामोऽसौ न महीतले ॥"५[69]

नारदमुनेः मतानुसारं गान्धारग्रामः स्वर्गलोके प्रचलित आसीत् (पश्चिम हिमालयस्य सुउच्च-गन्धर्वलोके) ।

मार्कण्डेयपुराणस्य युगे नृत्य-गीत-वाद्य-समन्वितं सङ्गीतं पूर्णरूपेण विकसितमासीत् । नाटकाभिनयोऽपि तदा प्रचलित आसीत् । परिशेषे वक्तव्यं यद् मार्कण्डेयपुराणे यद् सङ्गीतं वर्णितमस्ति तद् गान्धर्वसङ्गीतमेव । पुराणकारेण मार्कण्डेयपुराणस्य २३७ तमेऽध्याये गान्धर्वसङ्गीतस्य पारिभाषिकशब्दानामुल्लेखमात्रः कृतः। आलोच्ये निबन्धे उल्लिखितेषु शब्देषु कतिपयशब्दानां तथा गान्धर्वसङ्गीतस्य संक्षिप्तालोचनायाः प्रयासः कृतः।

०००

ग्रन्थसूची

गोस्वामी, प्रभात कुमार, *भारतीय सङ्गीतेर कथा,* २य सं, पूर्वाचल प्रकाशनी, कलिकाता, 1975.

घोषः, ड. प्रदीप कुमार, *निःशङ्कशार्ङ्गदेवप्रणीतं सङ्गीतरत्नाकरम्,* पःवः राज्य सङ्गीत अकादमी, कलिकाता, 1994.

तर्करत्नः, पञ्चानन (सं), *मार्कण्डेयपुराणम्,* नवभारत पब्लिशर्स, कोलकाता, 2013.

---

[67] मा. पु, अध्याय २३, श्लोक ५२

[68] वायुपुराणम्, पञ्चानन तर्करत्नः (सं), श्लोक ३६, पृ, 519.

[69] *निःशङ्कशार्ङ्गदेवप्रणीतं सङ्गीतरत्नाकरम्,* ड. प्रदीप कुमार घोषः, पृ.74.

तर्करत्नः, पञ्चानन (सं), *वायुपुराणम्,* नवभारत पब्लिशर्स, कोलकाता, २य सं, 2011.

दाशशर्मा, अमल, *सङ्गीतमनीषा,* प्रथम-द्वितीयखण्डम्, के पि वागची ऐण्ड कोम्पानी, कोलकाता, 1979.

प्रज्ञानानन्दः, स्वामी, *सङ्गीत ओ संस्कृति,* उत्तरभागः, श्रीरामकृष्ण वेदान्तमठ, कलिकाता, 1957.

मित्र, श्रीराज्येश्वर, *मतङ्गप्रणीतं वृहद्देशी,* संस्कृत पुस्तक भण्डार, कलिकाता, 1992.

मुखोपाध्याय, कल्पिका, *प्राचीन संस्कृत नाट्ये सङ्गीत*, सुवर्णरेखा, कलिकाता, 1992.

रायः, ड. विमल, *सङ्गीतशब्दकोश,* कलिकाता, 1979.

वन्द्योपाध्यायः, सुधांशु कुमार, *भारतीयसङ्गीतवेद,* त्रयी सङ्गीतविद्यालय, सोदपुर, 1986.

सोम, गीता (सं), *सङ्गीतपारिजातम्*, अहोबलपण्डितः, कोलकाता, 2006.

काव्यव्याकरणयोः सन्मेलनसौन्दर्यम् : अधिरावणार्जुनीयमहाकाव्यम्

अरिजित् गुप्तः
सहायकाचार्यः संस्कृतविभागस्थ**:** द्विजेन्द्रलालमहाविद्यालयस्य
कृष्णनगरे**,** नदीयायाम्, अधिपश्चिमबङ्गम्

व्याकरणादिशास्त्राणां पदप्रयोगादीनां तथा गम्भीरतत्त्वमण्डितविषयाणां काव्यमार्गेण याथातथ्येन व्याख्यानाय निर्मितं काव्यरूपं शास्त्रकाव्यमित्याख्यां लभते। शास्त्रकाव्यतया भट्टिकविना इदम्प्रथमतया विरचितं रावणवधाख्यं महाकाव्यम्। भट्टिकवेः रचननैपुण्यं शास्त्रकाव्यस्य उपादेयत्वं च दर्शं दर्शमनुवर्तिनः कवयोऽनुप्रेरणां लभमानाः समप्रकारके काव्यनिर्माणे प्रयत्नशीला दृश्यन्ते। एतेषु कश्मीरनिवासकर्ता भट्टभीमो भौमको वा विशेषस्थानभाग्भवति, तस्य रावणार्जुनीयाख्यस्य शास्त्रकाव्यस्य रचयितृत्वात्। महाकाव्यमिदं कार्तवीर्यार्जुनरावणयोः सङ्गरवर्णनव्याजेन वैदिकसूत्राण्यपास्य अष्टाध्यायीस्थानाम् अखिलानां सूत्राणाम् अष्टाध्यायीक्रमेणैव प्रयोगान् प्रदर्शयति। सामूहिकतया, सप्तविंशतिसर्गात्मके रावणार्जुनीये महाकाव्ये राज्ञः कृतवीर्यसूनोः अर्जुनस्य चरित्रवर्णनं तथा च रावणेन सह तस्य युद्धवर्णनमन्तिमे च रावणपराजयः अर्जुनविजयश्च निबध्यतेरूपम्।

अर्जुनरावणीयकारः प्रायेण अष्टाध्याय्याः प्रत्येकपादस्य कृते एकेकं सर्गं निर्ममे। संज्ञापरिभाषाबाहुल्यात् प्रथमाध्यायस्य प्रथमं पादं परित्यज्य द्वितीयपादात् गाङ्कुटादिभ्योऽञ्णिन्ङित् (१/२/१) इति सूत्रमाश्रित्य काव्यारम्भस्तेन अकारि। प्रत्येकसर्गस्य नामकरणविषये प्रत्येकपादस्य प्रथमसूत्रं व्यवहृतं तेन। यथा गाङ्कुटादिपादे प्रथमस्सर्गः, भुवादिपादे द्वितीयस्सर्गः (भुवादयो धातवः [१/३/१] इति सूत्रमाश्रित्य), आकडारदिपादे तृतीयस्सर्गः (आकडारादेका संज्ञा [१/४/१] इति सूत्रमाश्रित्य) इत्यादयः।

अष्टाध्याय्याः अध्यायायां यादृशानि सूत्राणि क्रमतः वर्तन्ते ,तानि अबलम्ब्य महाकाव्यस्य श्लोकाः रचिताः। सूत्राणां प्रकृतिः श्लोकस्य प्रकृतिजनयित्री। यथा तद्धितप्रत्ययानाम् उदाहरणावसरे रावणस्य उग्रस्वभाववर्णनम् ,कारकसूत्राणामुदाहरणैः नृपतेः ससैन्यमृगयायात्रावर्णनम् ,समाससूत्राणाम् उदाहरणैः प्रकृतिवर्णनम् ,कृत्प्रत्ययानां प्रयोगैः राक्षसानां उपद्रवकारित्वं ,रावणकृतं शिवस्तवनम् ,नामधातुप्रयोगैः माहिष्मत्याः

वर्णनम् ,अलुक्समासोदाहरणैः रावणार्जुनयोः तुमुलसमरवर्णनम् इत्यादिविषयाः सूत्राणां क्रमं प्रकृतिं चाश्रित्य क्रियतेरूपम्।

अत्र विचार्यं यदधिसर्गक्रमं सङ्गरनायकप्रकृत्यादिवर्णने कवेः मौलिककवित्वं अष्टाध्याय्याः क्रममनुसरत् प्राप्तहानि उत मुक्तप्रभावमिति वा। अर्थात्, निर्दिष्टे सर्गे तत्र तत्रैव तत्तत् वर्णनं सूत्रक्रममनुसर्तुं रचितमुत घटनाया धारावाहिकप्रयोजनादित्यपि चिन्त्यम्। एतत् प्रस्तूयमानं शोधपत्रं शास्त्रकाव्यपरम्परा रावणार्जुनीयस्य अमुष्याः विशिष्टायाः शैल्याः नवीनसौन्दर्येण कथंकारं सुचारुतया संवर्ध्यते, तदेव विचरितुमुद्दिष्टमस्ति।

- **कृत्प्रत्ययप्रयोगाः**

अष्टाध्याय्याः प्रत्ययपादोत्तरार्धे नवमस्सर्गः रचितः। अत्र कृदतिङ् (३/१/९६) इति कृदधिकारादारभ्य आद्वादशसर्गं कृत्प्रत्ययस्य विविधाः प्रयोगा उपलभ्यन्ते। अत्र नवमे सर्गे दशाननस्य सचिवस्य शुकस्य कथने विन्ध्याद्रिवर्णनं, रावणस्तुतिः, स्नानकर्मणे नर्मदागतस्य दशग्रीवस्य प्रशंसनम्, रावणसैन्यस्य नदीस्नानेच्छा, स्नानरतस्य रावणस्य अनुचराणां ध्वंसक्रियाकारित्वमित्यादिविषयाः वर्ण्यन्ते, यत्र रावणस्तुतौ कृत्यप्रत्ययस्य प्रयोगो लभ्यते। एकस्मिन् श्लोके वहूनां कृत्प्रत्ययानाम् उदाहरणमपि सर्गेऽस्मिन् दृश्यते। काव्यशोभा शास्त्रचमत्कारेण भूयश्चकास्तितमाम्-

"तं **कारकं** शात्रवपक्षभीतेर्**भेत्तार**मद्रीन्द्रशिलातटानाम्।
आनन्दनं भृङ्गगणस्य दानै रक्षांस्यबध्नंस्तरुषु द्विपौघम्॥" [70]

कर्मण्यण्पादपूर्वार्धे दशमसर्गे नर्मदापुलिने रावणेन पुष्पोपहितस्य शिवलिङ्गस्यार्चनं चर्चितम्। शिवस्तुतिप्रसङ्गः दशमसर्गे कियद्विस्तृतः लक्ष्यते, सूत्रक्रममनुसृत्यैवात्र खच्-प्रत्ययेन साकं अण्-खिष्णुच्-खुकञ् इत्यादयोऽपि प्रत्यया महादेवस्तवे प्रयुज्यन्ते-

सर्वङ्कषा ते तनुरीश वायु**रभ्रङ्कष**श्चास्ततमाः पतङ्गः।
कुलङ्कषं वारि च वारिधीनां विश्वम्भरात्मा सखवह्निचन्द्रः॥" [71]

---

70 रावणार्जुनीयम्- ९/३७

71 तत्रैव- १०/२३

अत्र **"आढ्यम्भविष्णुः"**, **"नग्नम्भविष्णुः"**, **"सुभगम्भावुकताम्"**, **"आढ्यम्भावुकताम्"** इति पदचतुष्टयं वैयाकरणकवेः काव्यमहिमानमुद्भावयति। पुनः जलसङ्क्षोभेण प्रपीडितानां मत्स्यानां वर्णने"भञ्ज-भास-भिदो घुरच्" (३/२/१६१) इत्यनेन घुरच्प्रत्ययेन "**मेदुराः**", "विदि-भिदि-च्छिदेः कुरच्" (३/२/१६२) इत्यनेन कुरच्प्रत्ययेन "**छिदुराः**" "इण्-नश्-जि-सर्तिभ्यः क्वरप्" (३/२/१६३) इत्यनेन क्वरप्प्रत्ययेन "**जित्वरा**" "**नश्वराः**" इति पदानि रमणीयतया उपस्थाप्यन्ते-

"जित्वरा मेदुरा मीना**श्छिदुरास्**सर्वदेहिनाम्।
नश्वराः सहसा जाता जलसङ्क्षोभपीडिताः॥" [72]

द्वादशसर्गे "उणादयो बहुलम्" (३/३/१) इति सूत्रादारभ्य उणादिप्रत्ययस्य उदाहरणानि काव्यमार्गेण व्याख्यायन्ते। द्वादशसर्गे युद्धार्थमर्जुनं प्रति रावणस्य दूतप्रेषणं, माहिष्मतीं प्राप्य अर्जुनं प्रति दूतस्य शुकस्य रावणपराक्रमवर्णनपुरःसरं युद्धवार्तायाश्च कथनवर्णने क्तिन्-क्यप्-अङ्-युच्-खल् इत्येते प्रत्ययाः क्रमिकसूत्राणाम् उदाहरणरूपतया अस्माभी रावणार्जुनीये संदृश्यन्ते। अत्र "इज्यावता"[73] (यज् क्यप्), "जरावान्"[74] (जॄ अङ्) "उपासनाम्" (उप-आस् युच् टाप्) "दुःशासनः" (दुः शास् युच्), "दुर्योधनः"[75] (दुर् युध् युच्) इति पदानि युगपत् श्लोकक्रमं सूत्रक्रमञ्च भासयन्ति।

- **तद्धितप्रत्ययप्रयोगाः-**

रावणार्जुनीयमहाकाव्ये तद्धितप्रत्ययानाम् उदाहरणविषये चत्वारः सर्गाः कविना व्यवहृताः। अष्टाध्याय्याः चतुर्थाध्यायस्य प्रथमद्वितीयपादौ संगृह्य, ङ्याप्प्रातिपादिकपादादारभ्य आरक्तपादं चतुर्दशः सर्गः विनिर्मितः। अत आरभ्य तद्धितप्रत्ययानां सूत्रक्रमानुसारीणि उदाहरणानि श्लोकद्वारा प्रस्तूयन्तेरूपम्। चतुर्थाध्यायस्य तृतीये चतुर्थे च पादे युष्मदस्मत्पादादारभ्य प्राग्वहतेष्ठक्पादपर्यन्तं पञ्चदशः सर्गः रचितः।

72 तत्रैव- ११/४४

73 रावणार्जुनीय- १२/३०

74 तत्रैव- १२/३२

75 तत्रै- १२/४३

तद्धितप्रत्ययानामुदाहरणस्थले द्वयोर्द्वयोः पादयोः कृते एकैकः सर्गः रचितरूपः। तथा हि, प्राक्क्रीताच्छपादे धान्यानां पादे च षोडशः सर्गः, प्राग्दिशीयपादे पादशतादिपादे च सप्तदशः सर्गश्च कविना तद्धितोदाहरणार्थं प्रस्तुतः। चतुर्दशे सर्गे कार्तवीर्यसकाशे शुकप्रस्थानम्, माहिष्मतीराजसभायां कार्तवीर्यस्य रावणनिग्रहणे मन्त्रणा इत्यादयो विषयाः "स्त्रियाम्" (४/१/१) इत्यधिकृत्य स्त्रीप्रत्ययविषयकसूत्राणाम् उदाहरणतया प्रदीयन्ते। तद्यथा रक्षःपक्षक्षयार्थमर्जुनस्य प्रतिज्ञायां "टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्...." (४/१/१५) इत्यादिसूत्रेण ङीप्प्रत्ययः-

"**अनश्वरी** रात्रीचरेश**लावी** ममे**दृशी** चेतसि तावदिच्छा।
या **वैनतेयी**व विहङ्गमूर्तिर्विपक्षनागाङ्गविभङ्गकारी॥"[76]

पञ्चदशे सर्गे अर्जुनेन सह रावणस्य युद्धाय प्रस्थानोपक्रमः, युद्धाद्वारयितुं तत्पत्न्याः मन्दोदर्या अनुनयनम्, तदवज्ञाय प्रतापगर्वितस्य रावणस्य युद्धनिष्क्रमणम् इत्यादिविषयाः मुख्यतया उपन्यस्ताः। युष्मत्-अस्मत् इतिशब्दाभ्यां खञ्-छ इति प्रत्ययद्वयम्, युष्मदस्मदोः स्थाने च युष्माक-अस्माक इत्यादेशविषयेऽप्युदीरितम्। अत्र "युष्मदस्मदोऽन्यतरस्याम्" (४/३/१), "तस्मिन्नणि च युष्माकास्माकौ" (४/३/२), "तवकममकावेकवचने" (४/३/३) इति सूत्रत्रयमत्र श्लोकद्वये व्यवहृतम्, यत्र युद्धाय प्रस्थितानां सैन्यानां परिहासजल्पनं रम्यतया चित्रीयते-

"**यौष्माकीणं** धनुर्धन्य**मास्माकीन**मतोऽधिकम्।
यौष्माका वाजिनः शूरास्तथा**स्माका** विशेषतः॥"[77]

षोडशे सर्गे रावणार्जुनयोः तुमुलसङ्ग्रामः, तत्र राक्षसपक्षक्षयः, सूर्यास्तसमये समरविरामः इत्यादिविषयाः अष्टाध्याय्याः पञ्चमाध्यायस्य आदिमपादद्वयमाश्रित्य श्लोकतया रचितरूपाः। अत्र सूत्रक्रममनुसृत्य "प्राक्क्रीताच्छः" (५/१/१) इत्यधिकृत्य "उगवादिभ्यो यत्" (५/१/२) इत्यनेन यत्, "तस्मै हितम्" (५/१/५), "तदर्थं विकृतेः प्रकृतौ" (५/१/१२) इत्यनेन छ , प्रत्ययस्य उदाहरणं प्रसङ्गानुसारितया प्रस्तुतम्।

समासप्रयोगाः-

---

[76] तत्रैव - १४/५

[77] रावणार्जुनीयम्- १५/१

रावणार्जुनीये चतुर्थसर्गे "समर्थः पदविधिः" (२/१/१) इति सूत्रादारभ्य समासविषयकैः सूत्रैः मृगयातः प्रत्यावर्तितस्य अर्जुनस्य पुरनारीभिः साकं स्नानयात्रा तत्सन्दर्भे कमलनयनाः पुरसुन्दर्यः नर्मदा च तटिनी सप्रसङ्गमुपवर्णिताः। अस्मिन्नवसरे अव्ययीभाव-तत्पुरुष-बहुव्रीहिसमासाः यथासूत्रक्रममुदाहृताः। पूर्वादिपादे पञ्चमसर्गे सूर्यास्तवर्णनं सन्ध्याचित्रणञ्च विहितम्। पुनः द्विगुपादे सप्तमे सर्गे अष्टाध्याय्याः द्वितीयाध्यायस्य चतुर्थपादस्थसूत्राणि द्विगुरेकवचनमित्यारभ्य समाहारद्वन्द्वसमासः वैकल्पिकः एकवद्भावश्च यथाक्रममुदाह्रियन्ते। नृपतेरन्तःपुरप्रवेशप्रसङ्गे पुरनारीणां वर्णने अव्ययीभावसमासस्य "अव्ययं विभक्ति-समीप-समृद्धि-वृद्ध्यर्थाभावात्यय-संपत्ति-शब्दप्रादुर्भाव-पश्चाद्यर्थानुपूर्व्य-यौगपद्य-सादृश्य-सपत्ति-साकल्यान्तवचनेषु"(२/१/६) इति प्रधानसूत्रं विभत्यर्थे **"अधिस्त्रि",** समृद्ध्यर्थे **"सुनारि",**[78] सादृश्यार्थे **"सलक्ष्मिमूर्तिम्"**[79] इति पदानि निरूपयति। प्रसन्नसलिला रेवा जनानां जननीवदासीदित्यत्र **"पूर्व-सदृश-समोनार्थ**कलहनिपुणमिश्रश्लक्ष्णैः" (२/१/३१) इति सूत्रमुदाहृतम्-

"**त्रिकल्पपूर्वा** सरितां वरा या राज्ञां **तमोभित्सदृशेन** युक्ता।
कालुष्यभिन्ना जननीसमा या झषोर्मिमालाकलहान् वहन्ती॥ " (४/१९)

महाकाव्यस्य पञ्चमसर्गे सूर्यास्तमयवर्णनसमये षष्ठीतत्पुरुषसमासप्रतिषेधसूत्रं प्रसङ्गानुकूलतया उदाहृतम्- "न निर्धारणे" (२/२/२०), "याजकादिभिश्च" (२/२/९) इत्यनेन सूत्रेण-

"**अम्भःपरिचारिका** द्विरेफा विज्ञायाहितसम्भ्रमान् भ्रमन्तः।
यासत्कुसुमाः **कुमुद्वतीनां** सम्पन्नाष्टिकसौरभा ययुस्ताः॥" [80]

रावणार्जुनीयस्य सामासिकप्रयोगविषये सप्तमसर्गे प्रतिनायकस्य रावणस्य राजसभायां प्रत्यावर्तितेन चारमण्डलेन कार्तवीर्यस्य ऐश्वर्यस्य वर्णनम्, तदाकर्ण्य क्रुद्धस्य रावणस्य अर्जुनविजयार्थं माहिष्मतीं प्रति प्रस्थानमित्यादिविषयाः अष्टाध्याय्याः द्वितीयाध्यायस्य चतुर्थपादस्थसूत्राणि "द्विगुरेकवचनम्" (२/४/१), "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" (२/४/२) इति सूत्रक्रममाश्रित्य समाहारद्वन्द्वसमासस्य वैकल्पिकैकवद्भावस्य

---

78 तत्रैव- ४/१/१

79 तत्रैव-४/१/४

80 रावणार्जुनीयम्- ५/१२

चोदाहरणदर्शनसनाथेन वर्णिताः रावणस्य चारमण्डलचित्रणे –

"दिवानिशं परिक्रम्य **काकोलूक**मिवावनौ।
मन्यमानं जनं भर्तुः सदा **कीटपिपीलिकम्॥**" [81]

वैकल्पिकः एकवद्भावप्रयोगः अपि अस्मिन्नेव सर्गे उदाहृतम् कार्तवीर्यार्जुनस्य प्रतापवर्णने-

"यस्य वाहुबलत्रस्ताः **सिंहव्याघ्राः** वनेष्वपि।
मांसं **मृगवराहस्य** विस्रब्धाः स्म न भुज्यते॥" [82]

"अलुगुत्तरपदे" (६/३/१) इति सूत्रादारभ्य अलुक्समासविधायकानि समासादेशविषयकाणि सूत्राणि एकोनविंशसर्गे सहस्रार्जुनदशाननयोः ससैन्ययुद्धवर्णनं चित्रयन्ति। अत्र अप्रचलितप्रत्ययोदाहरणैः रक्षःसैन्यानां ध्वंसक्रियाकारित्वम् सहस्रार्जुनेन तस्य प्रतिरोधश्च शोभनं चित्रीयते। तद्यथा अलुक्समासस्य उदाहरणम्- "पञ्चमी स्तोकादिभ्यः" (६/३/२) इत्यनेन पञ्चम्या अलुक्- **"स्तोकाद्गतम्",** "ओजःसहोम्भस्तमसस्तृतीयायाः" (६/३/३) इत्यनेन तृतीयाया अलुक्**- "सहसात्तकोपः",**[83] "प्रावृट्शरत्कलादिवां जे" (६/३/१४) इत्यनेन सप्तम्याः अलुक्- **"शरदिजाम्बुजभास्करवत्"**[84] इति च। रावणार्जुनीयस्य सप्तदशसर्गे मन्दोदर्याः विरहकालिकावस्थाख्यापने तद्विशेषणप्रकाशने "संख्यासुपूर्वस्य" (५/४/१४०) इत्यनेन अकारलोपेन "**सुपात्**"[85], "गन्धस्येदुत्पूतिसुसुरभिभ्यः" (५/४/१३५) इत्यनेन इत्-आदेशेन "**उद्गन्धिपुष्पाणि**",[86] "धनुषश्च" (५/४/१३२) इत्यनेन अनङादेशेन **"पिनाकधन्वनः**"[87] इत्यादीनि पदानि यथाप्रसङ्गं काव्यचमत्कृतिं विनन्वन्ति। महाकवेरियं सार्थकता यत् व्याकरणसूत्राणाम् उदाहरणप्रयत्नेन प्रसङ्गानुसारिणः काव्यिकप्रयोगस्य

---

81 तत्रैव- ७/८

82 तत्रैव- ७/१२

83 तत्रैव- १९/१

84 तत्रैव- १९/८

85 रावणार्जुनीयम् -१७/७६

86 तत्रैव -१७/८०

87 तत्रैव -१७/७८

विधानम्। ग्रन्थस्य यथासाध्यसमीक्षणानन्तरं एते विचाराः बुद्धिपथमागच्छन्ति।

- **कारकविभक्तिप्रयोगाः-**

प्रथमाध्यायचतुर्थपादे विनिर्मिते तृतीयसर्गे माहिष्मत्याः निर्गतस्य राज्ञः वनमृगयाविहारप्रसङ्गे कारकसूत्राणि यथाक्रममुदाहरितानि। पुनः द्वितीयाध्यायतृतीयपादे "अनभिहिते" (२/३/१) इति सूत्रमधिकृत्य चन्द्रोदयवर्णन-विप्रलम्भवर्णनावसरे विभक्तिविधायकानि पाणिनिसूत्राणि श्लोकरूपतया प्रयुक्तानि। तद्यथा, अपादानकारकस्य उदाहरणावसरे एकस्मिन्नेव गजराजविषये तस्य अवयवादिकं लक्षीकृत्य विविधमपादानत्वं प्रयुक्तम् -

“**रेणूच्चयात्** पथि पराजयते स्म कश्चिदन्तर्दधे **करिवरा**दपरोऽश्वसादी।
जातं **कपोलफलकान्**मदवारि **तस्माद्**भृङ्गान्यवारयदिभश्चलकर्णतालः॥”[88]

आतश्च कारकसूत्राणां कार्तवीर्यमृगयाप्रसङ्गे उदाहरणप्रदर्शने अभिनवा दृष्टान्ताः लक्ष्यन्ते। तद्यथा, तुरगखुरवेगात् भूमितलात् ऊर्धमार्गे रेणूच्चये भूमेः अपादानत्वं कल्पितम्। अत्र अपादानत्वे हेतुः भूमेः ध्रुवत्वम्। एकस्मिन् हस्तिप्रसङ्गे तस्य अवयवादिकं लक्षीकृत्य विविधमपादानत्वं प्रयुक्तम्। गजस्य कपोलफप्रदेशात् मदवारिनिःसरणे कपोलस्य जनिकर्तृप्रकृतित्वेन अपादानत्वम्, पुनश्च चलत्कर्णाभ्यां मदवारितः भ्रमरनिवारणे मदवारिण ईप्सितत्वेन अपादानत्वम्। रजःप्रादुर्भावात् राजमातङ्गात् अश्वारोहिणः अन्तर्धानप्रयत्ने राजमातङ्गस्य अपादानत्वम्, अदर्शनविषयत्वात्। एकस्मिन्नेव प्रसङ्गे परस्परसम्बद्धान् विषयांशान् अवलम्ब्य तत्र तत्र कारकत्वं प्रयुक्तम् भट्टभीमेन। अत्र अपादानकारकस्य सूत्राणि यथाक्रमं यथाप्रसङ्गञ्च एकस्मिन्नेव श्लोके प्रयुज्यन्ते- "पराजेरसोढः" (१/४/२६), "वारणार्थानामीप्सितः" (१/४/२७), "अन्तर्धौ येनादर्शनमिच्छति" (१/४/२८) , "जनिकर्तुः प्रकृतिः" (१/४/३०) इति च।

षष्ठसर्गे अष्टाध्याय्याः द्वितीयाध्यायस्य तृतीयपादस्य सूत्राण्यादाय द्वितीया-तृतीया-पञ्चमी-षष्ठी-सप्तमीपर्यन्तं प्रायः सर्वाणि विभक्तिविधायीनि पाणिनिसूत्राणि काव्यात्मकतया उदाह्रियन्ते, यत्र कारकजन्या उपपदजन्या चोभयप्रकारा विभक्तिः चन्द्रोदय-

[88] तत्रैव -३/१२

विप्रलम्भ-रात्रिक्रीडादिवर्णनावसरे प्रयुक्ता लक्ष्यन्ते। तत्र "यतश्च निर्धारणम्" (२/३/४१) सूत्रेण निर्धारणावधौ 'निशानाम्' 'स्त्रीषु' इत्यनयोः षष्ठीसप्तम्योः वैल्पिकविधानम्-

"लब्धा युवानो विहतान्धकारां निशां **निशानां** परमां सचन्द्राम्।
सुहृत्समेताः रमयाम्बभूवुः सयौवनाः **स्त्रीषु** मनोहरा याः॥"[89]

अत्र शास्त्रकाव्यसीमनमतिक्रम्य काव्यत्वावच्छिन्नरूपेण रावणार्जुनीयं साहित्यिकोपकरणैः संवर्धमानं दृश्यते। आतश्च, रावणार्जुनीयस्य तृतीयाध्यायस्य प्रथमपादमाश्रित्य सर्गद्वयं रचितम्, पादस्य आकारगौरवात्। प्रत्ययपादपूर्वार्धे विनिर्मिते अष्टमे सर्गे अष्टाध्याय्याः प्रथमाध्यायस्य कियत्सूत्राणि श्लोकरूपतां प्राप्तानि। उत्कृष्टैरात्मगुणैः ऐन्द्री अमरावतीव अर्जुनीया माहिष्मती सर्वेषामधिवासिनाम् एकमात्रशरणरूपा-

''सुखायमानेन जनेन युक्ता **दुःखायमानस्य** जनस्य ढौका।"[90]

नामधातोरनन्तरम् इतराः कतिचनप्रत्ययाः प्रसङ्गक्रमतः उदाहृताः। लृट्-लिट्-लुङ् इत्यादिलकाराणां प्रयोगाः रावणस्य दूतं प्रति वचनप्रकारे लभ्यन्ते। स्वप्रतापं प्रति लङ्काधिपतेः सचेतनत्वं, गुप्तचरैः कर्मिजनैः आत्मीयलोके तस्य प्रबोधनं "उषविदजागृभ्योऽन्यतरस्याम्" (३/१/३८) इत्यनेन जागृधातोः लिटि विकल्पेन आम्प्रत्ययविधानेन'**जागराम्बभूव', 'प्रजजागार'** पदद्वयेन सम्भासते। नवमसर्गे नर्मदावर्णनं मुख्यम्, सार्वधातुके विकरणप्रत्ययविधानमारभ्य तदनन्तरं कृदधिकारे प्रारब्धे कृत्प्रत्ययस्य उदाहरणैः प्रत्ययपादपश्चार्धनामकः नवमसर्गः सज्जितः। भ्वादि-अदादि-दिवादिप्रभृतिगणीयधातूनां शप्-यक्-श्यन्-श्लु विकरणप्रत्ययविधायकानां सूत्राणाम् प्रसङ्गानुसारीणि उदाहरणानि रचयामास महाकविः-

"इयमद्रिपतेः सुरापगेव **प्रभवत्य**म्बुविधूतलोकपापा।
पवनोच्चलितैर्जलैः स्पृशन्ती तटजातैः सह **दीव्यती**व वृक्षैः॥[91]

89 रावणार्जुनीयम्- ६/६०

90 तत्रैव- ८/१४

91 तत्रैव- ९/२

- **मूल्यायनम्-**

रावणार्जुनीयस्य समीक्षणानन्तरं अस्माभिः दृश्यते यत् अष्टाध्यायीसूत्रक्रममाश्रित्य काव्यस्य परिधिः वितन्यते। अष्टाध्याय्याः अध्यायायां यादृशानि सूत्राणि क्रमतः वर्तन्ते ,तानि अबलम्ब्य महाकाव्यस्य श्लोकाः रचिताः। सूत्राणां प्रकृतिः श्लोकस्य प्रकृतिजनयित्री। यथा तद्धितप्रत्ययानाम् उदाहरणावसरे रावणस्य उग्रस्वभाववर्णनम् ,कारकसूत्राणामुदाहरणैः नृपतेः ससैन्यमृगयायात्रावर्णनम् ,समाससूत्राणाम् उदाहरणैः प्रकृतिवर्णनम् ,कृत्प्रत्ययानां प्रयोगैः राक्षसानां उपद्रवकारित्वं ,रावणकृतं शिवस्तवनम् ,नामधातुप्रयोगैः माहिष्मत्याः वर्णनम् ,अलुक्स्मासोदाहरणैः रावणार्जुनयोः तुमुलसमरवर्णनम् इत्यादिविषयाः सूत्राणां क्रमं प्रकृतिं चाश्रित्य क्रियतेरूपम्। इत्थं, महाकाव्यस्य कथानकानुसारं वस्तुपात्रविषयचरित्रादीनामेव भिन्नभिन्नसन्दर्भेषु भिन्नभिन्नाधारेषु भिन्नभिन्नमुदाहरणं प्रस्तुतम्। अत्र कवेः नैसर्गिकवर्णननैपुण्यं वैयाकरणवैदग्ध्यञ्च युगवत् प्रतिफलितम्। किञ्च न केवलं तथा, तस्मिन्नेव क्रमे क्रमिकसूत्राणां निर्दिष्टतया अवस्थानत्वात्, कवेः मौलिकरचनचातुर्यञ्च व्याकरणनिर्भरः भवितुं शक्येत इति चेत्तन्न, कविवैयाकरणस्य काव्यव्याकरणयोः उभयत्र तुल्यपाटवात्। इदमेवात्रावितथं कथ्यं यत्, महाकविना भट्टभीमेन अनुसृतेऽपि भट्टिकवौ, तस्य नावीन्येन संस्कृतकाव्यसाहित्यपरम्परा नूनं सम्बर्ध्यतेरूपम्। सूत्रक्रममनुसरता कविवरेण प्रसङ्गानुकूलतया सर्गविभाजनमकारि, तस्मिन् तस्मिन् च सर्गे वर्ण्यविषयाश्च तथा उपन्यस्ताः। सूत्रप्रकृतिं चिन्तं चिन्तमुदाहरणतया तदनुकूलं श्लोकानपि क्वचिदरचयन्महाकविः। सूर्यास्तवर्णनं सन्ध्यावर्णनमित्यादिक्षेत्रे सत्यामपि व्याकरणपक्षस्य अनिवार्योपस्थितौ, तत्र कवेः काव्यचमत्कारिता अक्षुण्नतया चकास्ति।

अतो महाकाव्यस्यास्य राजस्नानमृगयायात्रादिकथानकवर्णनात्मकत्वेन काव्यत्वम्, क्रमेण सूत्रोदाहरणात्मकतया च शास्त्रत्वमपि सिध्यतीति दिक्।

****

अर्वाचीनसंस्कृतसाहित्यसन्दर्भे आचार्यसत्यव्रतशास्त्रिमहाभागस्य रचनासमीक्षणम्

डॉ. शिप्रा राय

अध्यापिका

संस्कृतविभागः, त्रिपुराविश्वविद्यालयः

साम्प्रतिकयुगे आधुनिकसंस्कृतसाहित्यजगति आचार्यसत्यव्रतशास्त्रिमहाभागानां स्थानं प्रथमरूपेण गण्यते। पद्मश्रीः, पद्मविभूषणः, महामहोपाध्यायः, राष्ट्रपतिसम्मानितः, आधुनिकसंस्कृतमहाकविः, आधुनिकवैयाकरणः, संस्कृतपुरुषः इत्यादिभिरुपाधिभिर्विभूषिता एते विद्वांसः। एतेषां वैदुष्यस्य प्रभावो वेद-व्याकरण-साहित्य-दर्शन- वेदान्त-मीमांसादिषु शास्त्रेषु वर्तते। न केवलं प्रभावः, अपि तु अनेन शास्त्राणामुपरि प्रगाढ़ ज्ञानं धार्यते।

दिल्लीविश्वविद्यालये चत्वारिंशद्वर्षाणां कार्यकाले संस्कृतविभागाध्यपदम् अथ च कलासं कायाध्यक्षपदस्य अलंकृतम्। एतैः महाभागैः भगवतः जगन्नाथस्य नगर्यां स्थापिते जगन्नाथसंस्कृतविश्वविद्यालये प्रथमकुलपतिपदमलमक्रियत। आचार्याः सत्यव्रतशास्त्रिमहाभागाः भारतसर्वकारस्य द्वितीयसंस्कृतायोगस्य अध्यक्षपदेऽपि आसन्। एतैः संस्कृतस्य समुन्नतये संवर्द्धनाय च अनेकाः संस्तुतयः अदीयन्त।

आचार्यशास्त्रिमहाभागाः न केवलं भारते , अपि तु विदेशेष्वपि संस्कृतस्य प्रचार-प्रसारं अकुर्वन्। अस्मभ्यं भारतीयेभ्यो महद्गौरवः यद् आचार्यशास्त्रिवर्याणां सत्प्रयासेन थाईलैण्डदेशस्थिते शिल्पाकोणविश्वविद्यालये संस्कृताध्ययनकेन्द्रं स्थापितमिति। संस्कृतस्य सेवकरूपेण प्रसिद्धाः एते विद्वांसः। एते आधुनिकभारतीयसमाजेषु संस्कृतस्योत्थानाय अथ च वैदेशिकसमाजेषु संस्कृतस्य प्रभावं स्थापनाय सदैव संलग्नाः सन्ति।

प्रस्तुते शोधपत्रे मया आचार्यशास्त्रिवर्याणां विरचितानां कृतीनां समीक्षणं विधीयते यथा –

आचार्यसत्यव्रतशास्त्रिमहाभागैः 'थाइदेशविलासम्' इति नाम्ना सुन्दरं काव्यं रचितम्। काव्येऽस्मिन् थाईलैण्डवास्तव्यानां वस्तुस्थितीनां वर्णनं प्रस्तुतम् । अस्य देशस्य प्राकृतिकसौन्दर्यं , ऐतिहासिकं महत्वञ्च काव्येऽस्मिन् प्रस्तुतम् । थाइदेशीयं सौन्दर्यं सम्यकतया वर्णितमस्मिन् काव्ये । थाइदेशीया जातिः संस्कृतिश्च वर्णिता एकविंशत्यधिकशतसंख्यासु श्लोकेषु विभिन्नछन्दस्सु । आचार्येन सत्यव्रतशास्त्रिणा थाईदेशीया भौगोलिकस्थितिः उद्घाटिता । कविना चतुर्षु दिक्षु स्थितानां देशानामपि वर्णनं विहितम्। अस्य खण्डकाव्यस्य प्रथमे श्लोके एव भौगलिकस्थितिं वर्णयति कविः –

"अस्त्येशियानामनि सुप्रसिद्धे
द्वीपे विशालेऽतिविशालकीर्तिः ।
आग्नेय दिङ्मण्डलमौलिभूतो
देशोऽतिरम्यो भुवि थाइलैण्डः॥"[1]

अस्य श्लोकस्य वर्णनं दृष्टा ज्ञायते यद् शास्त्रिवर्यः कालिदासस्य कुमारसम्भवमहाकाव्येन प्रभावितोऽस्तीति । लेखकः थाईदेशीयं शारीरिकसौन्दर्यमपि वर्णयति । तत्रत्याः नद्यः, सस्यश्यामलाभूमरः , देवालयाः, जलाशयाः उद्यानानि, नगरानि, ग्रामाः, हस्तिनः, विश्वविद्यालयाः इत्यादीनां वर्णनं करोति कविः ।

थाईदेशीयस्थाः देवालयाः, बौद्धधर्मीयाः कार्यकलापाः तेषां संस्कृतिसंरक्षणे संलग्नाः सन्ति । यद्यपि थाईदेशीयाः जनाः पाश्चात्यदेशीयानां परिधानस्यानुकरणं कृतम्, तथापि स्वदेशीयं धर्मं, संस्कृतिञ्च इति विश्वासमन्तः । कविना थाईलैण्डस्य राजधानी 'बैंकाक' नगरस्यापि वर्णनं सम्यकतया प्रतिपादितम् । कविना बैंकाकनगरम् ऐश्वर्यजनितं सौन्दर्यरूपेण वर्णितम्।

"देशस्य तस्यास्ति भृशं विशाला
कण्ठे भुवः शुभ्रतरेव माला।
ऐश्वर्यसौन्दर्यविलासधानी
बैंकाकनाम्नी खलु राजधानी॥"[2]

कविः कथयति बैंकाकनगरं 'छाउ फारा' नद्यास्तटे विराजमानं स्वर्णमयं नगरमिति। नगरेऽस्मिन् नानाविधानि स्वर्णाभूषणस्यापणानि शोभायमानानि सन्ति। कविः कथयति सम्पूर्णं नगरं समुद्रस्य माणिक्यप्रभावेन शोभितमिति। नगरे यत्र तत्र भगवतः बुद्धस्य प्रतिमा स्थापिताऽस्ति। बौद्धभिक्षुकाः यत्र तत्र जनान् प्रति भगवतः बुद्धस्य महिमां वर्णयन्ति। थाईदेशे चतुर्मुखस्वरूपस्य ब्रह्मणः मन्दिरमपि स्थापितमस्ति। मन्दिरमिदं महदाश्चर्यम्। कविना रामायणकालीना व्यवस्थाऽपि वर्णिताऽस्ति । मन्दिरेषु रामायणसन्दर्भितानि अनेकानि चित्राणि अङ्कितानि सन्ति। तत्रत्याः जनाः स्वसन्ततेर्नामकरणमपि रामः सीता, शोभा, शान्तिप्रभृतीनि हिन्दुधर्मसम्बन्धितानि कुर्वन्ति।

थाईलैण्डदेशे जनता-राज्ञयोर्मध्ये सम्बन्धः उल्लेखनीय आसीत् । तत्रत्याः जनाः नृपं भगवत्स्वरूपं स्वीकुर्वन्ति। लेखकः संक्षेपरूपेण थाईलैण्डदेशीयं धर्मं, संस्कृतिं, राज्यव्यवस्थां, शिक्षाव्यवस्याञ्च प्रतिपादयति। थाईलैण्डदेशे भारतदेशीया संस्कृतेः प्रभावो वर्तते। लेखकेन काव्येऽस्मिन् थाईदेशीयं सम्पूर्णम् ऐतिहासिकतथ्यमुद्घाटितम्। केवलं काव्यमात्रमाध्यमेन थाईदेशीयम् ऐतिहासिकं महत्त्वं ज्ञातुं शक्यते।

थाईदेशीयां रामकथामाधारीकृत्य शास्त्रिणा 'श्रीरामकीर्तिमहाकाव्यम्' विरचितम्। आचार्यः शास्त्री अस्मिन् काव्ये पञ्चविंशतिसर्गेषु , द्वादशशतपद्येषु च थाईदेशीयां रामकथां निरूपयति। काव्यमिदम् अन्यासु भारतीयभाषास्वपि अनूदितं वर्तते। रामकथा थाईदेशे 'रामकियन्' इति नाम्ना प्रचलिता। वाल्मीकिरामायणाद् भिन्नाऽस्ति थाईदेशे प्रचलिता 'रामकियन' इति कथा। वाल्मीकिरामायणे वाल्मीकेराश्रमे जनकनन्दिनी जानकी लवकुशौ जन्मं दत्तवती किन्तु रामकीर्तिकाव्यानुसारं रामेण त्यक्ता, लक्षणेन विसर्जिता च सीता महर्षिवज्मृगाश्रमस्य कुटीरे वसयामास इति वर्णितम्। थाइरामायणस्य विविधोपाख्यानं वाल्मीकिरामायणाद् भिन्नं दृश्यन्ते । यथा – रामकीर्तिमहाकाव्यस्य पञ्चमे सर्गे जिह्वोपाख्यानम् , द्वादशे सर्गे सुवर्णमत्स्योपाख्यानम् इत्यादयः।

थाईलैण्डदेशे रामकथायाः ऐतिहासिकं महत्त्वमस्ति। कविः थाईलैण्डदेशविषये उक्तवान् –

"बैंकाकेति समाख्यास्या यद्यपि प्रथिता पुरः।

तथाऽपि थाइदेशीया नैनयैतां प्रचक्षते।।"[3]

काव्येऽस्मिन् भगवत्याः सीतायाः सौन्दर्यं सम्यकतया प्रतिपादितम् । सीतायाः पतिपरायणरूपं व्रतमपि उद्धाटितमस्मिन् काव्ये । अस्मिन् काव्ये हनुमतः चरित्रमपि वर्णितमस्ति । हनुमता कृतस्य लङ्कायां विध्वंसस्यापि सम्यग्रूपेण वर्णितमस्ति । सीतायाः पुत्रद्वयस्यापि वर्णनं विहितम् । लक्षणेन अरण्ये त्यक्ता सीता महर्षिवजमृगाश्रमे कुट्यां निवासं कृतवती । कविः वर्णितवान् एवंविधभावेन –

"विदेहजां शून्यवने विहाया-
ऽयोध्यां सुमित्रातनये निवृत्ते ।
एकाकिनी दुःखभरार्दिता च
चक्रन्द सीता कुररीर भीता ।।
मा त्वं शुचं पुत्रि गमः कथञ्चित्
त्यक्ताऽपि भर्त्रा सुतरां निरागाः ।
त्वमाश्रमे मे वस यावदिच्छं
न तेऽत्र कष्टं भविता कथञ्चित् ।।
इत्येवमुक्त्वा समानाययत्तां
स्वमाश्रमं सर्वजनानुकम्पी ।
तपोनिधिर्वजमृगनामकोऽसौ
सीतां कुटिरं च विनिर्दिदेश।।"[4]

थाईरामकथानुसारेण सीतायाः रामेण सह मिलनं जातम् ईश्वरप्रयासेन । कवि वर्णितम् एवंविधभावेन –

"तदोन्मुखीभूय विदेहजातां
महेश्वरो वाचमिमामुवाच ।
क्षमस्व सीते ! पतिमर्हसि त्वं
नैवास्य तावत्प्रणयं विहन्तुम् ।।
रामोऽपि भक्त्या प्रणनाम शम्भुं
विदेहजासङ्गमसमप्रहृष्टः ।

विसर्जितस्तेन सुरैश्च तुष्टैः
पुरीमयोध्यां प्रययौ ससीतः।।"[5]

'इन्दिरागान्धिचरितम्' इति नामकं काव्यं भूतपूर्वीया भारतीया प्रथममहिला प्रधानमन्त्रिविषये रचितमस्ति । अस्मिन् काव्ये पञ्चविंशतिसर्गेषु प्रधानमन्त्रिण्याः इन्दिरागान्धिजीवनचरितं प्रदर्शितम् । काव्येऽस्मिन् इन्दिराप्रियदर्शिन्यः सुन्दरचित्रस्य, महाकविकालिदासस्य 'कुमारसम्भवम्' इत्यस्य पार्वतीवर्णनस्य चानुकरणं कृतमस्ति। तद् यथा –

"नेत्री जनानां हृदयस्य जेत्री मैत्री रिपूणामपि दुर्मदानाम्।
सौम्याकृतिः सौम्यगुणाभिगम्या यत्राकृतिस्तत्र गुणा वसन्ति।।"[6]

'श्रीगुरुगोविन्दसिंहचरितम्' इति काव्यस्य प्रकाशनं 1960 ईशवीये वर्षे गुरुगोविन्दसिंहफाउण्डेशनपटियालाद्वारा जातम्। काव्येऽस्मिन् दशमशिखगुरुगोविन्दसिंहस्य जीवनेतिहासस्य वर्णनं कृतमस्ति कविना। कविः वर्णितवान् एवंविधभावेन –

"यन्नाममात्रश्रवणेन सद्यः सैन्यं रिपूणां बिभयाञ्चकार।
कोपारूणाक्षः स्फुरिताधरो यः साक्षादयुग्माक्ष इवाबभासे ।।
तस्य प्रभोर्ब्रह्ममयस्य पुंसः कः शक्नुयाद्वर्णयितुं चरित्रम्।
तथाऽपि तद्गौरवमेव मां तच्चरित्रगाने मुखरीकरोति।।"[7]

चतुर्दशसर्गात्मकं 'श्रीबोधिसत्त्वचरितम्' इति काव्यं भगवतः बुद्धस्य कथामाधारीकृत्य रचितम्। शास्त्रिवर्येण पूर्वप्रकाशितस्य स्वस्य बुद्धस्य कथानकं समाहितम् अस्मिन् काव्ये । काव्येऽस्मिन् शास्त्रिवर्येण रसद्वयमङ्गीकृतं यथा – वीरः शृङ्गारश्च । अत्रापि प्रकृतेर्वर्णनं प्रस्तुतं कविवर्येण। महाकाव्यस्य प्रारम्भे कविः तस्य उद्देश्यं वर्णितवान् एवंविधभावेन –

"शास्तेति नाम्ना प्रथितो महात्मा
बुद्धः प्रबुद्धो जनताहिताय।
प्राग्जन्मवृत्तान्तकथास्तदीया
गीर्वाणवाण्या समुदीरयामि।।"[8]

आचार्यशास्त्रिवर्यैः भारतीयपरम्परामाधारीकृत्य 'सुभाषितसाहस्त्री' इति नामकः ग्रन्थः विरचितः। ग्रन्थेऽस्मिन् अनेकानि सुभाषितानि रचितानि सन्ति यैरस्माकं भारतीयसंस्कृतेः संरक्षणं स्यात्।

'भवितव्यानां द्वारानि भवन्ति सर्वत्र' इत्युक्तिसार्थक्यं वर्तते एतेषां कृते। आचार्यवर्याः अष्टसप्ततिं राष्ट्रियान् तथा त्रीन् अन्ताराष्ट्रियान् पुरस्कारान् लब्दवन्तः।

शास्त्रिवर्येण 'वृहत्तरं भारतवर्षम्' इत्यस्मिन् ग्रन्थे कम्बोडियादेशस्य वर्णनं कृतम्। 'वृहत्तरं भारतवर्षम्' इति काव्यं द्विधा विभक्तं यथा – यववाली, स्वर्णदीपञ्चेति। शास्त्रिवर्याणाम् अस्मिन् काव्ये आलंकारिकचमत्कारो दृश्यते। आचार्यशास्त्रिणा प्राकृतिकसौन्दर्यमपि प्रस्तुतं महाकविकालिदासवत्। 'दण्डिनः पदलालित्यम्' इत्युक्तिदिशा आचार्यः दण्डी पदलालित्यप्रदर्शने प्रसिद्धः। शास्त्रिमहाभागा अपि काव्येऽस्मिन् पदलालित्यं प्रदर्शयन्ति। अलंकारसन्दर्भे शास्त्रिणः विभावनायाः प्रयोगं कुर्वन्ति अत्र। ग्रन्थेऽस्मिन् कविः उक्तवान् –

"स्वं स्वं चरित्रं भुवि भूमिदेवाः प्रशिक्षयन्तः किल सर्वपुंसः।

पुरा प्रयाता इह देशजाता यवादिदेशान् दिशि दक्षिणस्याम्॥"[9]

आचार्यशास्त्रिणः 'शर्मण्यदेशः सुतरां विभाति' इति खण्डकाव्यमस्ति। अस्मिन् काव्ये नवतिः श्लोकाः सन्ति। आचार्यशास्त्रिवर्यैः स्वजर्मनदेशीया यात्रा वर्णिता। अत एव अस्य काव्यस्य नाम अपि 'शर्मण्यदेशः सुतरां विभाति' इति कृतम्। लेखकेन भारत-जर्मनदेशयोर्मध्ये सुष्ठ मैत्री अस्तीति प्रतिपादितम्। काव्येऽस्मिन् कविः वर्णितवान् –

"यूरोपभूमण्डलमध्यवर्ती पारं समृद्धेः परमभ्युपेतः।

नामानदीप्रस्रवनैः सुरम्यः शर्मण्यदेशः सुतरां विभाति॥"[10]

'भवितव्यानां द्वारानि भवन्ति सर्वत्र' इति ग्रन्थे कविः आत्मकथां वर्णितवान्। संस्कृतसाहित्ये नवीनः पदक्षेपो गृहीतवान् काव्येऽस्मिन्। 'Kalidasa in Modern Sanskrit Literature' इति नाम्ना आङ्गलभाषायां प्रकाशितं ग्रन्थं रचितवान्

सत्यव्रतशास्त्रिमहाभागाः । अत्र नूतनमभिमतं प्राप्यते । आचार्यसत्यव्रतशास्त्रिणा विरचितं संस्कृतपद्यमयं पत्राणां संकलनं पत्रकाव्यमिति इति नाम्ना प्रकाशितम् ।

आचार्यसत्यव्रतशास्त्रिमहाभागानां प्रतिभा कीदृशी आसीतदिति एतेषां विषयवस्तुचयनम्, शब्दलालित्यप्रदर्शनम्, रचनास्थलचयनम् इत्यादिभिर्ज्ञायते । आचार्यैः शास्त्रिभिः त्रीणि महाकाव्यानि, त्रीनि खण्डकाव्यानि, एकं प्रबन्धकाव्यम्, एकं पत्रकाव्यम्, पञ्चसंख्यकानि समालोचनात्मकानि रचनानि रचितानि । भारतसर्वकारद्वारा ज्ञानपीठपुरस्कारः, राष्ट्रपतिपुरस्कारः इत्यादयः सम्मानैः अलंकृतः शास्त्रिमहाभागाः । आचार्येण सत्यव्रतशास्त्रिणा काव्येऽस्मिन् वेदान्तम्, श्रीमद्भगवद्गीता, षडङ्गवेदानां बहूनां सूक्तानां कथा वर्णिता । शास्त्रिमहाभागाः नवनवोन्मेषशालिन्या प्रतिभया, शब्दचातुर्य्येन, आलंकारिकचमत्कारेण, छन्दोवैचित्र्येण च संवेदनशीलकाव्यहृदये मनोज्ञतायाः सञ्चारं प्रकटीकुर्वन्ति ।

अन्त्यटीकाः-

[1]थाइदेशविलासम्, १
[2]थाइदेशविलासम्,१७
[3]श्रीरामकीर्तिमहाकाव्यम्, १/६
[4]प्रागुक्तम्, २१/१,१५,१६
[5]प्रागुक्तम्, २५/१८,२६
[6]सत्यव्रतवाङ्मयसमीक्षा, पृ. १४३
[7]श्रीगुरुगोविन्दसिंहचरितम्, १/३/५
[8]सत्यव्रतवाङ्मयसमीक्षा, पृ.२२
[9]प्रागुक्तम्, पृ. १७३
[10]प्रागुक्तम्, पृ. ९९

सहायकग्रन्थाः

- थाइदेशविलासम्, सत्यव्रतशास्त्री, इष्टर्ण बुक लिंकर्स, दिल्ली, प्रथमसंस्करणम्, 1979
- श्रीरामकीर्तिमहाकाव्यम्, सत्यव्रतशास्त्री, इष्टर्ण बुक लिंकर्स, दिल्ली,1994
- सत्यव्रतवाङ्मयसमीक्षा, सम्पादक, सि.उपेन्देर राओ, इष्टर्ण बुक लिंकर्स, दिल्ली, प्रथमसंस्करणम्, 2012
- संस्कृत-पुरुष सत्यव्रतशास्त्री, सम्पादक, प्रो. केदार नाथ शर्मा, इष्टर्ण बुक लिंकर्स, दिल्ली, प्रथमसंस्करणम्, 2017

श्रीजीवन्यायतीर्थप्रणीतस्य चिपिटकचर्वणस्य नाट्यतत्त्वदृष्ट्या विमर्शः

राकेशदाशः
सहायकाचार्यः, संस्कृतदर्शनविभागे
रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयस्य

०. कविः श्रीजीवन्यायतीर्थः

विशिष्टः विद्वान् श्रीजीवन्यायतीर्थमहोदयः १८९२ ईशवीयाब्दस्य जनवरीमासस्य षड्विंशे दिनाङ्के (२६.०१.१८९२) अखण्डवङ्गानां २४परगनामण्डलस्य भट्टपल्ल्यां[92] जनिं लब्धवान्। पितुः पञ्चाननतर्करत्नमहोदयस्य चतुष्पाठ्यां सुपद्मव्याकरणस्य अध्ययनेन श्रीजीवन्यायतीर्थस्य विद्यारम्भः अभवत्। तस्मिन् काले वङ्गेषु कालाप-मुग्धबोध-सुपद्म-संक्षिप्तसार-हरिनामामृतादीनां बहूनाम् अपाणिनीयव्याकरणानाम् अध्ययनं सुप्रचलितम् आसीत्। पितुः सकाशे प्रारम्भिकम् अध्ययनं समाप्य अयं कलिकातानगरीं प्राप्तः। तत्र संस्कृत-कलेजियेट्-विद्यालये अस्य प्रगताध्ययनं प्रारब्धम्। रिपन्-कॉलेज-नामकात् (अधुना सुरेन्द्रनाथमहाविद्यालयः इति प्रसिद्धात्) प्रतिष्ठानात् संस्कृतविभागे बि.ए.स्तरीयम् अध्ययनं समाप्य कलिकाताविश्वविद्यालयतः एम्.ए.-उपाधिम् अपि अयम् अध्यगमत्। तत्र प्रथमस्थानम् अधिकुर्वन् अयं स्वर्णपदकेन सभाजितः। ततः पितुः आग्रहेण शास्त्रचर्चायाः पीठस्थानं वाराणसीं प्राप्तवान् श्रीजीवः। तत्र महामहोपाध्यायस्य राखालदासन्यायरत्नस्य समीपे प्राचीननवीनन्यायशास्त्रयोः आमूलचूडम् अध्ययनम् अकरोत् श्रीजीवः। तत्र न्याय-साहित्य-व्याकरणशास्त्रेषु पाटवं सम्पाद्य 'न्यायतीर्थः', 'काव्यतीर्थः', 'व्याकरणतीर्थः' इति उपाधिभिः भूषितोऽयं पण्डितश्रेष्ठः।

हरप्रसादशास्त्रिणां मार्गनिर्देशने श्रीजीवेन 'आधुनिकतर्कविज्ञानस्य क्रमविवर्तनम्' (Evolution of Modern Logic) इति शोधबन्धं विरचय्य पि.एच्.डि.-उपाधिः समधिगतः। अयं शोधबन्धः अनन्तरकाले 'न्यायसूत्रस्य प्राचीनत्वम्' (Antiquity of Nyāya-sūtra) इति नाम्ना कलिकाताविश्वविद्यालयात् प्रकाशितः।

अध्ययनं समाप्य सः अध्यापनजीवनस्य प्रारम्भे पितृदेवस्य चतुष्पाठ्याम् अध्यक्षत्वेन पाठनं प्रारब्धवान्। तदनन्तरम् ऋषिवङ्किमचन्द्रमहाविद्यालये अध्यापकपदवीम् अलञ्चकार। ततः कलिकाताविश्वविद्यालयस्य संस्कृतविभागे (१९३७-५८)

92 अधुना पश्चिमवङ्गस्य उत्तरचब्बिशपरगनामण्डलस्य भाटपाडा इति प्रसिद्धे स्थाने

अध्यापकरूपेण सः अध्यापनम् अकार्षीत्। ततः स यादवपुरविश्वविद्यालयस्य संस्कृतविभागे (१९५९-६८) अध्यापनं चकार। स दीर्घकालं यावत् संस्कृतमहाविद्यालयस्य अध्यक्षपदम् अलङ्कृतवान्।

बहुभिः उपाधिभिः सभाजितः एषः शास्त्रचर्चया समम् एव विविधानि काव्यानि रचयित्वा कवित्वयशसा अमृतत्वं भजते। तस्य विविधानि रूपकाणि साहित्यस्य अभिनवान् मानदण्डान् स्थापयन्ति। १९२६ ईशवीयाब्दे अस्य प्रथमप्रकाशनम् आसीत्, अन्तिमप्रकाशनञ्च १९८५ ईशवीयसंवत्सरे आसीत्। अस्य सारस्वतसृष्टिः निरवच्छिन्नरूपेण षष्टिं वर्षाणि प्राचलत्। शतायुरयं विद्वद्धौरेयः महाकविः १९९२ क्रैस्ताब्दे मरशरीरम् अत्यजत्।

तस्य काव्यसंसारः इत्थम्–

श्रव्यकाव्यानि

१.पाण्डवविक्रमम् (अष्टादशसर्गात्मकमहाकाव्यम्)
२.सारस्वतशतकम् (चित्रकाव्यम्)
३.ऋतुचक्रचङ्क्रमणम् (गीतिकाव्यम्)

दृश्यकाव्यानि

क) **नाटकानि**– १.महाकविकालिदासम्, २.साम्यसागरकल्लोलम्, ३.श्रीशङ्कराचार्यवैभवम्, ४.नागनिस्तारम्, ५.स्वातन्त्र्यसन्धिक्षणम्, ६.विवेकानन्दचरितम्, ७.निगमानन्दचरितम्, ८.सिन्धुसौवीरसङ्ग्रामम्, ९.श्रीकृष्णकौतुकम्, १०.रघुवंशम्, ११.कुमारसम्भवम्

ख) **प्रकरणम्**– १.माधुरीसुन्दरम्

ग) **भाणः**– १.विधिविपर्यासम्, २.पुरुषपुङ्गवः

घ) **व्यायोगः**– १.कैलासनाथविजयम्, २.गिरिधरसंवर्द्धनम्

ङ) **प्रहसनम्**– १.विवाहविडम्बनम्, २.चण्डताण्डवम्, ३.भट्टसङ्कटम्, ४.पुरुषरमणीयम्, ५.क्षुत्क्षेमीयम्, ६.शतवार्षिकम्, ७.चिपिटकचर्वणम्, ८.रागविरागम्, ९.वनभोजनम्, १०.रामनामदातव्यचिकित्सालयम्, ११.दरिद्रदुर्दैवम्, १२.चौरचातुरीयम्, १३.नष्टहासम्।

एतानि विहाय अपि अस्य स्फुटकाव्यानि अनूदितानि च काव्यानि विदुषां विस्मयम् आवहन्ति। संस्कृतसाहित्यस्य प्रायः सर्वान् विधान् स्वलेखन्या पृष्टवतः अस्य विदुषः प्रबन्धः, रम्यरचना, प्रशस्तिगाथा, शोकगीतिः, अनूदितकाव्यं चेत्यादीनि बहूनि विराजन्ते।

१. चिपिटकचर्वणस्य कथावस्तु नामकरणं च

चिपिटकचर्वणस्य नायकः कपाली धनलोभी अतिकृपणः च। एकदा खञ्जः भृत्यः पङ्गुरामः कपालिनः छिन्नपादुकायुगलं पथि अक्षिपत्। कुब्जपृष्ठा दासी मन्थरा कपलिनः जीर्णं पुरातनं शतच्छिद्रं छिन्नच्छत्रम् अपि मार्गे न्यक्षिपत्। मार्गेण आगच्छन् कपाली पतितं छत्रं दृष्ट्वा कुपितः यदा विचारितवान् तदा ज्ञातं यत् पादुका अपि भृत्येन क्षिप्ता। कपाली भृत्यौ भर्त्सयन् आसीत् तदा एव सहसा मुखेन पादुकाम् आदाय कश्चन सारमेयः अधावत्। कपाली सर्वं विस्मृत्य जीर्णं छत्रं कक्षे निधाय सारमेयस्य पृष्ठतः अधावत्। अल्पीयसा एव कालेन स च्छत्रेण शुनकं प्रहृत्य तस्य मुखात् पादुकाम् आच्छिद्य गृहं समागतः। किन्तु प्रहृतः सारमेयः तं दष्टवान्। प्रहारसमये जीर्णं तत् छत्रम् अपि भग्नम्।

सारमेयदष्टं रुधिराक्तं कपालिनं गृहं प्रत्यागच्छन्तं दृष्ट्वा भार्या रङ्गिणी व्यस्ता अभूत्। भीता चिन्तिता च रङ्गिणी वैद्यस्य आह्वानाय मन्थरां प्रैषयत्। कपालिनि गृहं समागते तस्य शयनाय नूतनं कटम् एकम् आस्तृणोत्। कपाली नूतनकटस्य विस्तारणाय ताम् अतर्जयत्। वैद्यः आगम्य च्छिन्नकटे शयानं कपालिनं दृष्ट्वा कपालिनः विषये दुष्टं चिन्तयेत् इति कथितवत्यां रङ्गिण्यां कपाली अधिकम् अकुप्यत्। यतः आगते वैद्ये तस्मै दर्शनी देया। तेन धनहानिः स्यात्। वैद्यस्य दर्शनीं कः दास्यति इति पृच्छन्तं कपालिनं रङ्गिणी अबोधयत् यत्, प्राणाः दर्शन्याः मूल्यवत्तराः इति। तावता मन्थरया दर्शितमार्गः वैद्यः गृहं प्राविशत्। कपालिनः हस्तनाडीं परीक्ष्य वैद्यः असूचयत् यद् अयं गृहस्वामी नूनम् एव क्रुद्धेन शुनकेन दष्टः। इदानीं तस्य कृत्यम् एष वैद्यः ज्ञास्यति इति भयेन कपाली तूष्णीम् अशेत। एतेन रङ्गिण्याः चिन्ता अवर्धत। वैद्यः अपि कपालिनं मूर्छितप्रायं दृष्ट्वा तस्य विषविकारम् अनुमितवान्। सः असूचयत् यत् लालाक्लिन्नः शुनकः एनं दष्टवान्। शुनकस्य लालया शरीरे प्रविष्टं विषं जलातङ्करोगस्य सम्भावनां जनयति। तत्प्रयुक्तः विकारः कपालिनम् आक्रामति इति। एतस्मात् रक्षणाय झटिति गव्यघृतम् उष्णदुग्धेन समं रोगी पिबेत्। इदम् आकर्ण्य कपाली गव्यघृतस्य व्ययेन आशङ्कितः स्वगतं वैद्यं निन्दितुं प्रारभत। एतेन तस्य अधरस्पन्दनं दृष्ट्वा रङ्गिणी अधिकं दुश्चिन्तासक्ता। वैद्यः अपि एतद् दृष्ट्वा विकारस्य लक्षणं वर्धते इति सूचयित्वा शुनकदष्टस्य स्थानस्य तप्तायःशलाकया दाहस्य निदानम् अवदत्। यदि तथा न

क्रियेत तर्हि अयं रोगी स्वयम् उन्मत्तशुनकः इव बुक्कन् सर्वान् दङ्क्ष्यति स्वयं च ततः मरिष्यति, तस्य दंशनेन अन्ये अपि तथा बुक्कन्तः मरिष्यन्ति इति सूचितवान्। कपाली भीतः क्रुद्धः च अचिन्तयद् यद् वैद्यः तस्य शरीरे बृहत्तरं क्षतम् उत्पाद्य अधिकं धनं प्रेप्सुः अस्ति। अतः यदा लोहशलाकादीन् व्यवस्थापयितुं रङ्गिणी निर्गता तदा कपाली सारमेयवत् नखदन्तादिभिः वैद्यम् आक्रमितुम् उद्युक्तः। तेन भीतः वैद्यः कथम् अपि पलायितः।

रङ्गिणी प्रत्यागत्य वैद्यम् अदृष्ट्वा यदा अपृच्छत् वैद्यः कुत्र इति तदा कपाली उक्तवान् यत्, वैद्यः औषधं सङ्ग्रहीतुं गृहं गतवान्। वैद्यस्य आगमने विलम्बं दृष्ट्वा रङ्गिणी पल्ल्यां विश्रुतं बहुविधरोगाणां परिहर्तारं तान्त्रिकम् आह्वातुं निर्गता।

अनन्तरं प्रतिवेशिभिः अनुरुद्धः कपटवेशधारी तान्त्रिकः प्रविशति। स केनचित् कौशलेन महाकृपणस्य गृहस्वामिनः सकाशात् किञ्चित् धनम् अपहृत्य रङ्गिण्यै प्रदातुं कृतसङ्कल्पः आसीत्। तान्त्रिकः आत्मानं तन्त्रमन्त्रविद् इति परिचाययति। कपालिनः शरीरात् प्रवहन्त्याः रुधिरधाराया निवारणाय क्षतस्थाने शर्कराचूर्णस्य लेपनसमये स कम् अपि विचित्रं मन्त्रम् उदचारयत्। शर्करायाः क्षतस्थाने लेपनात् सद्य एव शोणितप्रवाहः स्थगितः। रुधिररोधस्तु शर्करया एव न तु मन्त्रगुणात् इति ज्ञात्वा कपाली तान्त्रिकं प्रवञ्चकं ज्ञातवान्। किन्तु स तान्त्रिकस्य प्रवञ्चकत्वं प्रमाणयितुं यदा प्रयतितवान् तदा तान्त्रिकः चातुर्यपूर्णवाक्यैः कपालिनः चरितोद्घाटनं करोति स्म। एतेन कपाली उपायान्तरम् अप्राप्य नवीनोपायस्य अन्वेषणाय तान्त्रिकेण उक्तम् आचरितुं सिद्धः जातः। तान्त्रिकः विषविकारनाशाय शान्तिकर्म कर्तव्यम् इति असूचयत्। तत्र शान्तिकर्मणि तान्त्रिकस्य दक्षिणा कियती इति पृष्टः तान्त्रिकः एकं हरीतकीफलम् अस्य कर्मणः दक्षिणा इति अवदत्। कपालिनः निरीक्षा आसीत् यत् तान्त्रिकः अधिकं धनं याचिष्यते। तेन तान्त्रिकस्य कपटता प्रकटिता स्यात्। किन्तु तान्त्रिकस्य वचनेन कपाली पराभूतः। कपाली तस्मै हरितकीफलद्वयं प्रतिशृणुते। अधिकं गृहीतं चेत् मन्त्रापराधः स्यात् इति उक्त्वा तान्त्रिकः तद् अपि निराकरोत्। एतेन समधिकं प्रभावितं कपालिनं तान्त्रिकः अवदत् यत् विषनाशाय क्रियमाणं शान्तिकर्म मासत्रयं यावत् चलिष्यति। तत्र घटे पञ्चरत्नदानकाले यत् सुवर्णं दीयते तत् त्रिगुणितं भविष्यति। एतद् उक्त्वा स नाम्ना परिचितयोः कस्यचित् दैवज्ञस्य अनुग्रहात् लब्धधनयोः द्वयोः विशिष्टयोः धनिकयोः नाम उक्त्वा तयोः धनलाभे सहायकः स एव इति प्रत्यपादयत्।

ततः तान्त्रिकः अवदत् यत् एतस्य कर्मणः सफलतायै मासत्रयं परिवारसदस्यैः चिपिटकचर्वणव्रतं परिपालनीयम्। अत्र व्रते सर्वे अपि मासत्रयं यावत् केवलं चिपिटकम् एव भक्षयेयुः इति नियमः। एतेन मासत्रयं यावद् गृहे व्यये न्यूनतां परिलक्ष्य सन्तुष्टः कपाली घटे

स्थापनाय तान्त्रिकाय सुवर्णं दातुं सिद्धः अभवत्। यद्यपि परीक्षायै स आदौ एकतोलकं सुवर्णम् एव दातुम् ऐच्छत् किन्तु तान्त्रिकः तं कल्पितेन शास्त्रवचनेन अबोधयत् यत् स्वर्णत्रैगुण्यकर्मणि दश, विंशतिः इत्येवं शून्ययुताङ्कमितं सुवर्णम् एव देयम् अन्यथा सर्वनाशः भवेत्। उपायान्तरम् अप्राप्य कपाली दश तोलकानि सुवर्णस्य दातुम् अङ्गीकृतवान्।

घटे सुर्वणं स्थापयित्वा वस्त्रेण आच्छाद्य तान्त्रिकः आफिम-निद्राचूर्णादिमिश्रितं घटजलं कपालिने प्रादात्। तेन मूर्छां गतः कपाली। तदा तान्त्रिकः झटिति एव कलशात् स्वर्णम् अपहृत्य पलायितः। एतावता अल्पबुद्धिः पङ्गुरामः गृहं प्रविश्य कर्तारं सुखेन निद्राणं दृष्ट्वा पार्श्वे पूजास्थानं कल्पितं दृष्ट्वा कपालिनः पादुकायुगलम् आसने स्थापयित्वा पादुकादेव्याः प्रीत्युत्पादनाय पूजां प्रारब्धवान्। यतः पादुकायाः कारणाद् एव तस्य महत् कष्टं जातम् आसीत्। स्वयम् अलक्ष्यतया स्थितः तान्त्रिकः एतत् दृष्ट्वा झटिति गृहं प्रविश्य कपालिनं जागरयित्वा अवदत् यत् दासस्य स्पर्शेन घटस्थितं सुवर्णं जले द्रवीभूतम् अस्ति इति।

भीतः चिन्तितः कपाली पुनः तान्त्रिकेण सान्त्वितः। तान्त्रिकः उक्तवान् यत्, पुनः यदि विंशतिः तोलकानि सुवर्णस्य दास्यति कपाली तर्हि तत् षष्टितोलकमितं भवेत्। नष्टं धनम् अपि कपाली स्वयं तदीया भार्या वा नूनम् एव प्राप्स्यति इति तान्त्रिकः अवोचत्।

वस्तुतः तान्त्रिकः बहिः गत्वा घटात् अपहृतं सुवर्णं प्रतिवेशिने दत्त्वा रङ्गिण्यै सुवर्णदानाय असूचयत्। प्रतिवेशी अपि दशतोलकमितं स्वर्णं रङ्गिण्यै समर्पितवान्। एतेन रङ्गिण्याः अपि चिपिटकचर्वणे श्रद्धा उत्पन्ना। रङ्गिणी स्वगतम् एतद् वदन्ती गृहं प्रविश्य प्रकाशम् अवोचत् यत् पत्युः जीवनरक्षायै सा अवश्यमेव चिपिटकचर्वणव्रतं पालयिष्यति इति। तावता भृत्यौ अपि तथा कर्तुं सिद्धौ जातौ।

अत्र दृश्यते कृपणस्य कपालिनः मूर्खतावशात् तस्य धननाशः सम्पन्नः। किन्तु अन्ते तान्त्रिकस्य कौशलेन तस्य भार्या किञ्चिद् धनं प्राप्नोत्। अपि च कपालिनः गृहे अपि सर्वेषां किञ्चित् साम्मनस्यम् उत्पन्नम् इति। प्रेक्षकाः च अद्भुतेन एतेन प्रहसनेन अनाविलं हर्षं विशुद्धं रसं च अन्वभूवन् इति।

२. नाट्यतत्त्वगताः विचाराः

२.१. प्रहसनम्

श्रीजीवन्यायतीर्थेन विरचितं हास्यरसाश्रितम् एकाङ्कयुतं चिपिटकचर्वणम् इति प्रहसनम्। किं तावत् प्रहसनम्? साहित्यदर्पणे उक्तम्–

भाणवत् सन्धिसन्ध्यङ्गलास्याङ्गाङ्कैर्विनिर्मितम्।
भवेत् प्रहसनं वृत्तं निन्द्यानां कविकल्पितम्॥
अत्र नारभटी नापि विष्कम्भकप्रवेशकौ।
अङ्गी हास्यरसस्तत्र वीथ्यङ्गानां स्थितिर्न वा॥
[साहित्यदर्पणे– ६।२६४।]

यथा भाणाख्यरूपके सन्धीनां सन्ध्यङ्गानां लास्याङ्गानाम् अङ्कसङ्ख्यायाः च व्यवस्था वर्तते तथा एव प्रहसने व्यवस्था। किन्तु प्रहसने कविकल्पितानां निन्द्यानां चरितानां वृत्तम् आश्रित्य रूपकं प्रस्तूयते।

भाणाख्यरूपके मुखनिर्वहणे सन्धी, तद्गतानि सन्ध्यङ्गानि, दश लास्याङ्गानि, एकः अङ्कः च व्यवस्थापितः दृश्यते। तथाहि–

भाणः स्याद् धूर्तचरितो नानावस्थान्तरात्मकः।
एकाङ्क एक एवात्र निपुणः पण्डितो विटः॥
....
मुखनिर्वहणे सन्धी लास्याङ्गानि दशापि च॥
[साहित्यदर्पणे– ६।२२७-२३०।]

मुखनिर्वहणाभ्यां सन्धिभ्यां, यथासम्भवं सन्ध्यङ्गैः, लास्याङ्गैः, एकेन अङ्केन च विनिर्मितं, कविकल्पितं पुराणेतिहासादिषु अप्रसिद्धं निन्दनीयस्य जनस्य जनानां वा चरितम् आश्रित्य हास्यरसप्रधानं रूपकं प्रहसनं भवेत्। किञ्च प्रहसने आरभटी वृत्तिः न भवेत्, तथा विष्कम्भकप्रवेशकौ अपि न भवेताम्। किञ्च वीथ्यङ्गानि अत्र न भवेयुः।

दशरूपकस्य नये प्रहसनं त्रिविधम्। तथाहि–

तद्वत्प्रहसनं त्रेधा शुद्धवैकृतसङ्करैः।
पाखण्डिविप्रप्रभृतिचेटचेटीविटाकुलम्।
चेष्टितं वेषभाषादिभिः शुद्धं हास्यवचोन्वितम्॥ इति।
[दशरूपके–३।५४-५५]

त्रिविधेषु प्रहसनेषु प्रहसनम् इदं शुद्धम्। यतः अत्र पाखण्डी, विप्रः, चेटः, चेटी, विटः प्रमुखानि पात्राणि स्वीयैः व्यवहारैः हास्यप्रयोजकवचोभिः वा हास्यं पुष्णीयुः। अस्मिन् रूपके तु तान्त्रिकस्य चरितं पाखण्डिनः चरितम्। यतः सः अत्र प्रवञ्चनम् एव मुख्यतया करोति।

कपाली कश्चन श्रेष्ठी। स द्विजः भवति। कपालिनः भृत्यः पङ्गुरामनामधेयः चेटः। कपालिनः भृत्या कुब्जा मन्थरा चेटी। एतेषां चेष्टितेन भाषादिभिः च हासः अत्र व्यज्यते। अतः इदं प्रहसनं शुद्धं प्रहसनम्।

एतेषु चरितेषु सूत्रधारस्य, तान्त्रिकस्य, कपालिनः, वैद्यस्य, रङ्गिण्याः च भाषा संस्कृतम् अस्ति। विदूषकस्य, पङ्गुरामस्य, मन्थरायाः च प्राकृती भाषा। चरितानां भाषाविषये नियमः इत्थम्–

पुरुषाणाम् अनीचानां संस्कृतं स्यात् कृतात्मनाम्।
चेटानां राजपुत्राणां श्रेष्ठानां चार्धमागधी।
प्राच्या विदूषकादीनां धूर्तानां स्यादवन्तिजा॥
[साहित्यदर्पणे–६।१५८, १६०-१६१]

२.२. प्रस्तावना

अस्य प्रहसनस्य नान्दी अष्टपदा पत्रावली नान्दी। तस्य विषये विस्तृतं विवेचनम् अन्यस्मिन् प्रबन्धे एव उपस्थापनीयम्। सम्प्रति अस्य प्रस्तावनायाः विचारः प्रस्तूयते।

प्रस्तावना नाम–

नटो विदूषको वापि पारिपार्श्विक एव वा।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते॥
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।
आमुखं तत् तु विज्ञेयं नाम्ना प्रस्तावनाऽपि सा॥
[साहित्यदर्पणे–६।३१-३२]

अत्र अपि नान्द्यन्ते विदूषकेण सूत्रधारस्य संलापः वर्तते। तत्र स्वस्य कृत्यानि कथयद्भ्यां सूत्रधारविदूषकाभ्यां प्रस्तुतस्य प्रहसनस्य विषयः उत्थापितः अस्ति। अस्यां प्रस्तावनायाम् अन्ते सूत्रधारः विदूषकेण सह कपालिनः सादृश्यम् उद्भावयति। ततः उभौ अपि प्रतिष्ठेते। ततः सूचितः कपाली प्रविशति। अतः अत्र अवगलितं नाम प्रस्तावना। तस्य लक्षणम् इत्थं कथ्यते–

यत्रैकत्र समावेशात् कार्यम् अन्यत् प्रसाध्यते।
प्रयोगे खलु तज् ज्ञेयं नाम्नाऽवगलितं बुधैः॥

[साहित्यदर्पणे–६।३८]

यत्र प्रस्तावनायाम् एकस्मिन् विषये उपस्थितस्य अन्यस्य उपस्थाप्यमानस्य च पात्रस्य सादृश्योद्भावनेन पात्रप्रवेशरूपं कार्यं साध्यते तत्र अवगलितं नाम प्रस्तावना बुधैः ज्ञातव्या इति अस्य अर्थः।

२.३. अर्थप्रकृतयः

रूपके अर्थप्रकृतयः यथाविधि योजनीयाः इति नाट्यतत्त्वविदः अभिप्रयन्ति। अर्थप्रकृतयः पञ्च। बीजं, बिन्दुः, पताका, प्रकरी, कार्यम् इति। तथाहि–

अर्थप्रकृतयः पञ्च ज्ञात्वा योज्या यथाविधि।
अल्पमात्रं समुद्दिष्टं बहुधा यद् विसर्पति॥
फलस्य प्रथमो हेतुर्बीजं तद् अभिधीयते।
[साहित्यदर्पणे–६।६५-६६]

रूपके यत् फलत्वेन प्रदर्श्यते तस्य सूक्ष्मरूपेण प्रदर्शनं बीजम् इति उच्यते। अस्मिन् प्रहसने फलं कपालिनः परिवारस्य सर्वैः सदस्यैः बलात् चिपिटकचर्वणव्रतस्य पालनम्। तत् प्रस्तावनायां सूक्ष्मरूपेण सूचितम्। यथा "चिपिटकचर्वणं बलात् कारयित्वा छलात् तन्नामकम्..." इत्यपि सूत्रधारोक्तं वक्तव्यम्। इदम् एव अग्रे विस्तरशः प्रतिपादयिष्यते प्रहसने।

प्रसङ्गतः अत्र इतिवृत्तस्य विषये अपि अल्पशः चर्चामहे। प्रकृते प्रहसने कपाली एव बलात् परिवारसदस्यैः चिपिटकचर्वणं कारयति। अतः फलस्य अधिकारी कपाली। कपालिचरित्राश्रिता कथा अत्र आधिकारिकम् इतिवृत्तम्। तस्य चिपिटकचर्वणव्रतपालने सहायका भवन्ति वैद्यतान्त्रिकादयः। अतः तेषां कथा प्रासङ्गिकं वृत्तम् इति कल्पनीयम्।

वस्तुतः सूत्रधारः नान्द्याः परं मञ्चं समागत्य रूपकस्य इतिवृत्तं, बीजं, मुखं, पात्रम् इत्येतेषु चतुर्षु यथेच्छं वस्तूनि सूचयेत् इति निदानम्। प्रकृतप्रहसने सूत्रधारः कोजागरे चिपिटचर्वणेत्यादिना श्लोकेन चिपिटकचर्वणरूपम् इतिवृत्तं कपाली इति पात्रं च सूच्यते।

अथ बिन्दुः विचार्यते। यत्र कथायाम् अवान्तरप्रसङ्गेन मूलकथायाः धारा छिद्यते तत्र एव पुनः कथायाः अग्रे सारणार्थं किञ्चिद् वचनं वृत्तं वा यदि अग्रिमकथायाः संयोगस्थलं भवति तद् बिन्दुः इति कथ्यते। तथाहि–

अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्॥

[साहित्यदर्पणे–६।६६]

यथा जले पतितः तैलबिन्दुः क्रमशः प्रसरति सर्वं च जलं व्याप्नोति तथा इदं वचनं वृत्तं वा बिन्दुरूपेण आरभ्य विस्तृतं भवति इति कारणेन इदं वृत्तं वचनं वा बिन्दुः इति कथ्यते। अस्मिन् प्रहसने छत्रपादुकयोः क्षेपणात् भृत्याभ्यां भार्यायै च क्रुध्यन् कपाली शुनकमुखात् पादुकाम् आनेतुं बहिः अधावत्। एतेन कथायाः मुख्यं फलं दूरम् अपास्तं दृश्यते। ततः स शुनकेन दष्टः प्रत्यावर्तते। शुनकदंशनकारणाद् एव वैद्यस्य आगमनं ततश्च वैद्ये पलायिते तस्य चिकित्सार्थं तान्त्रिकस्य आगमनेन मुख्यफलस्य अवाप्तिः सञ्जायते। अतः शुनकदंशनम् अत्र बिन्दुः इति अस्माकं मति।

ततः प्रासङ्गिकेतिवृत्तयोः द्वौ भेदौ। पताका प्रकरी च। दशरूपककारः कथयति–

प्रासङ्गिकं परार्थस्य स्वार्थो यस्य प्रसङ्गतः।|
सानुबन्धं पताकाख्यं प्रकरी च प्रदेशभाक्।।

[दशरूपके–१।१३]

एतयोः प्रासङ्गिकेतिवृत्तयोः मध्ये यस्य चरितस्य दीर्घकालं यावद् उपस्थितिः तद् वृत्तं पताका इति कथ्यते। यद् वृत्तं क्वचित् प्रसङ्गे आरभ्य शीघ्रं समाप्यते तत् प्रकरी इति कथ्यते। एतयोः प्रसङ्गयोः नायकस्य सहायका अन्ये भवन्ति। पताकाप्रसङ्गस्य सहायकः पताकानायकः इति, प्रकरीप्रसङ्गे सहायकः प्रकरीनायकः इति च कथ्यते। अनयोः पताकानायकस्य स्वकीयं किञ्चन अवान्तरफलम् अपि वर्ण्यते। किन्तु तत् फलावाप्तिकथनं गर्भसन्धौ विमर्शसन्धौ निर्वहणसन्धौ वा भवति।

पताकानायकस्यापि स्यात् स्वकीयफलान्तरम्।
गर्भे सन्धौ विमर्शे वा निर्वाहस्तस्य जायते।।

[साहित्यदर्पणे–६।६६]

अस्मिन् प्रहसने रङ्गिण्याः चरितं पताकानायकचरितम् इति कथयितुं शक्यते। रङ्गिणी कपालिनः भार्या, किन्तु कपालिना सह तस्याः यः व्यवहारः तत्र शृङ्गारस्य लेशः अपि नास्ति। अपि च रङ्गिण्या सह कपाली सर्वदा कलहायते एव। वस्तुतः रङ्गिणी कपालिनः परिवारस्य चिपिटकचर्वणरूपफलसिद्धौ सहायिका भवति। यतः सा एव तान्त्रिकम् आह्वयति। प्रहसने आन्तं तस्याः उपस्थितिः वर्तते। तस्याः अवान्तरफलम् अपि वर्णितं वर्तते निर्वहणसन्धौ। यथा "लब्धं दशतोलकं सुवर्णं प्रतिवेशिभिर्दत्तम्।"

तान्त्रिकस्य चरितम् अपि पताकाचरितम्। यतः सः अपि कपालिनः कार्यसिद्धौ सहायकः। सः अपि निर्वहणसन्धिं यावत् प्रहसने उपस्थितः अस्ति। तस्य एव कथनेन परिवारजनाः चिपिटकचर्वणे प्रवृत्तः। तस्य च अभीष्टम् आसीत् कपालिनः धनम् अपहृत्य रङ्गिण्यै प्रदानम्। तथाहि "अनुरुद्धोऽहं प्रतिवेशिभिर्यद् इमं महाकृपणं श्रेष्ठिनं वञ्चयित्वा तदीयभार्यायै दीयतां कियांश्चिद् अर्थ इति। ततश्च कृततान्त्रिकपकटवेष एषोऽहं कौशलेन प्रथमं तन्मनः कर्दमवन्मर्दयन् निष्कासयामि सलिलवत् किञ्चिद् धनम्।" निर्वहणसन्धौ तस्य अपि अभीष्टं फलं लब्धम् अस्ति।

अथ यद् अवान्तरवृत्तम् अल्पेन कालेन अवसीयते तत् प्रकरीवृत्तम् इति कथ्यते। तस्य वृत्तस्य नायकसहायकचरितं हि प्रकरीनायकः। अस्य किञ्चिद् अपि फलं न वर्ण्यते।

प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता।
प्रकरीनायकस्य स्यान्न स्वकीयं फलान्तरम्॥
[साहित्यदर्पणे–६।६७]

अस्मिन् प्रहसने वैद्यस्य चरितं प्रकरीनायकस्य चरितम्। वैद्यः मध्ये प्रविश्य किञ्चित्कालं स्थित्वा उपरमते। तम् आश्रित्य किञ्चन वृत्तम् अपि घटते। स वस्तुतः विषविकारसूचनेन रङ्गिणीम् उद्वेजितवान्। तेन उद्विग्ना रङ्गिणी एव विषविकारनाशाय तान्त्रिकम् आह्वयत्। अतः परोक्षतः वैद्यः कार्यसिद्धौ सहायकः जातः। क्षतस्थानस्य दाहस्य व्यवस्थायै निर्गतायां रङ्गिण्यां कपाली शुनकायमानः वैद्यं भाययित्वा दर्शनीं विना एव तं विताडितवान्। तेन वैद्यस्य किञ्चिद् अपि फलं न लब्धम्। अतः वैद्यस्य चरितं प्रकरीनायकस्य चरितम् इति कथनं युज्यते।

अथ कार्यम्। कार्यं नाम प्रहसनस्य फलरूपेण वर्णितं वस्तु। अत्र कार्यं तु परिवारस्य बलात् सर्वेषां चिपिटकचर्वणम्।

अपेक्षितं तु यत् साध्यम् आरम्भो यन्निबन्धनः॥
समापनं तु यत्सिद्ध्यै तत्कार्यम् इति सम्मतम्।
अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः॥
आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः।
भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्धये॥
प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वितः।
उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः॥

अपायाभावतः प्राप्तिनियताप्तिस्तु निश्चिता।
सावस्था फलयोगः स्याद्यः समग्रफलोदयः॥
[साहित्यदर्पणे–६।६९-७३]

यत् फलम् उद्दिश्य प्रयत्नः आरभ्यते यस्य प्राप्त्या च कथा समाप्यते तद् एव रूपके फलम्। अत्र फलं चिपिटकचर्वणम् इति स्पष्टीकृतं पूर्वम्। तस्य कार्यस्य पञ्च अवस्थाः भवन्ति। आरम्भः, यत्नः, प्राप्त्याशा, नियताप्तिः, फलागमः च।

फलावाप्तये यत् औत्सुक्यं जायते तत् **आरम्भः** इति कथ्यते। प्रकृतप्रहसने तान्त्रिकेण उक्तं, "शान्तिकाले गृहजनानां केनापि नान्नं न गोधूमचूर्णं न दुग्धं न घृतं न फलं मिष्टान्नं वा भोक्तव्यम्। केवलं चिपिटकचर्वणं कुर्वीत गृहजनः।" इदम् एव **आरम्भावस्था** कार्यस्य।

फलसिद्धये यत् किञ्चिद् विशिष्टं प्रयतनं विधीयते तत् **प्रयत्नः**। यदा तान्त्रिकेण प्रचोदितः कपाली "मम जीवनरक्षार्थं मासत्रयमात्रं चिपिटकचर्वणव्रतं पालनीयम्। न केवलं मम तव वा अपि तु मन्थरायाः पङ्गुरामस्य च तथैव भोजनं विधेयम्" इति सर्वेभ्यः परिवारजनेभ्यः निर्देशं प्रयच्छति त्रीन् मासान् चिपिटकचर्वणाय तद् एव **प्रयत्नावस्था** फलस्य।

यदा कार्यसिद्धौ उपायः अपि दृश्यते अपायः अपि दृश्यते तथा च उभयोः तुल्यबलतया फलप्राप्तौ संशयः उत्पद्यते सा अवस्था **प्राप्त्याशा** इति कथ्यते। रङ्गिणी गृहं त्यक्त्वा गच्छति इति कारणेन फलप्राप्तेः अपायः दृश्यते। एवं दशायां यदा रङ्गिण्यै सुवर्णं दित्सुः तान्त्रिकः दशतोलकसुवर्णं घटात् चोरयति तदा उपायः परिदृश्यते। अतः अयम् अंशः **प्राप्त्याशा** कथ्यते। एवम् उपायापायशङ्काभ्यां फलप्राप्तौ शङ्का उपतिष्ठते तस्याम् अवस्थायां तान्त्रिकः कथयति यत्, "अलं परिदेवितेन। पुनर्दीयतां विंशतितोलकं सुर्वणं तेन ते षष्टितोलकसुवर्णलाभो भवेत्।" इति कथनेन प्राप्तिसम्भवः सूच्यते। यतः चिपिटकचर्वणं विना सुवर्णलाभः न सम्भवेत्। अतः सुवर्णलाभसूचनेन तत्कारणीभूतस्य चिपिटकचर्वणस्य अपि सिद्धिः भविष्यति इति सूचितं भवति। एवम् अस्मिन् प्रहसने **प्राप्त्याशावस्था** फलस्य।

यत्र अपायाभावात् फलप्राप्तौ निश्चयः सूच्यते तत् **नियताप्तिः** इति उच्यते। तान्त्रिकः कथयति, "त्वं स्वयं वा त्वदीया भार्या वा नष्टं सुवर्णम् अवश्यं प्राप्स्यति।" एतेन भार्यायाः रङ्गिण्याः प्रसादेनेन अपायसम्भावनाया उन्मीलनं सूच्यते इति कृत्वा इयं **नियताप्तिः** अवस्था फलस्य चिपिटकचर्वणरूपस्य।

यदा सम्पूर्णं फलं सिध्यति तदा **फलागमावस्था**। यदा तु रङ्गिणी प्रतिवेशिभिः सुवर्णं प्राप्य चिपिटकचर्वणे श्रद्दधाना चिपिटकचर्वणम् अङ्गीकरोति दासौ च तथा कर्तुम् अङ्गीकुरुतः तदा **फलागमः** सूचितः भवति।

२.४. सन्धिः सन्ध्यङ्गानि च

प्रहसने द्वौ सन्धी तयोः च सन्ध्यङ्गानि भवेयुः। अत्र मुखसन्धिः निर्वहणसन्धिः च भवेताम्।

यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवा॥
प्रारम्भेण समायुक्ता तन्मुखं परिकीर्तितम्।
[साहित्यदर्पणे–६।७६-७७]

विविधैः रसैः यत्र बीजस्य सूचना क्रियते तत् मुखसन्धिः भवति। अत्र प्रस्तावनायाम् एव मुखसन्धिः वर्तते। तत्र बीजसूचनं कथम् इति सूचितं पूर्वम्।

मुखसन्धौ सूचितं बीजं विविधवृत्तैः विकीर्णं यत्र एकीकृतं भवति तत् निर्वहणसन्धिः इत्युच्यते। अत्र प्रहसने "गुरो! पूर्वम् अज्ञानतः प्रत्याख्यातं चिपिटकचर्वणव्रतं करोमि। जीवय मम पतिम्" इति वाक्येन रङ्गिण्या उच्चारितेन फलं सूच्यते इति तद् एव निर्वहणसन्धिः अत्र।

अथ मुखसन्धेः अङ्गानि विचारयामः। मुखसन्धेः द्वादश अङ्गानि। तथाहि–

उपक्षेपः परिकरः परिन्यासो विलोभनम्॥
युक्तिः प्राप्तिः समाधानं विधानं परिभावना।
उद्भेदः करणं भेद एतान्यङ्गानि वै मुखे॥
[साहित्यदर्पणे–६।८१-८२]

उपक्षेपः नाम काव्यार्थस्य समुत्पत्तिः। अस्मिन् प्रहसने "कुटुम्बिन्या बलात्कारेण नारिकेलखण्डमिश्रचिपिटकचर्वणं कारितोऽस्मि दारिद्र्यदुःख-प्रशमनार्थम्" इति विदूषकस्य वाक्यम् **उपक्षेपः**।

प्रकृतप्रहसने "कोजागरे चिपिटचर्वणकर्मणा" इत्यादौ श्लोके बहूनि मुखसन्ध्यङ्गानि सूचितानि सन्ति। तानि विचारयामः। समुत्पन्नस्य अर्थस्य बाहुल्यसूचनम् एव **परिकरः**। यथा कोजागरे इत्यादिना श्लोकेन **चिपिटचर्वणकर्मणा** धनं लभस्व इति विशिष्टफलोदयसूचनेन बीजस्य दृढीकरणं क्रियते। **परिन्यासः** समुत्पत्तौ सूचितस्य अर्थस्य दृढतया निश्चयः। अस्य

श्लोकस्य आरम्भे "गृहिण्या अनुग्रहात्" इति कथनेन गृहिण्याः रङ्गिण्याः उपक्रमेण एव चिपिटचर्वणं कपालिनः भविता इति सूचनाद् अत्र **परिन्यासः**। फलस्य गुणाख्यानं **विलोभनम्**। अत्र चिपिटचर्वणकर्मणा श्रेष्ठी कपाली धनम् अपि अलभत इति सूचनेन गुणाख्यानं विहितम्। अतः इदं **विलोभनम्**। कर्तव्यस्य सम्प्रधारणं– नाम निश्चयः– एव **युक्तिः**। अत्र तथा किमपि वचनम् अस्माभिः न परिलक्षितम्। **प्राप्तिः** इत्युक्ते सुखलाभः। बलात् चिपिटकचर्वणं कारितः इति उक्त्वा यदा विदूषकः म्लायति स्म तदा सूत्रधारः "धन्योऽसि त्वं यस्यैवंविधा गृहिणी" इति वचनेन सुखावाप्तिः सम्भाव्यते इति कृत्वा इदं **प्राप्तिः** इति मन्तुं शक्यते। **समाधानं** नाम सूक्ष्मतया सूचितस्य बीजस्य दृढतया प्रतिपादनम्। सम्पूर्णः श्लोकः एव **समाधानरूपं** सन्ध्यङ्गम्। **विधानम्** इत्युक्ते सुखदुःखमिश्रः अर्थः। अत्र "विद्यालवेन रहितः अपि भवेः समृद्धः" इति कथनेन मूर्खत्व-समृद्धत्व-सूचनात् **विधानम्** इति भवति। कुतूहलभूयिष्ठा वाक् **परिभावना**। अत्र तथा कुतूहलसूचकस्य वाक्यस्य अभावात् परिभावना न वर्तते। **उद्भेदः** इत्यस्य बीजार्थस्य प्ररोहः इत्यर्थः। अत्र बीजार्थस्य चिपिटचर्वणरूपकर्मणः मूलभूतस्य गृहिण्यनुग्रहस्य सूचनरूपं वचनम् **उद्भेदः**।

करणं नाम प्रकृतार्थसमारम्भः। "तन्नाहम् एतस्य मुखम् अपि द्रष्टुम् अभिलषामि" इति कथनेन कपालिनः समागमनं सूच्यते। तस्माद् इदं वचनं **करणम्**। **भेदः** नाम संहतिभेदनम्। प्रकृते प्रहसने "अहम् अप्यस्य दर्शनपथं परिहरामि" इति सूत्रधारस्य वचनेन विदूषकसूत्रधारयोः मार्गभेदः सूचितः भवति इति कृत्वा इदं **भेदरूपं** सन्ध्यङ्गम्।

अथ निर्वहणसन्धेः अङ्गानि। तानि च चतुर्दश–

सन्धिर्विबोधो ग्रथनं निर्णयः परिभाषणम्।
कृतिः प्रसाद आनन्दः समयोऽप्युपगूहनम्॥
भाषणं पूर्ववाक्यञ्च काव्यसंहार एव च।
प्रशस्तिरिति संहारे ज्ञेयान्यङ्गानि नामतः॥
[साहित्यदर्पणे–६।१०८-१०९]

मुखसन्धौ सूचितस्य बीजस्य निर्वहणे पुनः स्मारणं **सन्धिः** नाम निर्वहणाङ्गम्। प्रकृतप्रहसने "केवलं चिपिटकचर्वणं कुर्वीत गृहजनः" इति वाक्यं **सन्धिः**। कार्यस्य अन्वेषणम् एव **विबोधः** नाम निर्वहणाङ्गम्। अस्मिन् प्रहसने तादृशं वचनं न दृश्यते। कार्यस्य उपक्षेपणम् **उपन्यासः**। "मम जीवनरक्षार्थं मासत्रयमात्रं चिपिटकचर्वणव्रतं पालनीयम्" इति वचनम् **उपन्यासः**। अनुभूतस्य अर्थस्य कथनं निर्णयः। "नाग्निर्नेन्धनम्" इत्यादिना वाक्येन

निर्णयः सूचितः भवति। निन्दावचनं **परिभाषणम्**। "जलार्द्रञ्च चिपिटकम्" इत्यादिः श्लोकः एव परिभाषणम्। फलसिद्धौ दुःखोपशमः एव **कृतिः**। अत्र तु तान्त्रिकस्य "पश्य सर्वेषां सुबुद्धिरागता" इति वचनं **कृतिः**। शुश्रूषादिकथनं प्रसादः। यथा पङ्गुरामेण निद्रितस्य कपालिनः पादयोः पादुकाधारणम्। वाञ्छितसम्प्राप्तिः एव **आनन्दः**। "लब्धं दशतोलकसुवर्णं प्रतिवेशिभिर्दत्तम्" इति **आनन्दः**। दुःखस्य अपगमः **समयः**। यथा अत्र प्रहसने कपालितान्त्रिकयोः संलापं पश्यामः–

तान्त्रिकः– अलं परिदेवितेन। पुनर्दीयतां विंशतितोलकं सुवर्णं तेन ते षष्टितोलकसुवर्णलाभो भवेत्।

कपाली– गुरो! अपि सत्यम्? पुनरपि नष्टं धनं लप्स्ये?"

अयम् अंशः अत्र **समयः** इति वक्तुं शक्यते। अद्भुतसम्प्राप्तिः **उपगूहनम्**। यथा अत्र "सुवर्णम् अपि द्रवीभूतम्" इति कथनेन अद्भुतरसः व्यज्यते। तथा च प्रतिवेशिभिः अनिरीक्षिततया प्रदत्तं सुवर्णं रङ्गिण्यै। तेन अपि विस्मयः सूच्यते। अतः अयम् अंशः **उपगूहनम्**। सामदानादिकम् एव **भाषणं** नाम निर्वहणाङ्गम्। यथा "अथ किम्! त्वं स्वयं वा त्वदीया भार्या वा नष्टं सुवर्णम् अवश्यं प्राप्स्यसि" इति वाक्यम्। **पूर्ववाक्यं** नाम पूर्वोक्तस्य वाक्यस्य पुनःस्मारणम्। अत्र "तव दासेन पादुकारोपणेन पूजाद्रव्यं सर्वं विनाशितम्। सुवर्णम् अपि द्रवीभूतम्।" इति वाक्येन पूर्वम् उक्त एव अर्थः पुनः स्मारितः इति **पूर्ववाक्यम्** इदम्। "किम् अतः परम् अपि प्रियं करोमि" इति **काव्यसंहारः** भरतवाक्यं च **प्रशस्तिः** इति चतुर्दशसु विबोधातिरिक्तानि सर्वाणि निर्वहणाङ्गानि व्यवस्थितानि।

यद्यपि प्रहसने लास्याङ्गानां प्रयोगः उक्तः अस्ति। किन्तु अस्मिन् प्रहसने दशसु लास्याङ्गेषु स्थितपदम् उत्तमोत्तमकम् इति द्वे एव लास्याङ्गे वर्तेते। यथा मन्थरा-पङ्गुरामयोः दण्डादण्डिकाले क्रोधपरिपूर्णं प्राकृतभाषणं स्थितपदम्। "क्रोधोद्भ्रान्तस्यापि प्राकृतपठनं स्थितपाठ्यम्" इति हि अभिनवगुप्तवचनम्। क्रोधप्रसादयुक्तं रसमयं निन्दावचनम् उत्तमोत्तमकं भवति। यथा अत्र "अयि चूताष्ठिलम्बचिबुके" इति आरभ्य "तद् गम्यताम्" इति यावत् कपालिनः भर्त्सनवचनं, चिपिटकनिन्दनरूपं रङ्गिण्याः उक्तः श्लोकः, "सक्तुं चिपिटकम्" इत्यादिः कपालिप्रयुक्तः श्लोकः चेत्यादयः। यद्यपि अत्र साक्षाद् एव सङ्गीतस्य प्रयोगः न कृतः। तथापि एतादृशानां श्लोकानां रागेण गेयमानत्वेन लास्याङ्गत्वेन प्रयोगः कथञ्चिद् उपपादनीयः।

बहुत्र संस्कृतबहुलः वाग्व्यापारः दृश्यते इति भारतीवृत्तेः प्रयोगः अत्र सुस्पष्टः वर्तते। यद्यपि आरभट्याः वृत्तेः निषेधः प्रहसने कृतः। किन्तु प्रकृते प्रहसने मन्थरा-पङ्गुरामयोः

दण्डादण्डिवर्णने **सम्फेटाख्यस्य** आरभटीवृत्तिविशेषस्य तथा भयात् पङ्गुरामस्य पलायने **अवपातनामकस्य** आरभटीविशेषस्य प्रयोगः कविना विहितः दृश्यते। प्रहसनस्य एकाङ्कत्वेन सामान्यतः अर्थोपक्षेपकाणां प्रयोगः अत्र वर्जितः एव भवति। अत्र अपि तथैव दृश्यते। एतद् विहाय अपि अत्र विविधानि लक्षणानि, नाट्यालङ्कृतयः च यथायथं वर्तन्ते। तानि सुधीभिः यथायथं विचारणीयानि। रूपकेऽस्मिन् सर्वेषां लास्याङ्गानां प्रयोगः न विद्यते। तस्मात् सम्पूर्णं प्रहसनलक्षणं रूपकेऽस्मिन् न वर्तते चेद् अपि इदं प्रहसनम् एव। यतः प्रहसनलक्षणानाम् अधिकानाम् अत्र समन्वयः भवति एव।

३. अर्वाचीननाट्यशास्त्रदृष्ट्या विचारः

अर्वाचीननाट्यसमालोचनदृशा इदं हास्यरसाश्रितं वृत्तं (extravaganza) भवति। प्रहसनस्य आरम्भतः अन्तं यावत् नायकस्य कपालिनः अन्यैः सह सङ्घातेन conflict कथावस्तु परिपुष्टं भवति। सर्वाणि अपि चरित्राणि अत्र सरलचरित्राणि (flat characters) सन्ति। अत्र प्रहसने त्रिविधम् ऐक्यम् अपि वर्तते। यथा कालैक्यं (unity of time), स्थानैक्यं (unity of place), वृत्तैक्यं (unity of action) च। अत्र एकस्मिन् एव काले सर्वं वृत्तं प्रवर्तते इति कृत्वा कालैक्यं वर्तते। कपालिनः गृहे एव सर्वं प्रहसनं प्रवर्तते। अतः स्थानैक्यम् अपि वर्तते। रूपकस्य वृत्तं चिपिटकचर्वणाय एव प्रारब्धं तद् अनुसृत्य एव प्रवर्तते। अतः वृत्तैक्यम् अपि वर्तते।

४. उपसंहारः

न्यायव्याकरणादिषु शास्त्रेषु नदीष्णानाम् अपि श्रीजीवन्यायतीर्थानां काव्यसर्जने पटिमा सहृदयहृदयावर्जकः आसीद् इति प्रकृतप्रहसनस्य विचाराज् ज्ञायते। विचित्रकल्पनया प्रणीतम् इदं प्रहसनं प्रेक्षकान् हास्ये निमज्जयद् अपि समाजस्य विशिष्टाः समस्याः व्यञ्जनया सूचयति। इदं प्रहसनं बहुत्र बहुभिः नटितम् अपि अस्ति इति कृत्वा अस्य नटनयोग्यता अपि विदुषां परितोषम् आवहति। संस्कृतवाङ्मये अङ्गुलिगणनीयेषु प्रहसनेषु इदं विशिष्टं स्थानं भजते इति निश्चप्रचं वक्तुं शक्यते।

संस्कृतसाहित्ये अनभीप्सितमिति गद्यकाव्यस्य सामाजिकसमीक्षणम्

सौम्या पाण्डेय

साहित्य-अकादमी पुरस्कारेण पुरस्कृतं नवाधिकद्विसहस्रेशवीयाब्दे (2009) कथासंकलनमनभीप्सितमिति। अस्य कथासंकलनस्य प्रणेतारः डॉ प्रशस्यमित्रशास्त्रिमहाभागाः वर्तन्ते। अस्मिन् कथासंग्रहे द्वादश कथाः संकलिताः वर्तन्ते। आसु कथासु समसामयिकसमस्यानां मनोवृत्तीनां परिवेशाणाञ्च सम्यक् रीत्या प्रतिपादनमस्ति। विशेषरुपेण नारीणां समस्या संवेदनशीलता चैव सर्वासां कथाणां केन्द्रबिन्दुः वर्तते, केवलं गुण्डा-गुरुसिंहः इति नाम्ना कथामपवर्ज्य। लेखकवर्येण समाजस्य सामाजिकप्रवृत्तीनां जीवनमूल्यानाञ्च स्वाभाविकवर्णनं प्रस्तूयते कथासंकलने। यथा-अमृता स्मृतिः इति नाम्नी कथायां सुमनोलता भणति-

"किं ते तावत्पर्यन्तं गृहद्वारि आतपे एव स्थास्यतः? किं ते बहिः प्रकोष्ठे समुपवेश्य शीतलजलादिभिः सत्कर्तव्ये? परन्तु पुनर्मम स्वार्थमिदं चिन्तनं प्रबलीभूतं येन मया विचारितं यत् व्यर्थमेव **एतस्मिन् सर्वस्मिन् औपचारिककर्मकाण्डे समयस्य हानिः भवेत्** अतः ते शीघ्रमेव इतः प्रस्थापयितव्ये"।[93] आसु पङ्क्तिष्वद्यतनस्य समाजस्याव्यावहारिकतायाः स्पष्टरुपेण प्रतिपादनं वर्तते । आधुनिक चलचलायमानपरिवेशे प्रायः सर्वे एतावन्ताः व्यस्ताः संजातः यत् ते स्वपरम्परामाचारमेव च विस्मृतवन्तः। या अस्माकं "अतिथि देवो भव"[94] इति परम्परा वर्तते तस्याः तु विखण्डनमेव।

लेखकवर्येण समुदीरितं- "स्वजनकस्य समृद्धिकारणात् सामर्थ्यकारणाद् वा किमपि प्राप्तुम् अनुचितम्। तत्र **स्वोपार्जितयोग्यताकारणात् भवान् किं प्राप्तुं शक्नोतीति वास्तविकं जीवनम्।** येषु स्वाभिमानः न भवति ये वा योग्यता-विहीनाः भवन्ति ते एव स्ववंशस्य जनकस्य तेषां सामर्थ्यस्य वा समाश्रयं गृहणन्ति"।[95] स्वपितुः नाम्नः वंशनाम्नः वा आलम्बनमागृह्य सफलतां प्राप्नुवन्ति ये ते स्वाभिमानहीनाः मदयुक्ताःच जनाः प्रायः वास्तविकं जीवनमेव नावगच्छन्ति । सम्प्रति भ्रष्टाचारस्य मूले नैतिकतायाः ह्रासः सर्वप्रमुखः। तथोपर्युदीरितानि वाक्यानि अस्य स्पष्टोदाहरणानि।

---

[93] अनभीप्सितम्, पृ0सं0-12

[94] तैत्तिरीयोपनिषद्, 1.11

[95] अनभीप्सितम्, पृ0सं0-14

"**मानवेन जीवनार्थं कापि स्वकीया विशिष्टा दृष्टिः ग्रहीतव्या**। तस्य केनचित् निजेन विचारेण भवितव्यम्। जीवनस्य केनचित् प्रयोजनेन भाव्यम्। कश्चित् कार्यक्रमः भवेत्। इदं तु किमपि नास्ति यत् भवता जीवनं प्राप्तं, किमपि पठितं, लिखितं, विवाहः कृतः, सुताः सम्पादिताः, पुनः कस्मिश्चिद् दिवसे स्वर्गं प्रस्थितः।संसारेण तु इदमेव न ज्ञातं यद् भवान् कदा समुत्पन्नः, किं कृतवान्, क्व गतवान्, कदा च संसारमिमं परित्यज्य स्वर्गं प्राप्तवान् **इति।अथ च भवतः संसारस्य कृते किं योगदानं वर्तते? इति चिन्तयतु**..."।[96] समाजे प्रायः सर्वे एतादृशमेव विचारयन्ति यदन्ये किं कृतवन्तः ममार्थम्। ते कदापि नैतद् चिन्तयन्ति यत् तैः किं क्रियते समाजस्य कल्याणार्थम्। क्वापीत्यनेनैतदाह यत् पूर्वमात्मानं पश्यतु। हास्यास्पदमिदं यत् ते स्वदुःखेन दुखिताः न, अपितु स्वप्रतिवेशिनस्य सुखेन दुखिताः।

"मम मस्तिष्के परिश्रमस्य सत्यनिष्ठायाः सदाचरणस्य च ये संस्काराः समाहिता वर्तन्ते ते संस्कारा एव साम्प्रतं मम हितं साधयन्ति। यद्यहम् एतैः संस्कारैः संयुक्तो न अभविष्यं तर्हि संसारस्य जनसम्मर्दे क्वचिदपि विलीनो भूत्वा अन्तर्हितोऽभविष्यम्। **साम्प्रतं मयाऽनुभूयते यत् धनोपार्जनस्य कृते स्वसत्यनिष्ठायाः विक्रयणम् उपेक्षणं वा कथमपि नैव आवश्यकम् प्रत्युत कथंचित् सत्यनिष्ठा साधिका एव प्रतिभाति**"...।[97] एताः पङ्क्तयः सम्प्रति समाजे एका नवीना दृष्टिः प्रददति। यत्र समाजे नकारात्मकतायाः भ्रष्टाचारस्य चैव वार्तालापे प्रमुखस्थानं विद्यते तत्र सत्यनिष्ठायाः परिश्रमस्य सदाचरणस्य च महत्त्वं वर्णयित्वा शास्त्रिणा समाजे सकारात्मकतां भारतीयसंस्कृतेः अक्षुण्णप्रतिष्ठां चालोकितमिव कुरुते। संस्कृतवाङ्मये प्रशंसितमपि-

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः,
दैवेन देयामिति का पुरुषा वदन्ति।
दैवं निहत्य कुरू पौरुषामात्मशक्त्या
यत्ने कृतेऽपि यदि न सिद्धयति कोऽत्र दोषः ।।[98]

लेखकमहाभागेन उपहासरूपे अतिगाम्भीर्ययुता वचनाः उच्यन्ते - "जनानाम् अवधानं चिन्तनं विचारं वा गणयित्वा अहम् अस्मिन्नेव वयसि आत्मानं वृद्धवत् प्रत्येतुं नेच्छामि, न वा प्रौढ़वत् प्रतिभासितुम् इच्छामि।त्वमपि एतद् न चिन्तयस्व यत् तव विषये

[96] अनभीप्सितम्, पृ0सं0-14-15
[97] तदेव, पृ0सं0-49-50
[98] पञ्चतन्त्र, 2/137

जनाः किं कथयन्ति, किं वा विचारयन्ति। अत्र कदापि ध्यानं न कुरुष्व। **जनानां चिन्तनं परिहरस्व। अन्यथा अभिरूपतमायाः नायिकायाः स्थाने त्वमपि वृद्धानायिकायाः स्थानम् अवाप्स्यसि**"।[99] कथितमपि मनुस्मृतिकारः-

"सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतद्विद्यात्समासेन लक्षणं सुखदुःखयोः" ।।[100]

सुखदुःखयोश्च भावानामनभूतिः स्वमनैव भवति यथा-

"कस्तूरी कुंडल बसै, मृग ढूढै वन माहि।
ऐसे घट घट राम हैं, दुनिया देखे नाहि" ।।[101]

श्रीमद्भगवद्गीतायां श्रीकृष्णः उवाच-

"उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः" ।।[102]

अतएव जनाः किं कथयिष्यन्ति एतदपेक्षया स्वकर्मस्य शुचितोपर्यवधानं दद्यात्।

'यान् बालकान् अहं पालितवती, वर्धितवती, पाठितवती च ते एव माम् एकाकिनीम् अस्मिन् वृद्धाश्रमे परित्यज्य गताः- **"भवती अत्र समानवयः सम्पन्नाभिः महिलाभिः समम् अधिकां प्रसन्नतां प्राप्स्यति"** इति कथयन्तः'।[103]

अधुनेयं विषमविडम्बनैव यत् स्व पितरौ वृद्धाश्रमे परित्यज्य जनाः स्व कर्तव्यस्य इतिश्री कुर्वन्ति। नैतिकह्रासस्योदाहरणं त्वस्त्येवेयं स्थितिः मानवतायाः अपि निकृष्टा श्रेणी।

"अहम् एतद् ज्ञातुम् इच्छामि यत् **पुत्राणां जीवनचर्यायां मातापित्रोः उपस्थितिः किं समुद्विग्नतादायिका वैमनस्यवर्धिका कष्टकारिका च भवेत्?** वस्तुतः तु तयोः उपस्थितिः सम्बन्धं सुदृढ़मेव विरचयति। पुनः कथं खलु पुत्राणां कृते पितरौ भारभूतौ

---

99 अनभीप्सितम्, पृ0सं0-57

100 मनुस्मृतिः, 4/160

101 कबीर ग्रन्थावली

102 श्रीमद्भगवद्गीता, 6/5

103 अनभीप्सितम्, पृ0सं0-75

प्रतिभातः?"।[104] यथार्थरुपेणायं न केवलमेकैव मातुः प्रश्नः वरनधिकांश मातृ-पितृणां चायमैव प्रश्नः। अयम् न केवलं प्रश्नः अपितु हृदयाघातः वर्तते अस्माकं समाजे भारतीयसंस्कृतोपरि च। यथा- तैत्तिरीयोपनिषदि[105] ये कथने विद्येते "मातृदेवो भव, पितृदेवो भव" ते तु समाजात् विलुप्ते अभवताम्। अत्र कस्य दोषः- एतद् अन्वेषणीयम्। यथा कथायां लेखकेन लिखितम्-

"नाहं ज्ञातुं पारये **यदत्र कस्य दोषं कथयेयम्**? **भाग्यस्य दोषः, आधुनिकसमाजव्यवस्थायाः विडम्बना? उत संस्काराणाम् अभावः? के खलु वर्तन्तेऽत्र दोषभाजः?"**106

समाजे प्रायः जनाः कथयन्ति यत् मातापितरौ किमधिकं कृतवन्तौ तौ तु केवलं स्व कर्तव्यस्य पालनमेव विहितवन्तौ। कथायां-

"भवन्तौ मां पालयित्वा किंविधम् उपकारं कृतवन्तौ? एतत् सर्वं तु संसारे सर्वे अपि मातापितरः पुत्रार्थं कुर्वन्ति एव"[107] इति। वस्तुतः ते सेवाभावस्य माहात्म्यमेव न जानन्ति।

(माता चिन्तयति)- "साम्प्रतं प्रतीयते यत् सर्वेशः (पुत्रनाम) सत्यमेव कथितवान् इति। अस्माभिः किमपि न कृतं तेभ्यः। साम्प्रतं विचारयामि यत् **एवंविधयोः पुत्रयोः परिपालनात् अपि, यदि कश्चित् पशुरेव अस्माभिः पालितः अभविष्यत् तर्हि सः अस्मान् प्रति निश्चयेन कृतज्ञताभावभरितः अभविष्यत्"** ।[108]

पुनरपि माता स्वपुत्रान् शापमपशब्दं वा न कथयति। अनिष्टमपि न वाच्छति स्वप्नेऽपि स्वपुत्रस्य माता। कथायाम्-

"यदा एतयोरपि सुताः वृद्धिं प्राप्स्यन्ति तदा तौ इदमेव अनुभविष्यतः यत् **मातापितृपदप्राप्तिस्तु सरला, परन्तु तत्कर्तव्यतानिर्वाहः नितरां कठिनः** इति। यदा स्वकीयं सर्वस्वं हूयते तदा एव पुत्राः स्वावलम्बिताम् अधिगच्छन्ति। अस्तु, भगवन्तं प्रार्थये यत् तयोः जीवने एतादृशः समयः न आगच्छेत् यश्च साम्प्रतं मया अत्र वृद्धाश्रमे प्राप्तः । अहं

---

[104] तदेव, पृ0सं0-75-76
105 तैत्तिरीयोपनिषद्, 1/11
106 अनभीप्सितम्, पृ0सं0-76
107 तदेव
108 तदेव

किं कुर्याम्? **मातृत्वकारणात् सुतान् अधिकृत्य शापशब्दमपि समुच्चारयितुं न प्रभवामि। पुत्राः महत् दुष्टत्वम् आचरेयुः चेदपि पितरौ तु स्वगरिमाणं महिमानं वा हातुं न अर्हतः**। उक्तमपि शास्त्रेषु- **'कुपुत्रो जायेत क्वचिदपि कुमाता न भवति'** इति"[109] अतएव उच्यते – **"जननी जन्मभूमिश्च स्वर्गादपि गरीयसी" इति**। किं बहुना यदि एकोऽपि पुत्रः सुपुत्रः अभविष्यत् तर्हि नैर्म्मल्यमिव अभविष्यनशेषकुलस्य जीवनम्। उक्तमपि-

एकेनाऽपि सुपुत्रेण विद्यायुक्तेन साधुना।
आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी।।[110]

"कश्चित् पुरुषः स्त्रियाः सहचरः सहभागी वा भवितुमर्हति परन्तु कस्याश्चित् स्त्रियाः अन्तिमं लक्ष्यं ध्येयं वा पुरुष एव वर्त्तते इति न सम्यक्" ।[111] कोऽपि जीवने सहायकः भवितुं तु अर्हति परं एकमात्रजीवनाधेयं भवितुं न शक्नोति। साम्प्रतिकसमाजे महिलासशक्तीकरणस्य विचारः सर्वत्र व्याप्तमस्ति तथा एतादृक् स्थितौ एनं विचारं प्रति प्रतिनिधित्वमेव व्यपदिशति उपर्युक्तकथनः। अस्माकं परम्परा विद्यते यत्-

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राऽफलाः क्रियाः।।[112]

निष्कर्षतः कथासंग्रहे लेखकवर्येण जीवने सन्दिश्यमानसामाजिकसमस्यानां प्रधानेन नैतिकपक्षाणां सुचारुरूपेण वर्णनं कृतम्। यत्र एकतः नैतिकतायाः ह्रासः, मातापितरौ प्रति संततीनामुपेक्षा, स्त्रीणां जीवनसंघर्षः, भ्रष्टाचारः तथा भारतीयसंस्कृतेः विखण्डनं वर्णितं तत्रैव सत्यनिष्ठायाः, परिश्रमस्य, सदाचारस्य च महत्त्वं प्रतिपादयित्वा शास्त्रिणा समाजे सुसमन्वयमेव प्रतिष्ठापितः। किं बहुना शिक्षायां नैतिकतायाः सुस्थापनं समसामयिककालस्यातितरामावश्यकता प्रवर्तते । कथितमपि मनुना - **"आचारः परमो धर्मः"**[113]तथा सदाचारस्य परिभाषामपि दीयते–

---

[109] तदेव, पृ0सं0-76-77

[110] चाणक्यनीतिदर्पणम्, पृ0सं0- 34

111अनभीप्सितम्, पृ0सं0-103

112 मनुस्मृतिः,03/56

[113] तदेव, 19/108

तस्मिन्देशे च आचारः पारम्पर्य्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते ।।[114]

[114] तदेव, 02/18

ādibhaṭlanārāyaṇadāsasya kāśīśatakasya viśleṣāṇātmakam adhyayanam

An analytical study of Kasisatakam a travelogue authored by Adibhatla Narayanadasu

डॉ. के. वरलक्ष्मीः
उपनिदेशिका
संस्कृत अकादमी, उस्मानियाविश्वविद्यालयः,
हैदराबाद, तेलङ्गाणा
varalakshmihari@gmail.com

परिचयः – लौकिकसंस्कृतवाङ्मये मुक्तककाव्यानि महत्त्वपूर्णस्थानं वहन्ति। मुक्तककाव्यस्य लक्षणम् अग्निपुराणे उल्लिखितमित्थम् –

'मुक्तकं श्लोकं एवैकश्चमत्कारक्षमः सताम्।'अग्निपुराणम् – 337.36

मुक्तककाव्ये चमत्कारक्षमता प्राधान्यं भजति। मुक्तककाव्यानि शृङ्गाररसप्रधानानि भक्तिरसप्रधानानि स्तोत्रपरकाणि च भवन्ति। मयूरकवेः सूर्यशतकं, बाणस्य चण्डीशतकं, भर्तृहरेः नीतिशतकं, शृङ्गारशतकं वैराग्यशतकम् इत्यीदीनि नैकानि मुक्तककाव्यपरम्परायाम् विराजन्ते। शतककाव्ये शतं श्लोकाः भवन्ति। कदाचित् शताधिकाः श्लोकाः अपि भवन्ति। श्रीमदज्जाडादिभट्लनारायणदासेन विरचितं 'काशीशतकं' मुक्तककाव्यपरम्परायामेव अन्तर्भवति। श्रीमदज्जाडादिभट्लनारायणदासः हरिकथापितामहः इति प्रथितः। सः बहुभाषाकोविदः।

आधुनिकरचनासम्प्रदाये 'Travelogue literature' यात्रावृत्तम् इति यत् व्यवह्रियते तदेव 'काशीशतकम्' इति निश्चप्रचं वक्तुं शक्यते। यतः श्रीमदज्जाडादिभट्लनारायणदासः क्रि.श. 1910 तमे वर्षे काशीयात्रां चकार। 'काशीशतके' काशीयात्रायाः वर्णनमेव प्रधानेतिवृत्तम्। काशीक्षेत्रस्य विश्वेश्वरस्य महिमानं वर्णयन् समकालिकसामाजिकस्थितिमपि अक्षरबद्धं चकार कविः। 'काशीशतकम्' इति यात्रावृत्तस्य विश्लेषणात्मकम् अध्ययनं नातिविस्तरेण शोधपत्रेऽस्मिन् प्रस्तूयते।

1. काव्यप्रकाराः

आधुनिककाले संस्कृतसाहित्यजगति नूतनाः प्रवृत्तयः दरीदृश्यन्ते। महाकाव्यानि, लघुकाव्यानि, खण्डकाव्यानि, मुक्तककाव्यानि, स्तोत्रकाव्यानि, शतककाव्यानीति रचनाप्रवृत्तयः तु परिचिताः। एकाङ्किनाटकानि सूडोकविता हैकुकविता, शतककाव्यानि यात्राकाव्यानि इति अद्यत्वे अन्या काचित् नव्या रचनापरम्परा प्रचलति।

1.1 शतककाव्यानि

निर्दिष्टविषयम् अवलम्ब्य सहृदयहृदयेभ्यः चमत्कारं जनयितुं समर्थं भवति शतककाव्यवाङ्मयम्। नीतिभक्तिवैराग्यविषयान् प्रबोधयितुम् अनुकूलमस्ति शतकवाङ्मयम्। शतकपदभूयिष्ठानि काव्यानि नैकानि संस्कृतसाहित्ये अतीव प्रसिद्धानि। चाणक्यनीतिशतकं, बाणभट्टस्य चण्डीशतकं मयूरस्य सूर्यशतकं भर्तृहरेः नीतिशृङ्गारवैराग्यशतकानि केसरिवेङ्कटनाथस्य अच्युतशतकं गुमानीकवेः गुमानीशतकम् अप्पय्यदीक्षितस्य वैराग्यशतकं, अवतारकवेः ईश्वरशतकं विश्वेश्वरपाण्डेयस्य रोमावलीशतकं गोकुलनाथस्य शिवशतकं जनार्धनभट्टगोस्वामिनः शृङ्गारशतकं भास्कररायस्य श्रीकुमारशतकं सन्निधानं सूर्यनारायणशास्त्रिणः वेङ्कटेश्वरवचनशतकं एस्.टि.जि.वरदाचार्याणां सुमतिवेमनदाशरथिशतकानि शतककाव्यपरम्परायाम् अन्तर्भवन्ति। । तस्यां परम्परायामेव उल्लेखनीयार्हम् अस्ति हरिकथापितामहस्य आदिभट्टनारायणदासविरचितं शतकद्वयम्। काशीशतकं रामचन्द्रशतकम् उभयमपि सङ्कलनरूपेण शतकद्वयम् इति नाम्ना पुस्तकं मुद्रापितम्।

1.1.1 यात्राकाव्यानि

आधुनिककाव्यपरम्परायां यात्राकाव्यानि अपि विलसन्ति येषु प्रतिभासम्पन्नाः कविपण्डिताः स्वजीवने कृतायाः यात्रायाः विशेषान् छन्दोमयकाव्यरूपेण उपनिबन्धन्ति। शर्मण्यदेशः सुतरां विभाति थाईदेशविलसम् इति यात्राकाव्यद्वयं डां. सत्यव्रतशास्त्रिणा विरचितम्। ततोऽपि पूर्वमेव आदिभट्टनारायणदासः काशीशतकम् इति यात्राकाव्यमेकं रचयित्वा यात्राकाव्यसम्प्रदायस्य आदिकविः बभूव।

2. यात्राकाव्यं काशीशतकम्

आधुनिकरचनासम्प्रदाये ‘Travelogue literature’ यात्राकाव्यानि इति यः रचनाप्रकारः अस्ति तस्मिन्नेव अन्तर्भवति ‘काशीशतकम्’ इति निश्चप्रचं वक्तुं शक्यते। यतः

श्रीमदज्जाडादिभट्लनारायणदासः सपरिवारः क्रि.श. 1910 तमे वर्षे काशीयात्रां चकार। 'काशीशतके' काशीयात्रायाः वर्णनमेव प्रधानेतिवृत्तम्। काशीक्षेत्रस्य विश्वेश्वरस्य महिमानं काशीक्षेत्रस्य भौगोलिकस्थितिञ्च वर्णयन् समकालिकसामाजिकस्थितिमपि अक्षरबद्धं चकार कविः।

2.1 कविः हरिकथापितामहः आदिभट्टनारायणदासः

आदिभट्टनारायणदासः क्रि.श. 1864 तमे वर्षे विजयनगरस्थबलिजमण्डलान्तर्गते अज्जाडनामके ग्रामे लब्धजनिः। बहुभाषावेत्ता बहुग्रन्थकर्त्ता च आन्ध्रप्रदेशस्थविजयनगरे सङ्गीतकलाशालायाः प्रधानाचार्यः आसीत्। तेलुगु-संस्कृत-हिन्दी-वङ्ग-फारसी-आङ्ग्लभाषातल्लजः आदीभट्टनारायणदासः। हरिकथासम्प्रदायस्य प्रचारप्रसारे कृतभूरिपरिश्रमः सः।

2.2 आदिभट्टनारायणस्य संस्कृतरचनाः

बहुभाषावेत्ता बहुग्रन्थकर्त्ता च आदिभट्टनारायणस्य नैकग्रन्थान् रचयामास। तेषु काश्चन संस्कृतरचनाः उमरखय्याम् हरिकथामृतं तारकम् शतकद्वयम् इत्यादयः सन्ति।

3 काशीशतकस्य काव्यतत्त्वानि

काशीयात्रानुभवरूपस्य काशीशतकस्य इतिवृत्तं छन्दोवैशिष्ट्यम् अलङ्कारवैशिष्ट्यं रसवैशिष्ट्यं व्याकरणप्रयोगवैशिष्ट्यं भौगोलिकवर्णनवैशिष्ट्यं सामाजिकवर्णनवैशिष्ट्यञ्चेति काव्यतत्त्वानि क्रमशः नातिविस्तरेणात्र प्रस्तूयन्ते।

3.1 काव्यस्य इतिवृत्तम्

क्रि.श. 1910 तमे वर्षे पञ्चाशद्वर्षदेशीयः आदिभट्टनारायणदासः धर्मपत्न्या सह काशीयात्रां कृत्वा तत्र प्राप्तं स्वीयानुभवम् एतच्छतकरूपेण निबबन्ध।

शिवरात्रिदिने प्रातस्स्नात्वा गङ्गाजले वयम्।
अतिकष्टेन विश्वेशम् अभिषिच्यागताः पुनः।। का.श.36

नारायणदासवर्यः सपरिवारः यस्मिन् वर्षे काशीयात्रां चकार तस्य वर्षस्य शिवरात्रिपर्व काश्यामेव समाचरदिति प्रमाणयति श्लोकोऽयम्।

काशीक्षेत्रं मुक्तिप्रदायकेषु अयोध्यादिषु सप्तसु प्रधनतमम्। तत्र मोक्षप्राप्तये अपेक्षितानि साधनानि नैकानि वर्त्तन्ते। तादृशस्य मुक्तिप्रदायकक्षेत्रस्य महत्त्वं स्वरूपं समृद्धिं सामाजिकस्थितिं भौगोलिकवर्णनं संस्कृतिं प्रकृतिसौन्दर्यञ्च वर्णयामास कविः।

3.2 छन्दोवैशिष्ट्यम्

आदिभट्टनारायणदासः काशीशतकम् इति भक्तिरसप्रपूर्णं यात्राकाव्यम् अनुष्टुप्छन्दसा रचयामास। क्षेमेन्द्रस्य सुवृत्ततिलके उक्तम् अनुष्टुप् नामकस्य छन्दसः लक्षणम्।

पञ्चमं लघु सर्वेषु सप्तमं द्विचतुर्थयोः।
गुरु षष्ठं च सर्वेषामेतच्छलोकस्य लक्षणम्।। (सुवृत्ततिलकम् – 1-14,15)

आरम्भे सर्गबन्धस्य कथाविस्तरसङ्ग्रहे
शमोपदेशवृत्तान्ते सन्तः शंसन्त्यनुष्टुभम्।। (सुवृत्ततिलकम् – 3.16)

असङ्ख्यो भेदसंसर्गादनुष्टुप् छन्दसां गणः।
तत्र लक्ष्यानुसारेण श्रव्यतायाः प्रधानता।।

शमोपदेशवृत्तान्ते अनुष्टुभं शंसन्ति सन्तः इति क्षेमेन्द्रः सुवृत्ततिलके अनुष्टुप् नामकस्य छन्दसः प्रयोगवैशिष्ट्यम् उदलिखत्। ‘शमो नाम मनोनिग्रहः’ इति तत्त्वबोधः।

शमोपदायकमस्ति अनुष्टुप्छन्दः इत्येव भक्तिरसोपेतं काशीशतकं अनुष्टुप्छन्दोबद्धं चकार कविः।

3.3 अलङ्कारवैशिष्ट्यम्

काव्यतत्त्वेषु अलङ्काराणां प्राधान्यं महत् वर्त्तते। कविः काशीक्षेत्रविशेषान् सुन्दरैः अलङ्कारैः न्यरूपयत्।

3.3.1 उत्प्रेक्षालङ्कारवैशिष्ट्यम् - सर्वेषु अलङ्कारेषु उत्प्रेक्षा अत्यादरेण कविः प्रयुक्तवान्। कुवलयानन्देन उल्लिखितं तल्लक्षणं यथा

सम्भावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना।
उक्तानुक्तास्पदाद्यत्र सिद्धासिद्धास्पदे परे।। कुवलयानन्दः 30

नृन् कैलासं नयन्तीव याति जाह्नव्युदङ्मुखम्।
अनुगङ्गं वाराणसी सौधश्रेण्यर्धचन्द्रवत्।। (का.श. 2)

नरान् कैलासं नयन्ती इव गङ्गानदी उदङ्मुखं प्रवहति। तत्तीरे काशीनगरसौधश्रेणी अर्धचन्द्रवत् विराजते इति श्लोके प्रयुक्तः उत्प्रेक्षालङ्कारः चित्तं चमत्करोति।

काशीपुर्यां सूर्योदयमित्थम् उत्प्रेक्षते कविः

पुनरावृत्तिरहितमार्गं स्वस्मिन्ददन्निव।
उदेति सूर्योऽभिमुखं गङ्गास्नानं प्रकुर्वताम्।। का.श. 4

गङ्गायां जलं शिशिरर्तौ गभीरं निर्मलं पूर्णञ्च भवति। तज्जलं तत्तीरे ध्यानमग्नस्य योगिनः दृष्ट्या सुन्दरतया उपमीयते।

गभीरं निर्मलं स्निग्धमापूर्णं भाति जाह्नवी।
असीवरुणयोर्मध्ये शिशिरे योगिदृष्टिवत्।। का.श. 3

3.3.2 उपमालङ्कारप्रयोगवैशिष्ट्यम् – रुचिरैः उपमालङ्कारैरपि कविः काशीवैभवं वर्णयामास।

उपमालङ्कारलक्षणं कुवलयानन्दे उक्तं यथा –

उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।
हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते।। कुवलयानन्दः - 4

काशीनिवासिनीनाम् अङ्गनानां तनुच्छाया अतिसुषमा। ताः अरुन्धत्या सौदामन्या पाञ्चालिकया च उपमीयन्ते।

सौधस्याग्रेऽरुन्धतीव मध्ये सौदामनी यथा।
अधस्तात्पाञ्चालिकेव काश्यां भाति कुलाङ्गना।। का.श. 44

3.3.3 अर्थान्तरन्यासालङ्कारप्रयोगवैशिष्ट्यम् - काशीनगरस्याम्बरतले उत्क्षिप्तं पतङ्गकम् अर्थान्तरन्यासालङ्कारप्रयोगेण सुन्दरतया वर्णयामास कविः।

कुवलयानन्दोक्तम् अर्थान्तरन्यासालङ्कारलक्षणम्

उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः। कुवलयानन्दःसूत्रेणोत्क्षिप्तमाकाशे वीक्ष्य श्येनः पतङ्गकम्।
प्रहर्तुं तं प्रयतते सहते कः परोन्नतिम्।। का.श. 90

श्येनः आकाशस्थं पतङ्गकं प्रहर्तुं प्रयतते इति विशेषः। परोन्नतिं कः सहते इति सामान्यः। सामान्येन विशेषसमर्थनरूपस्य अर्थान्तरन्यासस्य उदाहरणमयं श्लोकः।

3.4 रसवैशिष्ट्यम्

रसात्मकं काव्यमिति विश्वनाथोक्तिः। रसाः अष्टौ इति भरतः नाट्यशास्त्रे उदलिखत्। शान्तोऽपि नवमरसत्वेन अङ्गीकृतः आलङ्कारिकैः।

शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ रसाः स्मृताः।। (ना.शा. 6.16)

रूपकगोस्वामी भक्तिरसामृतसिन्धुरिति ग्रन्थस्य प्रणेता स्वग्रन्थे भक्तिमपि रसत्वेन पर्यगणयत्।

भक्तिरसस्य प्रस्तुतिरखिलजगन्मङ्गलप्रसङ्गस्य।
अज्ञेनापि मयाऽस्य क्रियते सुहृदां प्रमोदाय।। (श्री.भ.सिन्धुः पू.भा.6)

भक्तिरसभरितमिदं काशीशतकं काव्यं भक्तिरसतत्त्वानि नैकानि प्रस्तौति। भक्तिः नवधा भवतीति सङ्केतयति कविः। यथा -

दिष्ट्या श्रद्धा मानुषेषु केष्वेव परिदृश्यते।
तस्या नवविधा भक्तिमार्गा अवयवीकृताः।। का.श. 23

श्रवणं कीर्त्तनं स्मरणम् अर्चनं वन्दनं दास्यं सख्यं पादसेवा आत्मनिवेदनं चेति नवविधा भक्तिरुच्यते। काशीविश्वेश्वरं महदेवीं गङ्गां भक्ताग्रेसरान् देवालयाश्च बहुधा वर्णयामास कविः। काशीशतकपठनेन सहृदयहृदयः पाठकः ब्रह्मानन्दसहोदरानन्दं भक्तिरसानन्दं विन्दति इत्यस्मिन् नास्ति अतिशयोक्तिः।

3.5 व्याकरणप्रयोगविशेषाः

काशीशतके नैके विशिष्टाः व्याकरणप्रयोगविशेषाः दरीदृश्यन्ते। सिद्धान्तकौमुदीकाशिकादिव्याकरणग्रन्थेषु यानि विशिष्टानि उदाहरणानि सूत्राणां

विवरणात्मकानि दत्तानि वैयाकरणैः तानि यथातथं सन्दर्भानुकूलानि काशीक्षेत्रवर्णनानुकूलानि च व्याकरणशास्त्रतल्लजः कविरयम् अतीवौचित्येन व्याकरणपाण्डित्यप्रतिभया च प्रायुङ्क्त।

नून् कैलासं नयन्तीव याति जाह्नव्युदङ्मुखम्।
अनुगङ्गं वाराणसी सौधश्रेण्यर्धचन्द्रवत्।। 2

'यस्य चायामः।' पा.अ.सू. 2.1.16 सूत्रस्य अनुगङ्गं वाराणसी इति अव्ययीभावसमासस्य उदाहरणम्। गङ्गायामेन वाराणसीयामः लक्ष्यते।

'पारे मध्ये षष्ठ्या वा।' पा.अ.सू. 2.1.18 सूत्रस्य मध्येगङ्गमिति उदाहरणमस्ति। पारमध्यशब्दौ षष्ठ्यन्तेन सह वा समस्यते।

महोबुड्डामङ्गलाख्यं महाद्भुतमुपागमत्।
समया कुर्वन्ति पौरा मध्येगङ्गमहर्निशम्।। का.श. 94

मन्यकर्मण्यनादरे विभाषाऽप्राणिषु। पा.अ.सू. 2.3.1 मन्यकर्मणि प्राणिवर्जिते विभाषा चतुर्थी विभक्तिर्भवति अनादरे गम्यमाने इति सूत्रार्थः। कारकप्रकरणे मन्यकर्मणि चतुर्थीविभक्तिः विकल्पेन विधीयते। तस्य प्रयोगं कविः सन्दर्भानुगुणं चकार।

भागीरथ्यां कृतस्नानस्तीरमञ्चे जपञ्जनः।
तृणाय मन्यते मृत्युं पुण्यं मूर्तीकृतं यथा।।

ध्वाङ्क्षेण क्षेपे। पा.अ.सू. 2.1.42 ध्वाङ्क्षवाचिना सुबन्तेन सह सप्तम्यन्तं सुबन्तं समस्यते तत्पुरुषश्च समासो भवति क्षेपे गम्यमाने। तीर्थे ध्वाङ्क्ष इव तीर्थध्वाङ्क्षः अनवस्थितः इत्यर्थः।

व्याकरणशास्त्रप्रसिद्धान् प्रयोगान् कृत्वा कविः चमत्कारं जनयति।

नापिता याचकाः पुष्पलाविका अनुलेपकाः।
तीर्थध्वाङ्क्षा आगतानां गङ्गातीरे समाश्रिताः।। का.श.14

प्रमाणे द्वयसज्दघ्नञ्मात्रचः। पा.अ.सू. 5.2.37 प्रमाणम् इत्यस्मिन् अर्थे प्रयुज्यमानात् प्रथमासमर्थात् अस्य इत्यस्मिन् अर्थे द्वयसच् दघ्नञ् तथा मात्रच् प्रत्ययाः भवन्ति इति अर्थः। शिवालयस्थं जलं जानुदघ्नम् अस्तीति कविः शास्त्रप्रसिद्धं प्रयोगं चकार।

शिवालयेभिषेकाम्बु जानुदघ्नं समन्ततः।
विसृष्टवृषभैर्बिल्वपत्रराशिरभक्ष्यत॥ का.श. 40

असूर्यललाटयोः दृशितपोः। पा.अ.सू. 3.2.36 इत्यस्य सूत्रस्य विशिष्टः प्रयोगः असूर्यम्पश्याः इति अस्ति। असूर्य ललाट इति एतयोः उपपदयोः दृशितपोः धात्वोः खश्प्रत्ययः भवति।

विराजते सौधमध्येऽसूर्यम्पश्यो महाजनः।
वल्मीकान्तर्वर्तिनीव पाण्डुराजपिपीलिकाः॥ का.श.71

यत्र यत्र यदाकाङ्क्षे तत्रतत्र तदाप्नुयात्।
सदा कल्पलतायन्ते काश्यामखिलवीथयः॥ का.श.72

गायन्ती भैरवीं प्रातर्मूर्छयन्ती सभासदः।
मोहनास्त्रायते कापि नृत्यन्ती वारसुन्दरी॥ का.श. 97

अस्मिन् श्लोके गायन्ती मूर्छयन्ती नृत्यन्ती इति शत्रन्तप्रयोगाः कृताः। अपि च कल्पलतायन्ते मोहनास्त्रायते इति नामधातुप्रयोगाः अपि दृष्टिगोचरीभवन्ति।

प्रसन्नमुखपङ्केजो बद्धपिङ्गशिरोरुहः।
महादेवो यथा तीरे भाति कोऽपि दिगम्बरः॥ का.श. 5

अस्मिन् श्लोके प्रसन्नमुखपङ्केजः इति विशिष्टः व्याकरणप्रयोगः अकारि कविना। पङ्के जायते इति पङ्केजम्। सप्तम्यां जनेर्डः। 3.2.97 इति सूत्रेण जनेर्डः। उपपदमतिङ्। 2.2.19 इति तत्पुरुषसमासः। तत्पुरुषे कृति बहुलम्। 6.3.13 इत्यलुक्। पङ्कजम् अथवा पङ्केजम्। मुखमेव पङ्केजम् मुखपङ्केजम्। मयूरव्यंसकादयश्च। 2.1.72 इति तत्पुरुषः। प्रसन्नं मुखपङ्केजं यस्य सः प्रसन्नमुखपङ्केजः। अनेकमन्यपदार्थे। 2.2.24 इति बहुव्रीहिः।

पूर्णं काव्यं विशिष्टव्याकरणपदप्रयोगैः परिपूर्णं सत् आह्लादं जनयति।

3.6 काशीवर्णनवैशिष्ट्यम्

काशीक्षेत्रमहिमवर्णनं नैकैः श्लोकैः अवर्णयत् कविः। काशी मुक्तिस्थानं तच्च चतुर्वर्णैः सेव्यते। कविरपि तस्य महिमवर्णनेन धन्यो भवति। (का.श.19)

सर्वक्षेत्रोत्तमा काशी सर्वसम्पत्समन्विता।
प्रत्यक्षकैलासपुरी मुमुक्षूणां निकेतनम्।। का.श.21

3.6.1 विश्वनाथवर्णनम् – काशीशतकं काव्यं विश्वेश्वरस्तुत्या आरभत कविः।

संश्रिताभीष्टदं देवं सच्चिदानन्दविग्रहम्।
समस्तभुवनाधारं काशीविश्वेश्वरं भजे।। का.श.1

समस्तदेवेषु विश्वनाथः विशिष्यते तस्य मन्दिरं स्वर्णगोपुरभूषितञ्चेति कविः स्वभक्तिं प्रकटीचकार।

3.6.2 गङ्गावर्णनम् – गङ्गाप्राशस्त्यं स्तौति कविः। गङ्गास्नानमहत्त्वञ्च प्रस्तौति। गङ्गायां शवदाहवृत्तमपि अक्षरबद्धं चकार कविः। यात्रिकाः पिपीलिकावत् बाहुल्येन गङ्गातीरे सञ्चरन्ति। करधनं दत्त्वा क्षौरकर्म कारयित्वा मणिकर्णिकाघट्टे भक्ताः स्नान्ति। भक्तजनतारिणी गङ्गा बहुधा स्तुता अस्मिन् शतके काव्ये।

गभीरं निर्मलं स्निग्धमापूर्णं भाति जाह्नवी।
असीवरुणयोर्मध्ये शिशिरे योगिदृष्टिवत्।। का.श.3

3.6.3 भौगोलिकवर्णनम्

क्रि.श. 1910 तमे वर्षे काशीयात्रां कृतवान् कविः काशीनगरनिर्माणकौशलमपि वर्णयामास। गङ्गानदीं मणिकर्णिकाघट्टं तीरसमाश्रितान् नापितान् याचकान् पुष्पलाविकान् अनुलेपकान् तीर्थध्वाङ्क्षांश्च वर्णयामास कविः। चतुष्षष्टिः घट्टाः वारणस्यां सन्ति। गङ्गातीरसमीपे व्यासकाशीति विराजते यां देवेन्द्रप्रभुः पालयति स्म। तस्मिन् काले एव काश्यां अन्तर्लीनप्रणालिकाः आवसथेभ्यः मलिनजलानि गङ्गानदीं नयन्ति स्म। नागरकत्वस्य जन्मभूमिः यतः नार्यः अवकुण्ठनवत्यः पुमांसः उष्णीषभूषिताः। काश्याम् एकत्र घण्टापथाः पाठशालाः विशालानि उपवनानि वाप्यः नैकशिल्पभूषिताः गृहाः च सन्ति। अपरत्र अत्यन्तं सङ्कुचितमार्गाः भवन्ति यत्र परिभ्रमन् नूतनः जनः कष्टम् अनुभवतीति नगरसौन्दर्यं वर्णयामास कविः। काशी तिन्त्रिणीवृक्षसङ्कीर्णा। वेणुगुल्मावृता। समभूमिविराजिता गोधूमसस्यश्यामला। नारिकेलवृक्षाः नैव लक्ष्यन्ते काश्यामिति सुष्ठु काशीनगरभौगोलिकस्थितिं वर्णयामास नारायणदासवर्यः। (का.श. 28, 31, 33, 35, 52)

3.6.4 सामाजिकवर्णनम् - पण्डितरविशङ्करः उस्ताद् बिस्मिल्लाखानः विदुषी गिरिजादेवी पण्डितः जोतिक् भट्टाचार्यः किषन् महाराजः रामशङ्करसहायः अशुतोषभट्टाचार्यः इत्यादयः हिन्दुस्थानीसङ्गीतज्ञाः काशीकीर्तिपताकध्वजं धरन्ति। कर्णाटकहिन्दुस्थानीसङ्गीतज्ञः आदिभट्टनारायणदासः सङ्गीतज्ञस्सन् एतानि काशीक्षेत्रगतानि वैशिष्ट्यानि अक्षरबद्धानि चकार।

वारस्त्री नृत्येन जनान् सम्मोहयति। भैरवीरागेण अपरा वारसुन्दरी श्रोत्रानन्दं जनयति। वारयोषितः यात्रिकान् आकर्षन्ति। अत्र वानराः यात्रिकाणां वस्त्रदीनि चोरयन्ति। सत्रेषु अन्नदानं कुर्वन्ति दातारः। छात्रेभ्यः आश्रयं दत्त्वा विद्यादानं प्रोत्साहयन्ति। बौद्धानां यवनानाम् आङ्ग्लेयानाञ्च प्रभावः काश्यामस्ति। अत्र सङ्कुचितस्थले निवसन्ति पौराः इत्यतः गौरवर्णाः भवन्ति। कविः सहजशैल्या ललितललितपदैः काशीनगरस्य सामाजिकस्थितिं विशदीचकार।

3.6.5 काशीसंस्कृतिसम्प्रदायाः

काश्यां हिन्दुस्थानीभाषया व्यवहरन्ति तत्स्थाननिवासिनः। तथैव काशी मधुरपदार्थानां विषये प्रसिद्धिं गता। गव्यपदार्थविशेषाणां विषये तु अतीव प्रसिद्धा सा नगरी। काशीनगर्यां कौशेयवस्त्रं मधुरबदरीफलञ्च प्रशस्तिं गते।

काश्यां देशीयभाषायां सर्वदा भोज्यवस्तुषु।
मर्त्यवेषेषु सङ्गीते सर्वत्र मधुरो रसः।। का.श. 30

काश्यां फाल्गुने मासि शुक्लपक्षे होलीत्युत्सवः आचर्यते। पौर्णम्यां कामदहनं कुर्वन्ति। बुड्डामङ्गलाख्यः उत्सवः अत्र आचार्यते। दिवानिशं पौराः गङ्गायाम् एनम् उत्सवमाचरन्ति। अत्रैव कृष्णः सान्दीपनिमुनेः सकाशे अधीतविद्यः। षट्छास्त्रपारगाः पण्डिताः सन्ति। द्राविडब्राह्मणेभ्यः सदक्षिणम् अन्नं दीयते इति काशीनगरसंस्कृतिसम्प्रदायान् विशदीचकार कविः।

उपसंहारः – विश्वेश्वरस्य गङ्गायाः काश्याश्च काशीगतचारित्रिकांशैः सामाजिकस्थितिवर्णनैः भौगोलिकवर्णनैः संस्कृतिसम्प्रदायवर्णनैश्च नितराम् शतककाव्येषु काशीशतकम् अतिशेते। मुक्तिस्थानं काशीं वर्णयित्वा कविः कृती भवतीति स्वकाव्यरचनाप्रयोजनं नारायणदासवर्यः प्रकटीचकार। धर्मार्थकाममोक्षाः इति चतुर्वर्गफलदायकमस्तीदं काशीशतम्।

आकरग्रन्थाः

1. मुदिगोण्डगोपालरेड्डि, 1986, संस्कृतसाहित्यचरित्रम्, मुद्रणम् तेलुगुविश्वविद्यालयः, हैदराबाद्
2. पुल्लेलश्रीरामचन्द्रः, 1983, क्षेमेन्द्रस्य सुवृत्ततिलकम्, मुद्रणम्, सुरभारतीसमितिः, उस्मानियाविश्वविद्यालयः हैदराबाद्
3. आदिभट्लनारायणदासः 1914, काशीशतकम्, मुद्रणम् विविऐटि, नम्बूरु, गुण्टूरु, आन्ध्रप्रदेशः
4. https://sa.wikisource.org/wiki/%E0%A4%A4%E0%A4%A4%E0%A5%8D%E0%A4%A4%E0%A5%8D%E0%A4%B5%E0%A4%AC%E0%A5%8B%E0%A4%A7%E0%A4%83
5. आदिभट्टनारायणदासः (1976) शतकद्वयम्, दासभारतीप्रकाशन,
6. मन्मोहनघोष, नाट्यशास्त्रम् प्रथमो भागः,दि रायल् एसियाटिक् सोसयिटी आफ् बेङ्गाल् कोलकत्ता
7. रूपकगोस्वामी, भक्तिरसामृतसिन्धुः श्रीश्यामदासहकीमव्रजगौरवप्रकाशन्, बाग्डुण्डेल, श्रीवृन्दावन
8. Ramachandra Aiyar T.K. (2011), Kuvalayananda of Appayyadeekshita, published by R.S. Vadhyar & Sons, Kalpathi, Palakkad 678 003
9. Srisa Chandra Vasu (2017), The Siddhanta Kaumudi of Bhattoji Dikshita, vol 1 published by Motilal Banarsidass, Delhi, ISBN: 10 - 8120812905 ISBN-13 978-8120812901

रघुवंशमहाकाव्ये द्वितीये सर्गे विशिष्टानां कारकप्रयोगाणां परिशीलनम्

व्रजेश प्रदिपभाई पण्डित

गुरुञ्च पितरौ नत्वा व्रजेशोऽप्यनुनम्यते ।
कारकाणां महत्त्वं वै सदि प्राह यथामति ॥

संस्कृतवाङ्मये काव्यानि, महाकाव्यानि, खण्डकाव्यानि च वेदाधिकारैः रहितानां कृते मनोरञ्जकं साहित्यं वर्तत इति नाट्यशास्त्रे भरतमुनिनाऽपि प्रचोदितम् । यत्

दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम् ।
विश्रान्तिजननं काले नाट्यमेतद्भविष्यति ॥

पद्यमिदं मनोरञ्जकमिदं साहित्यमिति आरोपयति । वयं जानीमहे यत् संस्कृतसाहित्ये काव्यानां बहु महत्त्वमस्ति । तत्र काव्यङ्किमर्थमिति प्रश्नो भवति चेदालङ्कारिकाणां श्रेष्ठो मम्मटः प्रत्याह । यत्

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृत्तये कान्तासम्मिततयोपदेशयुजे ॥

इत्थं काव्यस्य प्रयोजनानि प्रतिपादितानि सन्ति । तत्र पूर्वं यशोऽभिवृद्धये, द्वितीयं द्रव्यप्राप्त्यर्थम्, तृतीयं व्यावहारिकज्ञानाय, चतुर्थममङ्गलगलनाय, परनिर्वृत्तिः परलोकावाप्तये, तथान्तिमं पत्नीवदुपदेशार्थमिति । इमानि काव्यकरणाय षड् प्रयोजनानि प्रचोदितानि सन्ति ।

तदनन्तरं किन्नाम काव्यमिति प्रश्नः समुद्भवति । तर्हि तत्र नैकेषां विदुषां मतैक्यं न दरीदृश्यते । तत्र नैके आचार्याः स्वमतानि विशिषन्ति । किन्तु तेषामाचार्याणां मम्मटाचार्याणामत्र किङ्कथनमित्याचक्षे ।

"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि"

अर्थात् यत् दोषविवर्जितौ सगुणौ क्वचिदलङ्कृतौ क्वाप्यनलङ्कृतौ यौ शब्दार्थौ भवतः तावेव काव्यस्वरूपेण परिगण्याविति । अर्थात् तदेव काव्यत्वेन साहित्ये

स्थानमलङ्कुरुते । अतः सर्वाण्यपि काव्यानि तथैव भवन्तु अन्यथा तौ शब्दार्थौ न काव्यत्वमुपैत इति भावः । इदानीं काव्यलक्षणप्रतिपादनानन्तरं काव्यभेदान् व्याचक्षे ।

संस्कृतसाहित्ये काव्यं त्रिधा व्युष्यति । तद्यथा –

१. महाकाव्यम् २. खण्डकाव्यम् ३. गद्यकाव्यम्

तत्र वयं जानीमो यत् संस्कृतसाहित्ये पञ्चमहाकाव्यानि सन्ति । तानि इमानि

१. रघुवंशम् २. कुमारसंभवम् ३. किरातार्जुनीयम्

४. शिशुपालवधम् ५. नैषधीयचरितम्

अमूनि पञ्चमहाकाव्यानि वर्तन्ते । तेषां महाकाव्यानां रघुवंशं कविकुलगुरु-कालिदासप्रणितं महाकाव्यं संलक्ष्य तस्मिन् ग्रथिते द्वितीये सर्गे कारकदृष्ट्या एकं परिशीलनमिति विषयाप्लावितं मदीयमदश्शोधपत्रं यथामति व्याचक्षे । तत्र वाक्यस्य श्लाघायां प्राप्तुकामो नैकेषां कारकाणां विशिष्टान् प्रयोगानभिव्यनक्ति । अतस्तथैव महाकाव्येष्वपि कविभिर्नैकप्रयोगवितन्वद्भिः स्वकाव्याभिख्या व्यकारि । अतः तं विषयमाधारीकृत्य रघुवंशमहाकाव्ये द्वितीयसर्गे विहितानां विशिष्टानां कारकप्रयोगाणामेकं परिशीलनं समदर्शि ।

प्रायः संस्कृतजगति प्रत्येकस्मिन् वाक्ये कारकस्य तु आवश्यकता भवत्येव । यथा सर्वेषु वाक्येषु कर्ता, कर्म इत्यादि तु भवत्येव तद्विना शब्दाः वाक्यत्वं न भवन्ति । किन्तु तथापि तत्र कानिचन विशिष्टानि कारकाणि भवन्ति । तेषां कारकाणां प्रयोगेणापि काव्यस्य शोभा, छन्दरक्षणमित्यादिकार्याणि सम्भवन्ति । तदर्थमेव महाकाव्येषु विद्वांसः कवयो विशिष्टानां कारकाणां प्रयोगाञ्चक्रिरे ।

सर्वादौ अस्यैव रघुवंशमहाकाव्यस्य द्वितीयसर्गस्य प्रथमे पद्य एव विषयोऽयं समुपलभ्यते । तत्र पूर्वं पद्यं प्रदीयते । तदनु तस्य विवेचनङ्क्रियते ।

अथ प्रजानामधीपः प्रभाते जाया प्रतिग्राहितगन्धमाल्याम् ।
वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥

पद्येऽस्मिन्नत्र विशिष्टं कारकं किमिति चेद्वनाय इति पदमेकङ्कविना न्यस्तमस्ति, तदेवेह विशिष्यते ।

अत्र “यशोधनः वनाय धेनुं मुमोच” इति पादे वनाय पदे चतुर्थी विभक्तिर्वर्तते। तत्रार्थः प्रतीयते यद्वनं गन्तुमिति। तर्ह्यत्र “वन” इति पदे द्वितीयया भाव्यमिति सुनिश्चितमस्ति किन्त्वत्र चतुर्थी विभक्तिर्भवति कारणमस्ति पाणिनीय सूत्रम्।

“क्रियार्थोपपदस्य च कर्मणि स्थानिनः”

अनेन सूत्रेणेह चतुर्थी विभक्तिः सङ्गच्छते। अस्यार्थो भवति क्रियार्था क्रिया यस्य उपपदं भवति तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुन् प्रत्ययस्य कर्मणि चतुर्थी विभक्तिर्भवति। यथा “फलेभ्यो याति” इत्यत्र विग्रहो भवति फलानि आहर्तुं यातीति। प्रस्तुतेऽस्मिन्नुदाहरणे गमनक्रियोपपदत्वं भजतेऽपि चाहर्तुमित्यत्राप्रयुज्यमानं तुमुन् प्रवर्तते, अतस्तत्र फलानीति द्वितीयायाः स्थाने चतुर्थी भवत्यनेन सूत्रेणाप्रयुज्यमानत्वात् तुमुन्। अत्राप्रयुज्यमानस्यार्थो भवति शाब्दिकस्वरूपं न किन्तु तस्यार्थो निलीयते।

तथैवात्र “वनाय मुमोच” इत्यत्र मुमोच मोचनक्रियोपपदत्वं भजते, अपि च वनं गन्तुमिति गम् धातोः तुमुन् प्रत्ययस्यार्थः प्रतीयते। अत्र वनमिति पदे कर्मत्वात् द्वितीया विभक्तिरपेक्षिता वर्तत एव किन्तु क्रियार्थोपपदत्वात् वन इति पदे द्वितीयायाः स्थानेऽनेन सूत्रेण चतुर्थी विभक्तिः सम्भवति। तस्माद्वनाय इति विशिष्टकारकत्वेन स्थानमलङ्करोति।

इदं मदीयशोधपत्रस्य प्रथममुदाहरणं वर्तते। इतोऽप्यग्रे सरामः। तत्र द्वितीयमुदाहरणमस्ति अष्टमे पद्ये। तत् पद्यं प्रस्तूयते।

लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावम्।
रक्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेष्यन्निव दुष्टसत्त्वान्॥

पद्येऽस्मिन्नपि प्रयोगद्वयं सन्दृश्यते। तदहं विवृणोमि। अत्र प्रथमे पादे “लताप्रतानोद्ग्रथितैः केशैः स” इति प्रयोगो वर्तते। अत्र ग्रथितैः केशैरिति पदे उन्नमयाः ग्रथिताः ये केशास्तैरुपलक्षित इति विग्रहो भवति। अत्र केन सूत्रेण तृतीया विभक्तिर्भवतीति प्रतिपादयामि।

“इत्थम्भूतलक्षणे”

अनेन पाणिनीयसूत्रेणात्र तृतीया विभक्तिः सम्भवति। कारणं येन लिङ्गेन यस्य ज्ञापनं भवति तस्य प्रतिपादितस्य शब्दस्य तृतीया विभक्तिर्भवति। यथा जटाभिस्तापस इति

पदे जटाज्ञाप्यतापसत्वं विशिष्यते । करणं तत्र तापसत्वमित्थम्भूतमस्ति जटाभिश्चिह्नितो लक्षितोऽतस्तद्वाच्यस्य शब्दस्य तृतीया जायते । तथैवात्रापि उन्नमयैः केशैः सो लक्षितोऽतस्तैः केशैः स इत्थंभूतश्चिह्नितः, अतः केशशब्दस्यामुना सूत्रेण तृतीया भवति। अत्र तस्य राज्ञः ज्ञाने केशेषु करणेषु सत्सु करणत्वात् “कर्तृकरणयोस्तृतीया” इत्यनेन सूत्रेण तृतीया भवत्येव, किन्त्वेतेन सूत्रेण जायमानायां तृतीयायां लक्ष्यलक्षणभावः समुद्भवत्यतः प्रयोगोऽयं विशिष्टकारकत्वेन स्थानमलङ्कुरुते।

तथैव पद्येऽस्मिन् द्वितीयः प्रयोगोऽपि वर्तते। यथान्तिमे पादे “विचचार दाव”मिति पदमस्ति । तत्र दावमधिकरणत्वात् सप्तमी विभक्तिरपेक्षते किन्त्वत्र द्वितीया विभक्तिः सल्लक्ष्यते। सोऽपि विशिष्टः प्रयोगः। तत्रैकं वार्तिकमस्ति “अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसञ्ज्ञक इति वाच्यम्”

अनेन वार्तिकेण विपूर्वकचरधातोरकर्मकत्वात् दावमिति पदस्य अधिकरणत्वं प्रबाध्य कर्मत्वं विहितमतः द्वितीया विभक्तिः।

तां देवतापित्रतिथिक्रियाऽर्थामन्वग्ययौ मध्यमलोकपालः।
बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना॥

अत्रापि विशिष्टः प्रयोगः सन्दृश्यते। अत्र पदमेकं प्रयुङ्क्तं महाकविना “सतां मतेन” इति। प्रयोगोऽसौ विशिष्टत्वं विशिनष्टि। अत्र सतामिति पदे षष्ठी विभक्तिर्विद्यते। अत्र कथं षष्ठीविभक्तिरिति विषयं प्रतिपादयामि। अत्र सूत्रमस्ति –

“क्तस्य च वर्तमाने”

अमुना सूत्रेणात्र षष्ठी विभक्तिर्युज्यते । वर्तमानार्थे प्रयुज्यमानस्य क्तप्रत्ययस्य प्रयोगेऽनुक्तकर्तरि कर्मणि च षष्ठी विभक्तिर्भवति। प्रायस्तु क्तप्रत्ययो भूतकाले भवति। किन्तु क्वचित् “मतिबुद्धिपूजार्थेभ्यश्च” इत्यादिसूत्रैर्वर्तमानेऽपि क्तप्रत्ययो भवति । तस्यैव ग्रहणं सूत्रेऽस्मिन् क्रियते। अत्र “कर्तृकर्मणोः कृतिः” इत्यनेन षष्ठी प्राप्यत एव किन्तु क्तप्रत्ययस्य “क्तक्तवतू निष्ठा” इत्यनेन निष्ठासंज्ञा भवति अपि च “न लोकाव्ययनिष्ठाखलर्थतृनाम्” सूत्रेणानेन प्राप्तषष्ठीनिषेधे सूत्रमिदं प्रवर्तते।

अत्र “सतां मतेन” इत्यत्र “कर्तृकर्मणोः कृतिः” इत्यनेन सूत्रेण कृत्प्रत्यययोगे षष्ठी सुस्पष्टैव। किन्तु “मतिबुद्धिपूजार्थेभ्यश्च” इत्यनेन मन् धातोर्वर्तमाने क्तप्रत्यये कृते “क्तक्तवतू

निष्ठा" इत्यनेन निष्ठासंज्ञा भवति, अपि च निष्ठासंज्ञायां जातायां "न लोकाव्ययनिष्ठाखलर्थतृनाम्" सूत्रेणानेन षष्ठीनिषेधः प्रवर्तते। तस्मात् तत् सूत्रं प्रबाध्य "क्तस्य च वर्तमाने" सूत्रमेतत् प्रयुज्यतेऽतस्तेन कर्तृसच्छब्दे षष्ठी विभक्तिरपि च बहुवचने सतामिति सम्भवति। इत्थं सतां मतेन प्रयोगो विशिष्टत्वं भजते तथैव राज्ञां मत इत्यादिकं ज्ञेयम्।

इत्थमत्र षष्ठी विभक्तिः सिद्ध्यति "सतां मतेन" अर्थात् सज्जनानां माननीय इति।

तामन्तिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः।
क्रमेण सुप्तामनुसंविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत्॥

अमुष्मिन् श्लोकेऽपि विशिष्टं कारकं वरीवृत्यते। अत्र कविकुलगुरुणा द्वितीयं कारकं विशिष्टम्। "सुप्तोथिताम् अनु उदतिष्ठत्" इति पदं विशिष्टत्वं भजते। अत्र पाणिनीयसूत्रं वर्तते-

"कर्मप्रवचनीययुक्ते द्वितीया"

अर्थात् कर्मप्रवचनीय-संज्ञकशब्दानां योगे द्वितीया विभक्तिर्भवति। सुप्तोथिताम् अनु उदतिष्ठदर्थात् निद्रावसानोत्थितायां सत्यां स उदतिष्ठदिति भावः। हेतुभूता सुप्तोत्थिता नन्दिनी एव लक्षणमस्ति कारणं तस्यां सुप्तोत्थितायां सत्यामेव स उत्थितः। हेतुभूतायां सुप्तोत्थितायां नन्दिन्यामेवोत्थापनं लक्षितं भवति। सुप्तोत्थानात् पूर्वमेव तस्योत्थानस्य सूचना अनुपदेन विद्योतते। इत्थमेवेह सुप्तोत्थिता नन्दिनी लक्षणमुत्थितो राजा दिलीपो लक्ष्यमिति। इत्थं लक्ष्यलक्षणयोः सूचकमनुपदमिति। तस्य दिलीपस्योत्थाने सुप्तोत्थिता नन्दिनी हेतुः, तस्यास्तस्य उत्थानं भवति। अत एव "अनुर्लक्षणे " इत्यनेनानुपदस्य कर्मप्रवचनीयसंज्ञा भवति, तदनु प्रवृत्तेन सूत्रेणानुपदस्य योगेन सुप्तोथितापदे द्वितीया कृता ततः सुप्तोथितामिति पदं सम्भवति।

अत्र "कर्मप्रवचनीययुक्ते द्वितीया" इत्यनेन द्वितीया अपि च "हेतौ " इति सूत्रेण तृतीयापि युगपत् प्राप्नोति, तस्मात् "हेतौ" इति परसूत्रत्वात् "विप्रतिषेधे परं कर्यम् " इति परिभाषया परकार्यत्वात् तृतीयया भाव्यम्, किन्त्वनया द्वितीयया तृतीया प्रबाध्यते। पूर्वं परं कथं बाधेतेति विविदिषायां प्रोच्यते "लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः " इति सूत्रेण अनुपदस्य कर्मप्रवचनीयसंज्ञायां विहितायां पुनः "अनुर्लक्षणे" इत्यनेन कर्मप्रवचनीयसंज्ञाविधानात् "परापि हेतौ तृतीया अनया द्वितीयया बाध्यते"। इत्थमत्र द्वितीया विशिष्टं कारकत्वं भजते। इदानीमग्रे सरामः।

अलं महीपाल ! तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्तिरंहः शिलोच्चये मूर्च्छति मारुतस्य ॥

अत्र पदमस्ति "अलं महीपाल ! तव श्रमेण" तर्हि अत्र "अलं श्रमेण" इति कश्चन प्रयोगो विततः । इदमेवेह विशिष्टकारकमस्ति । तदधुनालोच्यते । अत्र प्रवर्तमानं सूत्रमस्ति-

"कर्तृकरणयोस्तृतीया"

अर्थादनुक्तकर्तर्यनुक्तकरणे च तृतीया विभक्तिर्भवति । इहेतोऽपि कश्चन नियमः प्रतिपाद्यते यत्- "गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका" अर्थात् गम्यमानक्रियापि कारकविभक्तये प्रयोजिका विद्यते । इह गम्यमानार्थोऽस्ति साक्षादप्रयुक्ते सत्यर्थेन प्रतीयमानो गम्यमान इति । तर्ह्यत्रापि तथैव "अलं श्रमेण" अर्थात् श्रमेण साध्यं नास्तीति । इह साधनक्रियां प्रति श्रमः करणम् । भवतु श्रमो व्यर्थः । तात्पर्यं तदेव यत् श्रमेणासाध्यङ्कार्यमिति । अत्र साधनं क्रियारूपं यत् साक्षादप्रयुक्तं तथापि वाक्यार्थेन गम्यमानमस्ति । अत्र गम्यमानक्रियां प्रति श्रमः सर्वाधिकोपकारी, अतो गम्यमानसाधनक्रियां मत्वा श्रमशब्दस्य करणसंज्ञा सञ्जायते । अपि च प्रदत्तेन सूत्रेण तृतीया विभक्तिर्जायते । इत्थमिह श्रमेणेति पदे तृतीया विभक्तिर्विशिष्टकारकत्वेन सङ्गच्छते । इदानीं पुरतो यामः ।

तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण ।
उपस्थिता शोणितपारणा मे सुरद्विषाश्चान्द्रमसी सुधेव ॥

अत्रापि पूर्वपद्यमिव पदमस्ति "एषा क्षुधितस्य तृप्त्यै अलम्" । इहापि अलमेव किन्त्वत्र तेन साकं चतुर्थी विभक्तिः सञ्जाता वर्तते । पूर्वस्मिन् पद्ये तृतीया विभक्तिरजायत । अतः कारकमिदममुं प्रयोगं विशिनष्टि । तत् पश्यामः । अत्र सूत्रं प्रवर्तते -

"नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च"

अर्थात् नमस्स्वस्ति-स्वाहा-स्वधालम्वषडित्यादीनां शब्दानां योगे चतुर्थी विभक्तिर्युज्यते । अत्र वार्तिकमेकं प्रवर्तते यत् "अलमिति पर्याप्त्यर्थग्रहणम् " अर्थात् सूत्रेऽस्मिन् पर्याप्तिर्नाम समर्थार्थिनां ग्रहणं विधेयमिति । यथा समर्थः, प्रभुः, शक्तः, अलमिति । तर्हि वार्तिकानुगुणमलं शब्दस्यार्थः पर्याप्तमिति । अतोऽत्र प्रयोगो वर्तते "एषा क्षुधितस्य तृप्त्यै अलम्" इत्यस्यार्थो भवत्यसौ नन्दिनी एतस्य क्षुधितस्य कुम्भोदरस्य सिंहस्य तृप्त्यै पर्याप्तेति । यस्य कृते पर्याप्तं भवति तस्य चतुर्थी विभक्तिर्भवति । अतोऽत्र तृप्त्याः कृते पर्याप्ता

नन्दिनी तस्मात् तृप्तिशब्दे प्रकृतसूत्रेण चतुर्थी विभक्तिः समभूत् । इत्थमेव कारकाणामसौ प्रयोगो विशिष्टं स्थानमलङ्कुरुते। इदानीं पुरतः पश्यामः।

एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च।
अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वम्॥

अत्रापि विशिष्टं कारकं विलोक्यते। इह पदमस्ति "अल्पस्य हेतोर्बहु हातुमिच्छन्" अत्रैव कारकं विशिष्यते । अल्पस्य हेतोरिति पदे षष्ठ्या विभक्त्याभूयत तत्र तृतीयया भवितव्यमासीत्। तत्र कारणभूतं सूत्रमस्ति-

"षष्ठी हेतुप्रयोगे"

हेतुशब्दस्य प्रयोगे हेत्वर्थे द्योतिते सति हेतुशब्दे हेत्वर्थशब्देष्वमुना सूत्रेण षष्ठी विभक्तिर्विधीयते। हेतौ शब्दे प्रयुङ्क्ते सत्यपि हेत्वर्थो विद्योतेत चेदनेन षष्ठी सञ्जायते। सूत्रमदो "हेतौ" इतिसूत्रस्य अपवादत्वं प्रदर्शयति। यथा "अन्नस्य हेतोर्वसति" अर्थादन्नस्य हेतुत्वात् निवसति। अत्र हेतु शब्दस्य साक्षात् प्रयोगोऽस्ति तथा निवासस्य हेतुरन्नमिति। अतोऽन्नशब्दे "षष्ठी हेतुप्रयोगे" इति सूत्रेण षष्ठी विभक्तिर्जायते । अत्रान्नपदेन सामानाधिकरण्यत्वात् हेतावपि षष्ठी भवति। तथैवेहापि प्रयोगो वर्तते।

"अल्पस्य हेतोर्बहु हातुमिच्छन्" अर्थात् स्वल्पस्य हेतुत्वात् बहु हातुमिच्छन्नित्यर्थो जायते। अत्र हेतुशब्दप्रयोगेऽपि बहुत्यागस्य हेतुरल्पत्वमिति। अतोऽनेन प्रवर्तमानेन सूत्रेणाल्पशब्दे षष्ठी विभक्तिः सञ्जायते। अतोऽल्पस्येति पदं समुद्भवति। अल्पस्य पदेन सामानाधिकरण्यत्वात् हेतावपि षष्ठी भवति। इत्थं प्रयोगोऽसौ विशिष्टकारकेषु निलीयते।

अथैकधेनोरपराधचण्डाद् गुरोः कृशानुप्रतिमाद् बिभेषि।
शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोघ्नीः।

पद्येऽस्मिन्नपि विशिष्टं कारकं दरीदृश्यते। अत्र अपादानं कारकं विशिष्यते। अत्र पदमस्ति "एकधेनोरपराधचण्डाद् गुरोः कृशानुप्रतिमाद् बिभेषि" पदेऽस्मिन् सर्वत्र पञ्चमी विभक्तिर्दृश्यते। सैव पञ्चमी विभक्तिरपादानकारकं विशिनष्टि। तत्र पाणिनीयं सूत्रं वर्तते-

"भीत्रार्थानां भयहेतुः"

अर्थाद्भयार्थप्रतिपादकानां रक्षार्थप्रतिपादकानाञ्च धातूनां प्रयोगे भयहेतौ कारकेऽपादानत्वं सूत्रमद आरोपयति । यथा "चौराद् बिभेति" अर्थाच्चौरहेतुत्वात् कश्चन भयमनुभवतीति । अत्र जुहोत्यादिगणीयो "ञिभी भये" इत्यस्य प्रयोगो वर्तते । अतो भयहेतुत्वाच्चौरशब्देऽनेन सूत्रेणापादानत्वं सिध्यति तथा "अपादाने पञ्चमी " इत्यनेन पञ्चमी विभक्तिर्जायते ।

तथैवात्र "एकधेनोरपराधचण्डाद् गुरोः कृशानुप्रतिमाद् बिभेषि" स एव जुहोत्यादिगणीयो "ञिभी भये" धातुरस्ति, अपि चैकधेनोः अपराधचण्डाद् कृशानुप्रतिमाद् गुरोरिति दिलीपस्य भयहेतुरतोऽत्र प्रकृतसूत्रेण गुर्वादिविशेषणपदेष्वपादानत्वं वितन्यत एवं "अपादाने पञ्चमी" इत्यनेन पञ्चमी विभक्तिर्जायते । इदमित्थं कारकं विशिष्टत्वं भजते । अधुनाग्रे व्रजामः ।

एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन ।
शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव ॥

अमुष्मिन् पद्येऽपि कारकस्य विशेष्यत्वं वरीवृत्यते । अत्र पदमस्ति यत् "शिलोच्चयः तमर्थं क्षितिपालमभाषत" इति विशिष्टं कारकं वीक्ष्यते । अत्र हेतुभूतं सूत्रमस्ति

"अकथितञ्च"

अपादानादिसंज्ञाभिरविवक्षितं यत् कारकं कर्मत्वमाप्नोति । यदि वक्तुस्तत् तत् कारकं वदितुमीप्सा न स्यात् तदेवाकथितमुच्यते । एतेष्वकथितेषु कारकेषु सम्बन्धसामान्यविवक्षायां "षष्ठी शेषे " इति सूत्रेण षष्ठ्या विभक्त्या भवितव्यम् किन्त्वनेन सूत्रेण षष्ठीं प्रबाध्य कर्मत्वमारोप्यते । अतस्सूत्रार्थो यदपादनादिरूपेष्वप्रतीयमानेषु सत्सु कर्मत्वेन विवक्षितं यत् तत् कर्मसंज्ञमिति । तत्र नियमनाय पद्यत्वेन केचिद्धातवो सम्बृहिता वर्तन्ते । ते चेमे –

दुह्याच्पच्दण्डरुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् ।
कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ॥

धातुभिरमीभिर्योगे यस्मिन् कर्मयुकि सत्यकथितमपादानाद्यविवक्षितरूपं तदेव कर्मत्वञ्जिहीते नान्यत् । महाभाष्यानुसारमस्य स्वरूपं किञ्चन भिन्नमस्ति । तद्यथा –

दुहियाचिरुधिप्रच्छिभिक्षिचित्रामुपयोगनिमित्तमपूर्वविधौ।
ब्रुविशासिगुणेन च यत् सचते तदकीर्त्तिमाचरितं कविना॥

अस्यार्थो यत् दुह्-याच्-रुध्-भिक्ष्-चित्रादीनामुपयोगे यन्निमित्तं तस्यापूर्व-विधौ कर्मत्वमेति। यथा दुह् धातोरुपयोगो दुग्धं गौश्च निमित्तं तस्मादकथितत्वात् कर्मत्वमिति। तथैव ब्रूशासोः प्रधानकर्मणा सम्बद्धं तदप्यकथितं परिगणितम्। यथा ब्रूधातोः प्रधानकर्म धर्मः तेन सम्बद्धो माणवकः, अतः कर्मत्वमेतीति।

इतोऽपि कश्चन नियमो वर्तते यत् "अर्थनिबन्धनेयं संज्ञा" अनेन विदधाना संज्ञार्थमातिष्ठते न हि केवलं धातुमिति। अतो ब्रू प्रोक्ते भाष्-वच्-अभिधादीनामपि ग्रहणं समाचर्यते। अतः प्रयोगेऽस्मिन् "शिलोच्चयः तमर्थं क्षितिपालमभाषत" भाष्धातोः प्रयोगेऽत्र "तमर्थ"मिति मुख्यकर्म तत्सम्बद्धो राजा क्षितिपालो दिलीपस्तस्मादनेन सूत्रेणात्र कर्मत्वं वितन्यते। इत्थं विशिष्टं कारकं विलक्षते।

कथं तु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनां।
इमामनूनां सुरभेरवेहि रुदौजसा तु प्रहृतं त्वयाऽस्याम्॥

अत्र प्रयोगद्वयं वर्तते। प्रथममपादानं विशिष्यते, द्वितीयमधिकरणं विशिष्यते। तत् पश्यामः। अत्र प्रयोगो वर्तते "इमामनूनां सुरभेरवेहि" अत्र सुरभिपदेऽपादानत्वं दृश्यते। तदेव विशिष्टं वर्तते। तत्र पाणिनीयं सूत्रं वर्तते –

"पञ्चमी विभक्ते"

अर्थाद्यत्र भिन्नवस्तुद्वयस्य किञ्चनैकं निर्धार्यते तत्रैव पञ्चमी विभक्तिर्जायते। सूत्रमिदं "यतश्च निर्धारणे " सूत्रस्यापवादो विद्यते। यथा माथुराः पाटलिपुत्रकेभ्य आढ्यतरा अर्थान्मथुरावासिनः पाटलीपुत्रवास्तव्येभ्यो धनवन्त इति। अत्र विभागत्वेन निर्धारणमस्ति। अत्र माथुरा निर्धार्यमाणा अपि च पाटलिपुत्रका निर्धारणावधयः। उभावपि भिन्नौ ततोंऽशांशिभावो न वरीवृत्यते। तस्मान्निर्धारणावधौ पाटलिपुत्रके प्रदत्तसूत्रेण पञ्चमी सञ्जायते।

तथैवात्र सुरभेरिमामनूनामित्यत्र सुरभेर्नाम कामधेनोरिमां नन्दिनीमनूनां नाम न्यूनां स्वल्पबलयुतामिति भावः। तर्ह्यत्र निर्धार्यमाणानूनेयं नन्दिनी तथा निर्धारणावधिः कामधेनुस्सुरभिस्तस्मादनेन सूत्रेणेह कामधेनुपदेऽ-पादानत्वमारोपितं तस्मात् पञ्चमी जायते।

अमुष्मिन्नेव पद्ये द्वितीयोऽपि प्रयोगो दरीदृश्यते। तत्र पदमस्ति "रुद्रौजसा तु प्रहृतं त्वयास्याम्" अर्थाच्छिवसामर्थ्यादस्यां नन्दिन्यां प्रहारः कृतस्त्वयेति भावः। अत्र अस्यामिति पदमस्ति तत्र सप्तमी विशिष्टत्वं भजते। तत्र हेतुभूतं पाणिनीयं सूत्रं वर्तते –

"सप्तम्यधिकरणे च"

अधिकरणे सप्तमी विभक्तिर्जायते चकाराद्दूरसमीपादिभ्योऽपीति। अत्राधारोऽधिकरणमिति सुस्पष्टमेव। तत्राधारस्त्रितयः। औपश्लेषिको वैषयिकोऽभिव्यापकश्चेति। अत्र त्रयाणामौपश्लेषिकः सम्भवति, उपश्लेषस्य भाव औपश्लेषिकः। उपश्लेषो नामा संयोगः। यत्र आधेयाधारयोस्संयोगसम्बन्धो भवति, स औपश्लेषिकः। आधारोयं सर्वत्राव्याप्त एकदेशी। अतोऽत्रापीयं धेनुर्नन्दिनि औपश्लेषिकाधारः प्रहृतमस्त्रमाधेयमिति। तस्मादिदं शब्दे स्त्रियां प्रवर्तमानेन सूत्रेणाधिकरणत्वात् सप्तमि अवाप्नोति। इत्थमयमपि प्रयोगो विशिष्टत्वं भजते।

अनेन प्रकारेण सम्पूर्णे रघुवंशे तथा संस्कृतसाहित्ये विशिष्टकारकाणां प्रयोगा वर्तन्त एव। तर्हि तादृशां प्रयोगाणामध्ययनमतीवावश्यकं वर्तमाने परिलक्ष्यते। तेन ज्ञायते यत् कथं कस्मिन्नर्थे भिन्न-भिन्नकारकं प्रवृत्तं भवति। कारणं वाक्यरचनायां क्वचिदर्थकथनाय तेषामतीवावश्यकता सम्भवति।

किन्तु वर्तमानपरिप्रेक्षे विशिष्टकारकाणां प्रयोगा न्यूनायन्ते। तस्मात् तेषां संरक्षणाय तेषां ज्ञानमावश्यकमिति। तमेव हेतुं लक्षीकृत्य मया इदं "रघुवंशमहाकाव्ये द्वितीये सर्गे विशिष्टानां कारकप्रयोगाणां परिशीलनमिति" मदीयं शोधपत्रं प्रत्यपादीति।

सर्वलोकहृदि व्याप्तं शब्दब्रह्मस्वरूपिणं।
नत्वा वाकं मदीयाञ्च संयामि कलिताञ्जलिः॥

सन्दर्भाः -

1. [1] नाट्यशास्त्रम्) –अध्याय १ (११४ /
2. [1] काव्यप्रकाशम्) –उल्लास १(२ /
3. [1] काव्यप्रकाशम् –(उल्लास १ ४ /
4. [1] रघुवंशम्) –सर्ग २(१ /
5. [1] पा) – अष्टाध्यायी.२ (१४/३/
6. [1] रघुवंशम्) –सर्ग २(८ /

7. [1] पा) – अष्टाध्यायी.२(२१/३/
8. [1] पा) – अष्टाध्यायी.२(१८/३/
9. [1] वै) – कौमुदी.सि.वार्तिकम्(११०४/११०३-
10. [1] रघुवंशम्) –सर्ग २(१६ /
11. [1] पा) – अष्टाध्यायी.२(६७/३/
12. [1] पा) – अष्टाध्यायी.३(१८८/२/
13. [1] पा) – अष्टाध्यायी.२(६५/३/
14. [1] पा) – अष्टाध्यायी.१(२६/१/
15. [1] पा) – अष्टाध्यायी.२(६९/३/
16. [1] रघुवंशम्) –सर्ग २(२४/
17. [1] पा) – अष्टाध्यायी.२(८/३/
18. [1] पा) – अष्टाध्यायी.१(८४/४/
19. [1] पा) – अष्टाध्यायी.२(२३/३/
20. [1] पा) – अष्टाध्यायी.१(२/४/
21. [1] पा) – अष्टाध्यायी.१(९०/४/
22. [1] रघुवंशम्) –सर्ग २(३४ /
23. [1] पा) – अष्टाध्यायी.२(१८/३/
24. [1] रघुवंशम्) –सर्ग २(३९ /
25. [1]पा) – अष्टाध्यायी.२(१६/३/
26. [1] वै) – कौमुदी.सि.वार्तिकम्(११६४-
27. [1] रघुवंशम्) –सर्ग २(४७/
28. [1] पा) – अष्टाध्यायी.२(२६/३/
29. [1] पा) – अष्टाध्यायी.२(२३/३/
30. [1] रघुवंशम्) –सर्ग २(४९ /
31. [1] पा) – अष्टाध्यायी.१(२५/४/
32. [1] पा) – अष्टाध्यायी.२(२८/३/
33. [1] रघुवंशम्) –सर्ग २(५१ /
34. [1] पा) – अष्टाध्यायी.१(५१/४/
35. [1] पा) – अष्टाध्यायी.२(५०/३/

36. [1] वै(१९२-पृष्ठ /२-श्रीधरमुखोल्लासिनीहिन्दीव्याख्या भाग) -कौमुदी.सि.
37. [1] वै(१९४-पृष्ठ /२-श्रीधरमुखोल्लासिनीहिन्दीव्याख्या भाग) -कौमुदी.सि.
38. [1] रघुवंशम्) –सर्ग २(५४ /
39. [1] पा) – अष्टाध्यायी.२(४२/३/
40. [1] पा) – अष्टाध्यायी.२(४१/३/
41. [1]पा) – अष्टाध्यायी.२(३६/३/

सिद्धान्तलक्षणे शिवदत्तमिश्रविरचितगङ्गाक्रोडपत्र धर्मदत्त (बच्चा झा) विरचितगूढ़ार्थतत्वालोकक्रोडपत्रयोः विमर्शः

।।तत्वचिन्तामणिः।।

विमर्शकः–पं. यदुपति आचार्य काशी

अत्रोच्यते

प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेद्कावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः।

गंङ्गा

नन्वित्यादिशाङ्कायां सिद्धान्तमाह **अत्रोच्यते इति।**

मयेत्यध्याहार्यम्, अस्मत्पदार्थो मणिकारः, तस्य समवेतत्वसम्बन्धेन तृतीयार्थकृतौ अन्वयः, कृतेश्च जन्यतासम्बन्धेन धात्वर्थव्यापारेऽन्वयः धात्वर्थश्च ज्ञानानुकूलो व्यापारः, धात्वर्थस्य च निरूपितत्वसम्बन्धेन कर्माख्यातार्थविषयतायामन्वयः, तादृशाविषयतायाः स्वरूपसम्बन्धेन प्रथमान्तपदार्थव्याप्तौ अन्वयः।

तथाच जिज्ञासाविषयीभूता मणिकृसमवेत कृतिजन्यज्ञानानुकूलव्यापारविषयतावती प्रतियोग्यसमानाधिकरण हेतु समानधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नभिन्नसाध्यसामानाधिकरण्य भिन्ना व्याप्तिः इति चिन्तामाणि वाक्यार्थबोधः।।

गूढ़ार्थतत्वालोकः

मूले नन्वित्यादिशङ्कासिद्धान्तमाह अत्रोच्यते इत्यादि, जिज्ञासाविषयीभूत, पूर्वपक्षसमाप्त्यनन्तरं वा हेतुसमानधिकरणतादृशाभावप्रतियोगितावच्छेदकावच्छिन्नभिन्नसाध्यसामानधिकरण्या भिन्ना व्याप्तिः प्रतिपत्त्यनुकूलव्यापारविषय इत्यर्थः।।

विमर्शः

गङ्गायां अत्रोच्यते इत्यत्र अत्रशब्देन प्रकृतत्वमात्रमुक्तं **गूढ़ार्थतत्वालोके** तु आनंतर्यमपि उक्तं पूर्वपक्षसमाप्त्यनन्तरं इति।।

अथात्र यद्धमावच्छिन्नवाचकपदोत्तरं नञ्ादिपदं श्रूयते तेन तद्धर्मावच्छिन्नप्रतियोगिताकभेदावगाहनं क्रियते इति नियमात् साध्यभेद एव प्रतियोगितावच्देदकावच्छिन्ने विधेयः। न च मूलकारस्य तादृशनियमविपरीतार्थे कथं तात्पर्यं ज्ञायते इति वाच्यम्। 'वह्नित्वावच्छिन्नस्य सर्वस्यैव धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकीभूततत्तद्व्यक्तिवावच्छिन्नत्वादि'ति **जगदीशग्रन्थ** स्वारस्येन यत्पदार्थे एव प्रतियोगितावच्छेदकावच्छिन्नभिन्नत्वस्य विधेयत्वावगमादिति चेन्न। तादृशनियमानुरोधे सति तादृशप्रतियोगितावच्छेदकावच्छिन्नं यद्भिन्नं भवति तत्सामानाधिकरण्यमित्येव लक्षणशरीरं स्यात् तथा च धूमावन् वह्नेरित्यादवतिव्याप्तिः तादृश प्रतियोगितावच्छेदकावच्छिन्ने घटे धूमभेदसत्त्वात्, अतः प्रतियोगितावच्छेदकावच्छिन्नत्वावच्छेदेन साध्यभेदो निवेशनीयः तदर्थश्च तादृशप्रतियोगितावच्छेदकावच्छिन्नत्वव्यापको यो भेदस्तत्सामानाधिकरण्यमिति, एवं च धूमवान् वह्नेरित्यत्र तादृशप्रतियोगितावच्छेदकावच्छिन्ने धूमे साध्यभेदविरहान्नातिव्याप्तिः। नच व्यापकत्वनिवेशे गौरवमिति वाच्यम्। भवन्मतेऽपि प्रतियोगितावच्छेदकावच्छिन्नघटभेदसत्वादतिव्याप्तिवारणाय व्यापकत्वार्थकवीप्सादरात्। न च तादृशप्रतियोगितावच्छेदकावच्छिन्नत्वावच्छिन्नप्रतियोगिताकभेदनिवेशो नतु सामान्याभावनिवेश इति वाच्यम्। अन्यूनवृत्तिधर्मस्यैवानुयोगितावच्छेदकत्वमिति नियमेन प्रतियोगितावच्छेदकावच्छिन्नत्वावच्छिन्नानुयोगितासाध्यभेदस्यैव निवेशात्। न चोभयभेदस्य केवलान्वयितया साध्यघटोभयभेदस्य प्रतियोगितावच्छेदकावच्छिन्ने सत्वादतिव्याप्तिरिति वाच्यम्। साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदस्यैव निवेश्यत्वात् एवंसति प्रमेयवान् वाच्यत्वादित्यत्र प्रमेयत्वावच्छिन्नप्रतियोगिताकभेदाऽप्रसिध्द्याऽव्याप्तिः स्यादिति। न च यद्धर्मसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकभेदस्य तादृशप्रतियोगतिावच्छेदकाविच्छन्नत्वव्यापकत्वं तद्धर्मावच्छिन्नसामानाधिकरण्यं विवक्षणीयम् एवञ्च प्रमेयत्वसमानाधिकरणवाच्यत्वत्वावच्छिन्नप्रतियोगिताकभेदस्य प्रसिद्धत्वान्नाव्याप्तिरिति वाच्यम्। तादृशलक्षणस्योदक्षरत्वात् क्लिष्टकल्पनापत्तेश्च अतो नञ्व्यत्यासः कृत इति ध्येयम्।।

गूढार्थतत्वालोकः

नन्वन्वयप्रतियोग्यनुयोगिपदार्थाव्यवधानेनोपस्थितिरूपाया आसत्तेः स्वाव्यवहितोत्तरत्वपूर्वत्वान्यतरसम्बन्धेनैकसाकाङ्क्षपदविशिष्टापरसाकाङ्क्षपदज्ञानस्य वा गिरिर्भुक्तमग्निमान् देवदत्तेन, घटो न कम्बुग्रीवादिमान् शुक्लः पटः इत्यादिवाक्यतः सत्यपि योग्यतातात्पर्य्यादिज्ञाने देवदत्तकर्तृकभोजनमग्निमदभिन्नमचलं शुक्लपटभिन्नकम्बुग्रीवादिमद्घटं नावगच्छन्ति गृहीतशब्दशक्तिका अपीति शाब्दबोधकारणताया व्यवस्थापितत्वात् कथं प्रतियोगितावच्छेदकावच्छिन्नान्यत्वप्रतीतिः। न च मा प्रतीयतां को दोष, तादृशप्रतियोगितावच्छेदकावच्छिन्नवृत्तिभेदप्रतियोगिसाध्यसामानाधिकरण्यस्य व्याप्तित्वे क्षत्यभावादिति वाच्यम्,वह्नित्वावच्छिन्नस्येत्याद्यव्याप्तिपरग्रन्थे साध्ये एव भेदविरोधिप्रतियोगितावच्देदकीभूततादृशप्रतियोगितावच्छेदकावच्छिन्नत्वप्रदर्शनेन तादृशभेदस्यैव लक्षणघटकताप्रतीतेः। अथ नातिभारः कार्यकारणभावस्य ग्रन्थविरोधेन येन प्रकृतविषये सङ्क्.ोचमासादयेदिति चेन्न, प्रतियोगितावच्छेदकावच्छिन्नघटादिवृत्तिभेदप्रतियोगित्वात् साध्यस्यातिव्याप्ते। न चावच्छेदकावच्छेदेनान्वयस्यौत्सर्गिकत्वेन प्रतियोगितावच्छेकावच्छिन्नत्वव्यापकभेदप्रतीतेर्नातिव्याप्तिरिति वाच्यम्, उभयभेदमादायातिव्याप्त्या साध्यतावच्छेदक एव भेदप्रतियोगितावच्छेदकत्वस्य विवक्षणीयता प्रमेयसाध्यकेऽव्याप्तेः प्रमेयत्वस्य भेदप्रतियोगितानवच्छेदकत्वात् उभयभेदस्य केवलान्वयित्वेनोभयसाध्यकव्यभिचारिण्यतिप्रसङ्ग.ाच्च। प्रतियोगितावच्छेदकावच्छिन्नत्वव्यापकोभयावृत्तिधर्ममात्रावच्छिन्नप्रतियोगिताकभेदप्रतियोगितावच्छेदकसामानाधिकरण्यस्य साध्यतावच्छेदकेविवक्षणेऽपि प्रमेयसाध्यकेऽव्याप्तेः अत एव प्रतियोग्यवृत्तितादृशभेदप्रतियोगिसाध्यसामानाधिकरण्यविक्षदिर्निरस्ता। व्युत्पत्त्वैचित्र्येण प्रतियोगितावच्छेदकावच्छेदेन साध्यतावच्छेदकभेदविवक्षेण प्रमेयसाध्यतावच्छेदकस्थले दोषस्य दुर्वारत्वात्। प्रतियोगितानिरूपितावच्छेदकावच्छेदेनसाध्यतावच्छेदकता विशिष्ठान्यत्वस्य सामानाधिकरण्य, स्वावच्छेदकसंबंन्धवच्छिन्नत्व, स्ववृत्तित्व, (स्वावच्छेदकानवच्छिन्नत्वसंबन्धावछिन्नस्ववृत्तित्व) स्वावछिदकानवछिन्नत्वैतच्चतुष्टयसंबन्धेन विवेक्षणे च अतिगौरवात्।

उच्यते, तथास्थितासत्तेस्तात्पर्यविषयानिर्वाहकत्वेआसत्त्यन्तरकल्पनाया दृष्टत्वात् काव्यप्रबन्धेषु **'नायं सुधांशु किन्तर्हि व्योम गङ्ग.ासरोरूहम्'** इत्यादौ तत्र ह्येतद्भिन्नसुधांशौ व्योमगङ्ग.ासरोरूहत्वप्रतीतेर्विवक्षितविच्छित्तिविशेषाप्रत्यायकत्वात् प्रकृतेऽपि विवक्षितलघुलक्षणप्रत्ययाय प्रतियोगितावच्छेदकावच्छिन्नपदनञ्पदार्थयोरव्यवधानेनोपस्थितिकल्पना पदयोर्वाऽव्यवधाानेनान्वयानुसन्धानकल्पना युक्तैवेति। एवं यत्पदघटितवाक्ये नञ्समभिहारे यत्पदार्थस्य विशेष्यत्वयोग्यत्वे तस्यैतत्त्वमिति नञ्समभिहारेऽपि स एव विशेष्योऽन्यथोदाहरणवाक्यान्नञ्पदघटिताद् वह्निमद्भेदधूमवद्भेदयोर्व्याप्यव्यापकभावो न प्रतीयेत नियमतः प्रतियोग्यभावान्वयस्य तुल्ययोगक्षेमत्वादिति।।

एतेन तादृशप्रतियोगितावच्छेदकत्वव्यापककूटत्वावच्छिन्नवत्त्वं विवक्षणीयम्। व्यापकता च स्वाश्रायभेदप्रगितावच्छेदकसामानाधिकरण्यसम्बन्धेनेत्यपि निरस्तम्। समवाये प्रमेयसाध्यकातिव्याप्तिवारणेप्युक्तसम्बन्धविशेषेण प्रमेयसाध्यकातिव्याप्तितादवस्थ्यात् तत्तद्घटभेरकूटत्वस्यापि तदृशत्वात्। तादृशप्रतियोगितावच्छेदकावच्छिन्नत्वसमानाधिकारणोभयावत्त्धिर्म्मत्वध्यापकतायाः स्वाश्रयभेदप्रतियोगितावच्छेदकत्वसम्बन्धेन कूटत्वे निवेशे चासम्भवस्य जागरूकत्वादिति चेन्न। साध्यतावच्छेदकातिरिक्तव्यासज्यवृत्तिधर्मानवच्छिन्नत्वस्य प्रतियोगिताविशेषणत्वेऽसम्भवाप्रसक्त्या प्रागुक्तसामान्यभेदनिवेशस्यादुष्टत्वात्। स्ववृत्तिभेदीयतद्घटत्वावच्छिन्नप्रतियोगितासम्बन्धेन पटसाध्यकतद्घटत्वे सद्धेतौ यावदभावं तद्व्यक्त्यभावञ्चादाय लक्षणसम्भवासम्भवाच्चेति दिक्।

।।जागदीशी।।

वह्नित्वावच्छिन्नस्य सर्वस्यैव धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकीभूततत्तद्व्यक्तित्वावच्छिन्नत्वादव्याप्ति:इति अन्यथा व्याचष्टे प्रतियोगितानवच्छेदको यो धर्म इति तथाच प्रतियोगितावच्छेदकेत्यस्य भावप्रधाननिर्देशतयाऽवच्छिन्नपदस्याऽवच्छिन्नप्रतियोगिताकपरतया

तादृशप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिकभिन्नत्वं लम्यते इति मूले नावच्छिन्नपदस्य वैयर्थ्यमिति ध्येयम्।।

गङ्गा

वन्हित्वावच्छिन्नस्य सर्वस्यैवेति सर्वस्यैव वह्नेरित्यर्थः। तत्तद्व्यक्तित्वावच्छिन्नाभिन्नत्वाभावादित्यर्थः। अव्याप्तिरिति। वह्नि मान् धूमादित्यत्र सर्वेषामेव वह्नीनां धूमसमानाधिकारणो यश्चालनीयन्यायेन तत्तद्व्यक्तिर्नास्तीत्यभावस्तत्प्रतियोगितावच्छेदकावच्छिन्नभिन्नत्वाभावाद्व्याप्तिरिति यावत्। अन्यथा व्याचष्टेसाध्ये प्रतियोगिभेदमुपेक्ष्य साध्यतावच्छेदके प्रतियोगितावच्छेदकभेद निवेशयति। तथाच हेत्वाधिकरणवृत्यात्यन्ताभावप्रतियागितानवच्छेदकं यत्साध्यतावच्छेदकं तदवाच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरित्यर्थः। वाह्निमान् धूमादित्यत्र धूमसमानाधिकरणाऽत्यन्ताभावप्रतियोगितावच्छेदकं तद्व्यक्तिं तद्भिन्नत्वस्य वह्नित्वे सत्त्वान्नाव्याप्तिः।

नन्वेवमपि धूमवान् वह्नेरित्यादौ वह्निसमानाधिकारणत्यन्ताभावप्रतियोगितावच्छेदकघटत्वभेदस्य धूमत्वघटोभयभेदस्य वा घूमत्वे सत्त्वेनाऽतिव्याप्तिरिति चेन्न। प्रतियोगितानवच्छेदकेत्यनेन तादृशप्रतियोगितावच्छेदकसामानन्यभेदो विवक्षणीयः। तदर्थश्च प्रतियोगितावच्छेदकत्वेतरधर्मानवच्छिन्नप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताक भेद इति।

गूढार्थतत्वालोकः

वह्नित्वावच्छिन्नस्य सर्वस्यैवेत्यादि। अत्र वह्नित्वावच्छिन्नस्येत्युक्तिः **सार्वभौमीयव्याख्यान्दूषयितुं,** तथाहि–तत्तद्वन्ह्यभावमादायाव्याप्तिवारणय यत्पदं लुप्तसप्तमीकमवच्छिन्नपदञ्चावच्छेदकतानिरूपितार्थकं स्वीकृत्य हेतुसमानाधिकरणप्रतियोगिव्यधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगित्वात्यन्ताभाववत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यमेवमूलतात्पर्यार्थो वाच्यः, प्रतियोगितायाश्च व्याप्यवृत्तित्वाभ्युपगमान्नात्र दोषावसरः।

।।दीधितिः।। प्रतियोग्यसमानधिकरणेति। प्रतियोग्यसमानाधिकरणयद्रूपाविशिष्टसमानाधिकरणात्यन्ताभावप्रतियोगित

ानवच्छेदको यो धर्मस्तद्धर्मावच्छिन्नन येनकेनापि समं सामानाधिकरण्यम्। तद्रूपविशिष्टस्य तद्धर्मावच्छिन्नयावन्निरूपिता व्याप्तिरित्यर्थः।

।। निष्कृष्टलक्षणम्।।

प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणात्यन्ताभावीयप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिः।।

कर्मकारकलक्षणपरिष्कार:

श्याम-सुन्दर-शर्मा

1. शोधपत्रसार: (Abstract)

'फलाश्रय: कर्म, व्यापाराश्रयश्च कर्ता भवति' इति नियमानुरोधेन गमिधातुसमभिव्याहारे संयोगावच्छिन्नव्यापारस्य गमिधात्वर्थत्वे संयोगरूपफलाश्रयत्वात् ग्रामादीनां कर्मत्वं सिद्ध्यति। गमन-व्यापाराश्रयत्वाच्चैत्रादीनाञ्च कर्तृत्वं सिद्ध्यतीति बहुधोक्तम्। तत्रैव फलाश्रयत्वे विप्रतिपत्तिर्भवति। तद्यथा - 'ग्रामं गच्छति चैत्रः' इति वाक्यात् 'ग्रामनिष्ठसंयोगानुकूलव्यापारानुकूलकृतिमान् चैत्रः' इति शाब्दबोधो भवति। तत्र चैत्रनिष्ठव्यापारजन्य: य: संयोगः चैत्रग्रामसंयोगः, स: संयोग: यथा ग्रामे वर्तते, तथैव ग्रामगमनक्रियाकर्तरि चैत्रादावपि वर्तते। संयोग: संबन्ध:, तस्य द्विष्ठत्वात्। तथा च यथा ग्रामे संयोगरूपफलाश्रयत्वस्य विवक्षायां ग्रामपदोत्तरं द्वितीया भवति। तथैव चैत्रेऽपि संयोगरूपफलाश्र-यत्वस्य विवक्षायां चैत्रवाचकस्वपदोत्तरमपि द्वितीया स्यादिति 'स्वं गच्छति चैत्रः', 'चैत्रं गच्छति चैत्र:', 'आत्मानं गच्छति चैत्र:' इत्यादीनां प्रयोगापत्तिर्जायते, 'स्व(चैत्र)निष्ठ: य: ग्रामसंयोगः, तदनुकूलव्यापाराश्रयत्वस्य चैत्रेऽबाधितत्वात्। शोधपत्रेऽस्मिन् एतद्दूषणोद्धार: वर्तते।

पक्ष: - 01 - परसमवेतत्वपक्षमुपस्थाप्य दूष्यते -

2. परिहार: - परसमवेतत्वस्यापि द्वितीयार्थस्वीकार: -

'स्वं गच्छति चैत्रः', 'चैत्रं गच्छति चैत्र:', 'आत्मानं गच्छति चैत्र:' इत्यादीनामनिष्टप्रयोग-वारणाय 'न प्रदीपप्रकाशसिद्धिवत्तत्सिद्धेः'[115] इति न्यायसूत्रव्याख्याने तात्पर्यटीकायां क्रियाया: विशेषणत्वेन 'परसमवेतत्वमपि द्वितीयार्थ:' इति प्राच्यनैयायिकेन वाचस्पतिमिश्रेण स्वीकृतम्। तथा च भवानन्देनाप्यङ्गीकृतम्।[116]

---

[115] न्यायसूत्रम्, 2-1-19.

[116] "अत्र 'भूमिं प्रयाति', 'तरू त्यजति खग:' इत्यादौ धात्वर्थतावच्छेदकसंयोगविभागरूपफलवत्त्वेऽपि स्वस्य, स्वं प्रयाति त्यजती-त्यप्रयोगात्, धात्वर्थे परसमवेतत्वमपि विशेषणं देयम्।", कारकचक्रम्, अनुच्छेद: - 25, पृष्ठसंख्या- 22.

अर्थात् - 'क्रियाजन्यफलशालित्वं कर्मत्वम्' इति स्थाने 'परसमवेतक्रियाजन्यफलशालित्वं कर्मत्वम्' इति वक्तव्यम्। अत्र परसमवेत्वघटितपरपदेन यस्य कर्मत्वमपेक्षते तदपेक्षया परं ग्राह्यम्। पर-समवेतत्वम् = अन्यसमवेतत्वम् = भेदवत्समवेतत्वम्। परस्मिन् कर्तरि क्रियाया: समवेतत्वम्। अर्थात् 'यस्य कर्मसंज्ञाविवक्षिता तद्भिन्ने समवेता या क्रिया तज्जन्यफलशालित्वं कर्मत्वम्' भवतीति। तथा च 'ग्रामं गच्छति चैत्रः' इत्यत्र ग्रामपदोत्तरद्वितीयायाः 'आधेयत्वम्' 'परसमवेतत्वम्' चार्थः। तत्राधेयत्वे निरूपितत्वसंबन्धेन, भेदवदित्यत्र पदार्थैकदेशभेदे च प्रतियोगित्वसंबन्धेन (स्वनिष्ठप्रतियोगितानिरूप-कत्वसंबन्धेन) प्रकृत्यर्थस्य ग्रामस्यान्वयः। द्वितीयार्थाधेयत्वस्य संयोगरूपफले आश्रयत्व-संबन्धेनान्वय:, तथा च द्वितीयार्थभेदवत्समवेतत्वस्य च धात्वर्थे संयोगानुकूलव्यापारे स्वरूपसंबन्धे-नान्वयः। व्यापारस्यानुकूलत्वेन आख्यातार्थकृतौ, तस्याश्चाश्रयत्वेन प्रथमान्तचैत्रपदार्थचैत्रव्यक्तावा-न्वयः। ग्रामभिन्नसमवेता = ग्रामप्रतियोगिकभेदाश्रयसमवेता। ग्रामभिन्नचैत्रसमवेतक्रियाजन्यफला-श्रयत्वस्य ग्रामे सत्त्वात् ग्रामस्य कर्मत्वमिति सिद्ध्यति। तथा च ग्रामभिन्नसमवेतक्रियाश्रयत्वस्य चैत्रे सत्त्वात् 'ग्रामं गच्छति चैत्रः' इति वाक्यात् 'ग्रामभिन्नसमवेता ग्रामनिष्ठसंयोगजनिका या क्रिया, तदनुकूलकृतिमांश्चैत्रः' इति वा 'ग्रामवृत्तिर्यः संयोगः, तदनुकूलः यः ग्रामप्रतियोगिकभेदवच्चैत्रसमवेतो व्यापार:, तदनुकूलकृतिमांश्चैत्र:' इति वा शाब्दबोधो जायते। (आरेख: - 01)



शाब्दबोध: - 'ग्रामभिन्नसमवेता ग्रामनिष्ठसंयोगजनिका या क्रिया, तदनुकूलकृतिमांश्चैत्र:'।

3. पदार्थैकदेशान्वयापत्तिमाशङ्क्य समाधत्ते -

नन्वत्र द्वितीयापदार्थ: पर: = भेदवान्, तदेकदेशो भवति परत्वम् = भेद:। अत: भेदवत्समवेत-त्वस्य द्वितीयार्थत्वे तदेकदेशे भेदे कथं प्रकृत्यर्थस्य ग्रामस्य प्रतियोगित्वसंबन्धेन अन्वय:? 'पदार्थः पदार्थेनान्वेति, न तदेकदेशेन' इति व्युत्पत्तिविरोधात्? तत्र समाधानम् - आकाङ्क्षावैचित्र्यात् = बोधवैचित्र्यादेकदेशेऽपि पदार्थान्तरान्वय इष्ट एवेति। तद्यथा - 'भेदविशेष्यकग्रामप्रकारकप्रतियोगि-कत्वसंसर्गकान्वयबोधं प्रति गमनपद-अव्यवहितोत्तरद्वितीयाविभक्तिज्ञानं कारणमि'ति।

4. परसमवेतत्वार्थकत्वेन 'चैत्रं गच्छति चैत्र:' इति वाक्यापत्तिरपाक्रियते -

पूर्वोक्तप्रकारेण आधेयत्वेन सह परसमवेतत्वस्यापि द्वितीयार्थत्वं स्वीकृत्य तथान्वयबोधप्रद-र्शनेन 'स्वं गच्छति चैत्रः', 'चैत्रं गच्छति चैत्र:', 'आत्मानं गच्छति चैत्र:' इत्यादिषु स्वम् = आत्मानम् = चैत्र इत्यस्य कर्मसंज्ञाविवक्षिता। अत: तदपेक्षया परत्वं ग्राह्यं भवति। परञ्च स्व(चैत्र)भिन्नस्य चैत्रेऽ-भावात् चैत्रनिष्ठक्रियाजन्यफलाश्रयत्वस्य स्वस्य न कर्मत्वम्। कर्मत्वाभावात् 'स्वं गच्छति चैत्रः', 'चैत्रं गच्छति चैत्र:', 'आत्मानं गच्छति चैत्र:' इत्यादिप्रयोगाणां नास्ति प्रामाणिकत्वापत्ति:। 'ग्रामं गच्छति चैत्र:' इत्यत्र तु ग्रामनिष्ठसंयोग:, तज्जनकक्रियाया: ग्रामान्यचैत्रसमवेतत्वेन ग्रामस्य कर्मत्वात् 'ग्रामं गच्छति चैत्र:' इति प्रयोगस्य प्रामाणिकत्वं भजते। परञ्च 'स्वं गच्छति चैत्र:' अत्र चैत्रनिष्ठतादृशसंयो-गजनकक्रियायाश्चैत्रे एव समवेतत्वाच्चैत्रान्यसमवेतत्वाभावाच्चैत्रस्य कर्मत्वाभावात् 'स्वं गच्छति चैत्र:' नेत्यादय: प्रयोगा:।

कर्मत्वं च स्वान्यसमवेतक्रियाजन्यसंयोगादिफलशालित्वे एव भवति। अत्र यस्य कर्मसंज्ञा अपेक्षते स: स्वपदेन गृह्यते। यत्र ग्रामभेद: तिष्ठति। तत्र क्रियाश्रयत्वमपि तिष्ठेत्। अर्थात् फलाश्रयत्वं व्यापाराश्रयत्वञ्च भिन्न-भिन्नव्यक्तिषु स्यात्। यदा फलाश्रयो ग्रामादय:, व्यापाराश्रयश्च चैत्रादय: भवन्ति, तदैव परसमवेतत्वस्य संभवात् ग्रामादीनामेव कर्मत्वं भवति, न तु चैत्रादीनामिति। चैत्रे चैत्र-भिन्ननिष्ठक्रियाजन्यफलाश्रयत्वाभावान्न तस्य कर्मत्वमिति। अत्र स्व(चैत्र)भिन्नसमवेतक्रियाश्रयत्वस्य चैत्रेऽसत्त्वात् 'स्वं गच्छति चैत्रः' इति न प्रयोग:। ग्रामभिन्नसमवेतक्रियाश्रयत्वस्य चैत्रे सत्त्वात् 'ग्रामं गच्छति चैत्र:' इत्येवं प्रयोग:।

5. परसमवेतत्वस्य द्वितीयार्थत्वे 'मल्लं गच्छति मल्ल:' इति प्रयोग: साध्यते -

उभयकर्तृकव्यापारजन्यसंयोगस्थले यत्र दूरे स्थितयोः द्वयोः मल्लयोः स्वस्वव्यापारवशात्पर-स्परं संयोगो भवति। तत्र 'मल्लं गच्छति मल्ल:' इति प्रयोग इष्यते,

प्रथममल्लनिष्ठव्यापारस्य द्वितीय-मल्लनिष्ठसंयोगं प्रति जनकत्वात्। अत्र प्रथमान्तमल्लपदेन यः प्रथममल्लो गृह्यते, द्वितीयान्तमल्ल-पदेन प्रथममल्लभिन्नद्वितीयमल्लं गृहीत्वा वाक्यार्थबोधस्य अबाधात्।

6. परसमवेतत्वस्य द्वितीयार्थत्वे 'स्वं गच्छति मल्लः' इति प्रयोगो निराक्रियते -

परं तु तत्रैव 'स्वं गच्छति मल्लः' इति प्रयोगो नेष्यते। किमर्थम्? तत्र मल्लपदेन यो मल्लः गृह्यते। स एव स्वपदेनापि ग्राह्यो भवति। तथा च 'स्वनिष्ठसंयोगजनकः स्वभिन्नमल्लनिष्ठो यो व्यापारः तदाश्रयः स्वपदार्थो मल्लो न भवति। अत्र संयोगस्य द्विनिष्ठत्वेऽपि, व्यापारस्य द्विनिष्ठत्वाभावात्। तथा च स्वनिष्ठसंयोगजनकस्वभिन्नसमवेतव्यापाराश्रयतायाः स्वस्मिन् बाधात् 'स्वं गच्छति मल्लः' इति नास्ति प्रयोगः। प्रथमद्वितीयमल्लयोरैक्यात् न तथा वाक्यप्रयोगः।

संयोगस्योभयकर्मजत्वे स्वनिष्ठसंयोगजनकक्रियाश्रयत्वं यस्मिन् स्यात् तस्यैव स्वापेक्षया कर्मत्वसंभवात्। यथा - चैत्रमैत्रोभयकर्मजसंयोगस्थले चैत्रनिष्ठसंयोगस्य मैत्रसमवेतक्रियाजन्यत्वे तादृशक्रियाश्रयत्वं मैत्रे एव स्यादिति मैत्रस्य कर्मत्वापत्त्या 'मैत्रं गच्छति चैत्रः' इति प्रयोगः संभवति, तथा 'चैत्रं गच्छति मैत्रः' इत्यपि।

7. परसमवेतत्वस्य द्वितीयार्थत्वेऽपि 'स्वं गच्छति चैत्रः' इत्यादिप्रयोगापत्तिः पुनरुपस्थाप्यते -

ननु शब्दस्य सर्वेऽर्थाः सर्वत्र न भासन्ते। न हि हर्यादिशब्दस्य सूर्याश्वविष्ण्वादयः षोडशार्थाः सर्वत्र प्रतीयन्ते। किं तु कश्चित् विवक्षित एवार्थः शब्दात् प्रतीयते। एवं च 'शाब्दबोधे बाधितांशं विहाय शाब्दबोधनियामकत्वम्' इति नियमानुरोधेन द्वितीयार्थयोराधेयत्वपरसमवेतत्वयोर्मध्ये परसमवेतत्व-भानस्य क्रियायां बाधितार्थत्वे, तं विनापि, आधेयत्वमात्रस्यैव फले भानसंभवेऽपि शाब्दबोधः स्यात्। अत्र शाब्दबोधे बाधितांशं परसमवेतत्वं परित्यज्य अबाधितांशम् आधेयत्वमात्रं गृह्यते। अत्र स्वनिष्ठ-संयोगजनकत्वं विषयीकृत्य 'स्वनिष्ठसंयोगजनकव्यापारवांश्चैत्रः' इति बोधतात्पर्येण, स्वसमवेत-क्रियायाः स्वस्मिन्नपि संयोगजनकत्वात् तादृशसंयोगरूपफलशालित्वेन स्वस्यापि कर्मत्वसंभवात् 'स्वं गच्छति मल्लः', 'स्वं गच्छति चैत्रः', 'चैत्रं गच्छति चैत्रः', 'आत्मानं गच्छति चैत्रः' इत्यादीनामनिष्ट-प्रयोगाणामसाधुता दुवारः इत्याशङ्कते।

8. परिहार: -

'द्वितीयान्तपदसमभिव्याहृतधातुना जायमानः द्वितीयार्थाधेयत्वान्वितफलजनकत्वप्रकारकः व्यापारविशेष्यको बोधः, परसमवेतत्वमपि व्यापारांशे विषयीकृत्येव सर्वत्र जायते' इति नियमदर्शनात् द्वितीयया फलान्विताधेयत्वबोधे, व्यापारे परसमवेतत्वबोधकसामग्र्या अपि योग्यताज्ञानादिघटिताया अपेक्षितत्वात् 'स्वं गच्छति चैत्र:' इत्यत्र परसमवेतत्वाभावान्न तादृशप्रयोगस्यापत्तिरिति।

अयमाशय: - परसमवेतत्वांशमविषयीकृत्य द्वितीयया क्वचिदपि ग्रामादिनिष्ठफलजनक-त्वस्य चैत्रक्रियायां बोधो न जायत इति, तादृशद्वितीयाधीनफलजनकत्वबोधे परसमवेतत्वस्याप्य-पेक्षा भवत्येव।

9. आपत्ति: - 'स्वं गच्छति चैत्र:' इत्यत्र द्वित्वावच्छिन्नप्रतियोगिताकभेदमादाय पुनराक्षेप: -

आधेयत्वेन सह परसमवेतत्वस्यापि द्वितीयार्थत्वस्वीकारेऽपि 'स्वं गच्छति चैत्रः' इति प्रयोगापत्तिं सूचयति - स्वस्मिन् स्वभेदो न भवतीति धिया 'स्वं गच्छति चैत्रः' इति प्रयोग: वारित:। परञ्चेदानीमुच्यते यत् द्वित्वावच्छिन्नत्वमादाय स्वस्मिन्नपि स्वप्रतियोगिकभेदोऽपि भवति। यथा - चैत्रस्य चैत्रप्रतियोगिकभेदवत्त्वविरहेऽपि, द्वित्वावच्छिन्नप्रतियोगिताकभेदमादाय चैत्रघटोभयत्वाव-च्छिन्नस्य भेदस्य चैत्रे सत्त्वात्, 'एकं नोभयम्' इति न्यायाच्च स्वस्मिन्नपि स्वभेदो लभ्यते। चैत्रे स्वत्वस्य विद्यमानत्वेऽपि, घटत्वस्याभावात् चैत्रघटोभयभेदोऽस्ति। तेन चैत्रघटोभयभेदमादाय चैत्रेऽपि चैत्रभिन्नत्वं प्राप्तम्। तस्मात् आधेयत्वेन सह परसमवेतत्वस्य द्वितीयार्थत्वेऽपि स्व(चैत्र)भिन्नसमवेत-क्रियाश्रयत्वस्य चैत्रे सत्त्वात् 'स्वं गच्छति चैत्रः', 'स्वं गच्छति मल्ल:' इत्यादिप्रयोगाणां प्रामाणिक-त्वापत्तिस्तथैव तिष्ठति।

10. परिहार: - प्रकृत्यर्थस्य द्वितीयार्थभेदे संबन्धान्तरेणान्वय: -

द्वित्वावच्छिन्नस्वभेदमादाय प्राप्तस्य 'स्वं गच्छति चैत्र:' इत्यादिप्रयोगस्य प्रामाणिकत्वं वारणाय द्वितीयार्थभेदवत्समवेतत्वस्यैकदेशे भेदे द्वितीयाप्रकृत्यर्थस्य ग्रामादे: प्रतियोगितया नान्वय:, अपि तु 'प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेन' अन्वयो वाच्य:। यथा - 'ग्रामं गच्छति चैत्र:' इत्यत्र द्वितीयाप्रकृति: ग्राम:, प्रकृत्यर्थ: ग्रामव्यक्ति:, प्रकृत्यर्थतावच्छेदकं ग्रामत्वम्, प्रकृत्यर्थतावच्छेदकावच्छिन्ना प्रतियोगिता, तथा च ग्रामस्य तत्प्रतियोगिकत्वसंबन्धेन द्वितीयार्थैक-देशे भेदेऽन्वयो ज्ञेय:।

अयमाशय: - द्वितीयाप्रकृत्यर्थतावच्छेदकं यद् ग्रामत्वं तादृशग्रामत्वावच्छिन्ना या ग्रामनिष्ठा भेदप्रतियोगिता तादृशप्रतियोगिताकत्वं भेदेऽस्तीति तादृशप्रतियोगिताकत्वसंबन्धेन ग्रामस्य भेदेऽन्वयो वक्तव्य:। तेन 'स्वं गच्छति चैत्रः' इत्यत्र द्वितीयाप्रकृतिस्वशब्दार्थः = चैत्रः, प्रकृत्यर्थतावच्छेदकं चैत्रत्वं, तदवच्छिन्नप्रतियोगिताको भेदः चैत्रो नेति भेदः, तद्वान् चैत्रो न भवतीति 'स्वं गच्छति चैत्रः' इति न प्रयोगापत्ति:। अत्र 'स्वं गच्छति चैत्रः' इत्यस्य प्रामाण्यापत्ति: निष्कर्षत्वेन समाप्ता।

11. आपत्ति: - 1 - तादृशसंबन्धेन भेदेऽन्वये 'द्रव्यं गच्छति चैत्र:' इत्यस्यानुपपत्ति: -

द्वितीयाप्रकृत्यर्थस्य ग्रामादे: द्वितीयार्थभेदवत्समवेतस्यैकदेशभेदे प्रकृत्यर्थतावच्छेदकावच्छि-न्नप्रतियोगिताकत्वसंबन्धेनान्वये कृते सति 'स्वं गच्छति चैत्रः' इत्यादीनान्तु प्रामाण्यापत्ति: वारिता। परञ्च 'द्रव्यं गच्छति चैत्र:' इत्यादीष्टप्रयोगाणाम् अप्रामाण्यं स्यात्। यथा - ग्रामोऽपि द्रव्यमेव, अत: द्रव्यत्वेन ग्रामस्य विवक्षायां 'द्रव्यं गच्छति चैत्र:' इति वाक्यप्रयोग इष्ट एवेति। परञ्चात्र द्वितीया-प्रकृतिकद्रव्यार्थस्य प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेन द्वितीयार्थभेदवत्समवेतत्व-स्यैकदेशे भेदेऽन्वये कृते सति चैत्रोऽपि द्रव्यं, ग्रामोऽपि द्रव्यमत: द्रव्यभिन्नत्वाभाव: चैत्रे। ग्रामरूप-द्रव्यनिष्ठसंयोगजनकव्यापारे चैत्रनिष्ठे द्वितीयाप्रकृत्यर्थतावच्छेदकद्रव्यत्वावच्छिन्नप्रतियोगिताकभेद-वत्समवेतत्वं नास्ति, चैत्रस्य द्रव्यत्वेन चैत्रे द्रव्यत्वावच्छिन्नप्रतियोगिताकभेदाभावात्। अत: 'द्रव्यं गच्छति चैत्र:' इतीष्टप्रयोगानुपपत्ति:।

12. आपत्ति: - 2 - तादृशसंबन्धेन भेदेऽन्वये 'मल्लं गच्छति मल्ल:' इत्यस्यानुपपत्ति: -

एवञ्च 'मल्लं गच्छति मल्ल:' इति वाक्यस्याप्यप्रमाणत्वापत्तिः। उभयकर्मभ्यां द्वयोर्मल्लयोः संयोगस्थले द्वितीयान्तद्वितीयमल्लनिष्ठसंयोग:, तज्जनकक्रियाया: प्रथमान्तप्रथममल्ले विवक्षया प्रयोगोऽयमिष्यते। परञ्च उक्तरीत्या संबन्धस्थापने तु प्रथमान्तप्रथममल्ले द्वितीयाप्रकृत्यर्थतावच्छेद-कमल्लत्वावच्छिन्नप्रतियोगिताकभेदवत्समवेतत्वं नास्ति। प्रथमान्तप्रथममल्ले मल्लत्वावच्छिन्नप्रति-योगिताकभेदवत्त्वविरहात्, 'मल्लं गच्छति मल्ल:' इत्यस्य वाक्यस्य प्रमाणत्वानुपपत्तिः, मल्लत्वाव-च्छिन्नत्वादुभयमल्लयोर्विद्यमानत्वात्।

13. परिहार: - भवानन्दमतानुसारं संबन्धान्तरेणान्वयेन समाधीयते -

एतावत्पर्यन्तं द्वितीयाप्रकृत्यर्थस्य ग्रामादे: भेदवत्समवेतत्वस्यैकदेशभेदे प्रकृत्यर्थतावच्छेदका-वच्छिन्नप्रतियोगिताकत्वसंबन्धेनान्वये कृते सति 'द्रव्यं गच्छति चैत्र:', 'मल्लं गच्छति मल्ल:' इत्यादीनां प्रामाण्यानुपपत्तिरापतिता। तद्दोषवारणाय कारकचक्रकारभवानन्दमतानुसारेण द्वितीया-प्रकृतिप्रत्यययो: सम्बन्धान्तरेणान्वय उच्यते - द्वितीयाप्रकृत्यर्थस्य 'तद्व्यक्तित्वावच्छिन्नप्रतियोगिता-कत्वसम्बन्धेन' द्वितीयार्थैकदेशभेदेऽन्वय: स्वीक्रियते।[117] द्वितीयाप्रकृत्या या व्यक्तिः विवक्षिता तन्निष्ठ-तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन द्वितीयार्थभेदवत्समवेतत्वघटकभेदेऽन्वयः स्वीक्रियते। तेन 'द्रव्यं गच्छति चैत्र:' इत्यत्र द्रव्यपदेन ग्रामव्यक्ते: विवक्षिततया तस्य ग्रामस्य तद्व्यक्तित्वावच्छि-न्नप्रतियोगिताकभेदस्य चैत्रे सत्त्वात्, तथा च 'मल्लं गच्छति मल्ल:' इत्यत्र द्वितीयाविभक्तिप्रकृत्या प्रथमान्तप्रथममल्लभिन्नद्वितीयान्तद्वितीयमल्लव्यक्तेरेव विवक्षिततया तद्गततद्व्यक्तित्वावच्छिन्न-प्रतियोगिताकभेदस्य एतन्मल्ले सत्त्वान्नानुपपत्ति:। प्रथमान्तप्रथममल्ले द्वितीयान्तद्वितीयमल्लत्वा-वच्छिन्नप्रतियोगिताकभेदाभावेऽपि तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदस्य सत्त्वेन भेदे प्रकृत्यर्थ-द्रव्यादे: तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेनान्वयं वक्ष्याम इति 'द्रव्यं गच्छति चैत्र:', 'मल्लं गच्छति मल्ल:' इत्यादीनां प्रामाण्यानुपपत्ति: नास्तीति।

प्रथममल्ले एतन्मल्लत्वं वर्तते। द्वितीयमल्ले च तन्मल्लत्वं विद्यते। तस्मान्मल्लत्वावच्छिन्न-त्वेन मल्लयोरभेदेऽपि एतन्मल्लत्वावच्छिन्न एतन्मल्ल:, तन्मल्लत्वावच्छिन्न: तन्मल्ल इति धिया मल्लयोर्भेदोऽवगन्तव्य:।

14. आपत्ति: - गदाधर: तद्व्यक्तित्वेति भवानन्दमतं दूषयितुं प्रथमहेतुं दर्शयति -

कस्यचित्पुरुषस्य घटत्वेन घटज्ञानन्तु विद्यते। परञ्च तेन 'एतद्घट:' न दृष्ट:। तस्मिन्नेतद्घट-ज्ञानाभावेऽपि 'घटमानय' इति श्रवणेन श्रोता घटमानयतीत्यनेन ज्ञायते

---

117 'प्रतियोगितामात्रेणान्वये आत्मनोऽपि स्वप्रतियोगिकद्वित्वाद्यवच्छिन्नप्रतियोगिताकभिन्नत्वात्तथैव दोषात्, अतो द्वितीयाद्यर्थफले यद्व्यक्तेरन्वय: 'तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन' प्रकृत्यर्थस्य कर्माख्यातार्थफलान्वयिनश्च परत्वेऽन्वय:'

कारकचक्रम्, अनुच्छेदक्रमाङ्क: 28, पृष्ठसंख्या- 24.

यत्पूर्वतोऽप्यनुपस्थित: शाब्द-बोधे भासते। यथा घटज्ञानसत्त्वे एतद्घटज्ञानाभावेऽपि 'घटमानय' इति वाक्यस्य बोध: प्रवर्तित:।

शब्दबोधे तात्पर्यज्ञानं कारणम्। तात्पर्यज्ञाने च संसर्ग: प्रकारविधेया भासते। संसर्गज्ञानाय च संसर्गघटितपदार्थानां ज्ञानमावश्यकमिति। अत: परम्परया संसर्गघटितपदार्थानां शाब्दबोधे कारणत्व-मिति। तेन शाब्दबोधात्पूर्वं संसर्गघटितपदार्थानां ज्ञानमावश्यकम्। 'द्रव्यं गच्छति चैत्र:', 'मल्लं गच्छति मल्ल:' इत्यादौ शाब्दबोधात्पूर्वं चैत्रमल्लव्यक्तिज्ञानाभावात् द्वितीयाप्रकृत्यर्थस्य तद्व्यक्तित्वावच्छि-न्नप्रतियोगिताकत्वसम्बन्धेन द्वितीयार्थैकदेशभेदेऽन्वय: स्वीकारोऽशक्य:।

द्रव्यादीनां प्रकृत्यर्थानां तद्व्यक्तित्वेन रूपेणोपस्थित्यभावे 'द्रव्यं गच्छति चैत्र:' इत्यत्र द्रव्यादीनां तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेनान्वयो न संभवति, किं तु शाब्दबोधानु-रोधेन द्रव्यस्य पूर्वोक्तप्रकारेण द्रव्यत्वाद्यवच्छिन्नप्रतियोगिताकत्वसंबन्धेन अन्वये कृते तूक्तं 'मल्लं गच्छति मल्ल:' 'द्रव्यं गच्छति चैत्र:' इत्यादीनामप्रामाण्यं तदवस्थमेवेत्यर्थ:।

15. हेतु: - 02 - तद्व्यक्तित्वेन ग्रहणासंभवे द्वितीयहेतुरुच्यते -

एकधर्मावच्छिन्नप्रतियोगिताया अन्यधर्मावच्छिन्नत्वसंसर्गत्वे प्रमाणाभावात्। एकधर्माव-च्छिन्नप्रतियोगिताया: तदेकधर्मावच्छिन्नसंसर्गत्वं स्वीक्रियते। तद्यथा - 'द्रव्यं गच्छति चैत्र:' इत्यत्र ग्रामस्योपस्थति: द्रव्यत्वेन भवति। अत: तस्य ग्रामस्य अन्यत्र भेदेऽन्वय: द्रव्यत्वावच्छिन्नप्रतियोगि-ताकत्वसम्बन्धेन भवितुमर्हति। तथैव 'मल्लं गच्छति मल्ल:' इत्यत्र च मलस्योपस्थिति: मल्लत्वा-वच्छिन्नत्वेन भवति। अतोऽत्र संसर्ग: मल्लत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्ध: भवितुमर्हति। यत्र व्यक्तिपदं स्यात्। तत्र एतद्व्यक्त्युपस्थितिरेतद्व्यक्तित्वावच्छिन्नत्वेन भवेत्। तत्र एतद्व्यक्तित्वाव-च्छिन्नप्रतियोगिताकत्वसम्बन्धेन अन्वय: स्यात्। तेन 'द्रव्यं गच्छति चैत्र:', 'मल्लं गच्छति मल्ल:' इत्यादौ द्वितीयाप्रकृत्यर्थस्य तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन द्वितीयार्थैकदेशभेदे नान्वय:।

एकधर्मावच्छिन्नप्रतियोगिताया अन्यधर्मविशिष्टस्य संसर्गत्वाङ्गीकारे, नीलघटवति प्रदेशे घटवृत्तिपीतघटव्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन घटविशिष्टस्याभावस्य सत्त्वाद्घटो नास्तीति बुद्धेः प्रमात्वप्रसङ्गात्।

16. ग्रन्थकारमते प्रमाण्यमुपस्थाप्यते -

प्रतियोगिविशेषिताभावबुद्धिरपि विशिष्टवैशिष्ट्यावगाहिनियमेन भवति। यत्र तत्तद्व्यक्तित्वाव-च्छिन्नं न भासते तत्र चैत्रत्वावच्छिन्नस्य मल्लत्वावच्छिन्नस्य द्रव्यत्वावच्छिन्नस्य च तत्तद्व्यक्ति-त्वावच्छिन्नप्रतियोगिताकत्वं संबन्ध: न भवितुमर्हति। तत्र द्रव्यत्वावच्छिन्नभेदबोधे द्रव्यत्वस्यैव भेदप्रतियोगितावच्छेदकत्वेन भानं संभवति, न तु तद्व्यक्तित्वस्य। एवं सति 'चैत्र: स्वं गच्छति' इति प्रयोगस्यापि प्रामाण्यं स्यात्। स्वपदार्थस्य चैत्रस्य द्वितीयार्थैकदेशभेदे द्वित्वावच्छिन्नप्रतियोगिताकत्व-संबन्धेनान्वय:। तथा च स्वभिन्नचैत्रसमवेता भवति क्रिया, तज्जन्यफलशालित्वञ्च स्वस्मिन्नस्ति 'स्वं गच्छति' इति प्रयोग: अबाधितस्स्यात्।

17. हेतु: - 03 - तद्व्यक्तित्वेन ग्रहणासंभवे तृतीयहेतुरुच्यते -

अन्वयितावच्छेदकानवच्छिन्नप्रतियोगितायाः संबन्धत्वस्य असंभवात् द्वितीयाप्रकृत्यर्थस्य तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन द्वितीयार्थैकदेशभेदे नान्वय:।

अयमाशय: - अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताया एव संबन्धत्वम्, न तु अन्वयि-तावच्छेदकानवच्छिन्नप्रतियोगितायाः। 'द्रव्यं गच्छति चैत्र:', 'मल्लं गच्छति मल्ल:' इत्यादौ अन्वयितावच्छेदकं द्रव्यत्वं मल्लत्वमेव, न तु तद्व्यक्तित्वम्। अत: 'द्रव्यं गच्छति चैत्र:', 'मल्लं गच्छति मल्ल:' इत्यादौ द्वितीयाप्रकृत्यर्थस्य द्वितीयार्थैकदेशभेदे तद्व्यक्तित्वावच्छिन्नप्रतियोगि-ताकत्वसम्बन्धेन नान्वय:। तथा च परसमवेतत्वस्य द्वितीयार्थत्वे पूर्वाभिहिता आक्षेपाः भवन्तीति।

पक्ष: - 02 - भेदप्रतियोगितावच्छेदकत्वपक्षमुपस्थाप्य दूष्यते -

18. समाधनम् - परसमवेतत्वस्थाने भेदप्रतियोगितावच्छेदकत्वं द्वितीयार्थ इति प्रतिपादनम् -

आधेयत्वेन सह परसमवेतत्वस्यापि द्वितीयार्थस्वीकारे दूषणमवशिष्टम्। अत: इदानीं परसम-वेतत्वस्थाने भेदप्रतियोगितावच्छेदकत्वं द्वितीयार्थेति स्वीक्रियते नव्यनैयायिकै:। पूर्वं यदा परसमवेतत्वं द्वितीयार्थ: तदा ग्रामभिन्नसमवेता भवति क्रिया। अर्थात् 'चैत्र: ग्रामो न' इति भेदस्याकार:। इदानीं भेदप्रतियोगितावच्छेदकत्वं द्वितीयार्थपक्षे 'ग्राम: क्रियावान् न' इति भेदस्याकार:। अत्र भेद: 'ग्राम: स्वनिष्ठसंयोगजनकक्रियावान्न' इत्याकारको ग्राह्य:। ग्रामनिष्ठसंयोगजनकक्रियावान् चैत्र:, क्रियाभाववान् ग्राम:। अत्र क्रियावत: भेद: ग्रामे तिष्ठति। अत: भेदस्य प्रतियोगी क्रियावान्। अत एतादृशभेदप्रतियोगितावच्छेदिका च क्रियैव। एतादृशभेदश्च ग्रामादौ फलशालिनि कर्मभूतपदार्थे वर्तते।

अत्र 'परसमवेतक्रियाफलशालित्वं कर्मत्वम्' इति न, किं तु 'स्वनिष्ठभेदप्रतियोगितावच्छेदक-क्रियाफलशालित्वं कर्मत्वम्' इति वक्तव्यमिति यथा - 'ग्रामं गच्छति चैत्र:' इत्यत्र ग्रामपदोत्तर-द्वितीयाया: 'आधेयत्वम्'



शाब्दबोध: - 'ग्रामनिष्ठसंयोगजनको, य: ग्रामनिष्ठभेदप्रतियोगितावच्छेदक: व्यापार:,

'भेदप्रतियोगितावच्छेदकत्वम्' चार्थः। प्रकृत्यर्थस्य ग्रामस्य आधेयत्वे निरूपितत्वसंबन्धेन, भेदे च निष्ठत्वसंबन्धेनान्वयः। द्वितीयार्थाधेयत्वस्य धात्वर्थफलरूपसंयोगे आश्रय-त्वेन तथा च अपरद्वितीयार्थभेदप्रतियोगितावच्छेदकत्वस्य धात्वर्थव्यापारे आश्रयत्वेनान्वयः। 'ग्रामं गच्छति चैत्र:' इत्यत्र तु ग्रामे चैत्रवृत्तिव्यापारवद्भेदस्य सत्त्वात् ग्रामवृत्तिभेदप्रतियोगितावच्छेदकत्वं व्यापारस्य भवतीति 'ग्रामं गच्छति चैत्र:' इति

प्रामाणिकप्रयोग:। तथा च 'ग्रामनिष्ठसंयोगजनको, य: ग्रामनिष्ठभेदप्रतियोगितावच्छेदक: व्यापारः, तदनुकूलकृत्याश्रयश्चैत्र:' इति शाब्दबोधः 'ग्रामं गच्छति चैत्र:' इति वाक्याज्जायते। (आरेख: - 02)

'ग्रामं गच्छति चैत्र' इत्यत्र स्वनिष्ठसंयोगजनकक्रियावान्न इत्याकारकभेदश्चैत्रे तु नास्त्येव चैत्रस्य ग्रामनिष्ठसंयोगजनकक्रियाश्रयत्वादेव, किं तु तादृशभेदो ग्रामे वर्तते। ग्रामस्य क्रियाश्रयत्वा-भावात्। स्वम् = ग्राम:, तन्निष्ठसंयोग:, तज्जनकक्रिया, तद्वान् चैत्र:, तदभाववान् ग्राम:। एवं लक्षण-समन्वय:। ग्रामवृत्तितादृशभेदप्रतियोगी क्रियावान् चैत्र एव। चैत्रनिष्ठाया भेदप्रतियोगिताया अवच्छे-दिका च चैत्रनिष्ठा ग्रामवृत्तिसंयोगजनिका सा क्रियैव तादृशक्रियाजन्यसंयोगाश्रयत्वेन ग्रामस्य कर्म-त्वसंभवात् 'ग्रामं गच्छति चैत्र:' इति प्रयोग: उपपन्न:।

'द्रव्यं गच्छति चैत्र:' इत्यत्र ग्रामरूपद्रव्यवृत्तिभेदप्रतियोगितावच्छेदकत्वस्य व्यापारे सत्त्वात् द्रव्यनिष्ठो य: संयोगजनकक्रियावान्न इत्याकारकभेद: द्रव्ये, तत्प्रतियोगितावच्छेदिका या चैत्रनिष्ठा क्रिया, तज्जन्यसंयोगाश्रयत्वेन द्रव्यस्य कर्मत्वात् 'चैत्रो द्रव्यं गच्छति' इत्यपि प्रयोगानुपपत्तिर्नास्ति।

'मल्लं गच्छति मल्ल:' इत्यत्र द्वितीयान्तद्वितीयमल्लवृत्तिभेदप्रतियोगितावच्छेदकत्वस्य व्यापारे सत्त्वात् 'मल्लं गच्छति मल्ल:' इत्यादेरनुपपत्तिः नास्ति। द्वितीयान्तद्वितीयमल्लनिष्ठो य: संयोगजनकक्रियावान्न इत्याकारकभेद: द्वितीयान्तद्वितीयमल्ले, तत्प्रतियोगितावच्छेदिका या प्रथमान्तप्रथममल्लनिष्ठक्रिया, तज्जन्यसंयोगाश्रयत्वेन द्वितीयान्तद्वितीयमल्लस्य कर्मत्वात् 'मल्लं गच्छति मल्ल:' इत्यपि प्रयोगानुपपत्तिर्नास्ति। 'द्वितीयान्तद्वितीयमल्ल: प्रथमान्तप्रथममल्लनिष्ठ-क्रियावान् न' इति भेदो वक्तुं शक्यते। एकमल्लनिष्ठभेदप्रतियोगितावच्छेदिका भवति अपरमल्लनिष्ठ-क्रिया। एतन्मल्लनिष्ठसंयोगजनिका च भवति। 'एतन्मल्लनिष्ठभेदप्रतियोगितावच्छेदिका अपरमल्ल-निष्ठसंयोगजनिका या क्रिया तदनुकूलकृतिमान् मल्ल:' इति बोध:।

परञ्च 'स्वं गच्छति चैत्र:', 'चैत्रं गच्छति चैत्र:' इत्यादिषु स्वपदार्थे संयोगानुकूलव्यापारवति चैत्रे संयोगानुकूलव्यापारवद्भेदस्यासत्त्वात् तादृशव्यापारस्य न

चैत्रवृत्तिभेदप्रतियोगितावच्छेदकत्व-मिति तेन 'स्वं गच्छति चैत्र:', 'चैत्रं गच्छति चैत्र:', 'आत्मानं गच्छति चैत्र:' इत्यादिप्रयोगाणां न प्रामाण्यापत्ति:।

19. आपत्ति: - कर्त्राख्याते 'विहगं (स्वं) गच्छति विहग:' इति प्रयोगापत्तिमाशङ्कते -

ननु यदा कश्चिद् 'विहगो भूमिं प्रति गच्छति' तदा 'भूमिवृत्तिसंयोगजनकः भूमिवृत्तिभेदप्रतियो-गितावच्छेदकश्च यो व्यापारः तदाश्रयः विहग:' इति शाब्दबोधस्य अबाधितत्वात् 'विहगो भूमिं गच्छति' इति प्रयोग: प्रामाणिक:। तथैव 'विहगं (स्वम्) गच्छति विहग:' इत्यपि प्रयोगस्य प्रामाण्या-पत्ति:। यस्य विहगस्य भूमिं प्रति गमनम्, तस्मिन् विहगे य: भूमिसंयोगः तज्जनकत्वं वर्तते। तस्मिन्नेव विहगे वर्तमाने व्यापारे द्वितीयान्तविहगपदार्थः यः कश्चिदन्यविहगः तद्वृत्तिभेदप्रतियोगितावच्छेदकत्वं च वर्तते, तत्क्रियाश्रयत्वस्य तद्विहगे सत्त्वात् 'विहगं (स्वं) गच्छति विहग:' इति प्रयोगापत्ति:। अर्थात् 'भूमिं गच्छति विहग:' इति प्रयोगस्थाने 'विहगं (स्वं) गच्छति विहग:' इति वाक्यप्रयोगस्यापि प्रामाण्यापत्तिरिति शङ्कते।

प्रथमान्तविहगनिष्ठक्रियायां द्वितीयान्तविहगनिष्ठो यो भूमिसंयोग:, तज्जनकत्वमप्यस्ति। प्रथमान्तद्वितीयान्तभिन्नविहगनिष्ठो यो भेदस्तादृशभेदप्रतियोगी अयमेव विहग इति विहगान्तरनिष्ठ-भेदप्रतियोगितावच्छेदकत्वमप्यस्त्येव। तथा च विहगे स्वनिष्ठभेदप्रतियोगितावच्छेदकीभूतक्रियाया: फलस्य संयोगस्य सत्त्वात् कर्मत्वमपि प्राप्तम्। विहगनिष्ठभेदप्रतियोगितावच्छेदिकाया विहगवृत्तिसंयोग (भूमिसंयोग) जनिकाया: क्रियाया आश्रयत्वमप्यस्त्येवेति विहगकर्मकगमनानुकूलव्यापारकर्तृत्वमपि प्राप्तम् उक्तक्रियाश्रयस्यैव गमनकर्तृत्वादिति एकस्यैव विहगस्य कर्तृत्वकर्मत्वोभयतात्पर्येणापि 'विहगं (स्वं) गच्छति विहग:' इति प्रयोगो दुर्वार एव।

20. पक्ष: - 03 - धातो: खण्डश: शक्तिपक्षं भेदप्रतियोगिताया: संसर्गत्वञ्च स्वीकृत्य गदाधरसिद्धान्तेन समाधीयते - कर्त्राख्याते फलव्यापारयो: संबन्धस्वरूपम् -

अन्येषामाचार्याणाम्मतान्दूषयित्वा गदाधरभट्टाचार्य: प्रामाणिकप्रयोगाणाम्प्रामाण्यरक्षणाय अप्रामाणिकप्रयोगाणाम्प्रामाण्यवारणाय



शाब्दबोध: - 'ग्रामनिष्ठसंयोगजनक:, य:
ग्रामनिष्ठसंयोगाश्रयभेदप्रतियोगिकतावच्छेदकव्यापार·

स्वमतोपस्थापनमाचष्टे - इष्टप्रयोगेषु 'ग्रामं गच्छति चैत्र:' 'भूमिं गच्छति विहग:' इत्यादौ फलं व्यापारश्च धात्वर्थ:। तदा धात्वर्थसंयोगस्य धात्वर्थव्यापारे न केवलं स्वज-नकत्वसंबन्धेनान्वय इष्टो येन 'विहगं (स्वं) गच्छति विहग:' इति प्रयोगापत्ति: स्यात्, अपि तु प्रकृत्यर्थ-वृत्तित्वविशिष्टसंयोगस्य धात्वर्थव्यापारे 'स्वजनकत्वम्', 'स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वम्' एतदुभयसंबन्धनेनान्वयः स्वीक्रियते गदाधरेण। स्वम् = संयोग:, अत्र संयोगजनकचैत्रविहगादिनिष्ठ-क्रियायां स्वजनकत्वम् = संयोगजनकत्वमप्यस्ति। तथा च स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वम् = संयोगाश्रयीभूतभूम्यादिनिष्ठभेदप्रतियोगितावच्छेदकत्वमपि अस्ति। तेन एतादृशोभयसंबन्धेन धात्वर्थ-संयोगस्य धात्वर्थव्यापारेऽन्वयसम्भवे 'भूमिं गच्छति विहग:', 'ग्रामं गच्छति चैत्र:' इत्यादय: प्रयोगा: भवन्ति। तथा च 'ग्रामं गच्छति चैत्र:' इत्यादौ 'ग्रामनिष्ठसंयोगजनक:, य: ग्रामनिष्ठसंयोगाश्रयभेदप्रति-योगिकतावच्छेदकव्यापार:, तदनुकूलकृत्याश्रयश्चैत्र:' इति शाब्दबोधो जायते। उक्तपरिष्कारे तु यन्निष्ठ-संयोगजनकत्वं क्रियायामुपपाद्यते, तन्निष्ठभेदप्रतियोगितावच्छेदकत्वं क्रियायामपेक्षते। (आरेख: - 03)

21. पूर्वोक्तानुरोधेन 'विहगं (स्वं) गच्छति विहग:' इति प्रयोगापत्तिर्वार्यते -

'विहगं (स्वं) गच्छति विहग:' इत्यत्र द्वितीयाप्रकृतिभूतविहगपदार्थतया यो विहगो भूमिसंयो-गाश्रयतया गृहीत:, तद्विहगवृत्तिसंयोगस्य जनकत्वसंबन्धेन तद्विहगवृत्तिक्रियायां सत्त्वेऽपि संयोगाश्र-विहगवृत्तिक्रियायास्तद्विहगवृत्तिभेदप्रतियोगितावच्छेदकत्वाभाव:, द्वितीयान्तप्रथमान्तविहगयोरैक्यात्। संयोगाश्रयविहग: क्रियावन्नेति भेद: ग्रहीतुमशक्य:।

पूर्वोक्तोभयसंबन्धेन क्रियायां संयोगविशिष्टत्व-स्याभावात् 'विहगं (स्वं) गच्छति विहग:' इति न प्रयोगापत्तिरिति।

यदा विहगयो: परस्परं प्रतिधावने तु 'मल्लं गच्छति मल्ल:' इतिवत् 'विहगं गच्छति विहग:' इत्यपि प्रामाणिकप्रयोग एव, विहगद्वयनिष्ठक्रियया उभयविहगयो: संयोगात्।

22. परसमवेत्वस्य सम्बन्धकुक्षौ प्रवेशात्तस्य न द्वितीयार्थतेति शङ्का, तत्समर्थनञ्च -

उक्तरीत्या स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य सम्बन्धकुक्षौ प्रवेशात् तद्घटकपरस-मवेतत्वस्यापि सम्बन्धकुक्षौ प्रविष्टत्वात्तस्य न द्वितीयार्थत्वमिति। समाधनम् - परसमवेतत्वस्य संबन्धकुक्षौ प्रवेशात्तस्य द्वितीयार्थत्वाभावेऽपि क्षतिर्नास्तीति गदाधरस्य सिद्धान्तपक्ष:।

23. कर्माख्याते फलव्यापारयो: सम्बन्धस्वरूपम् -

तथैव कर्माख्यातेऽपि धातो: खण्डश: शक्तिपक्षे 'विहगेन (स्वेन) गम्यते विहग:' इति कर्मणि प्रयोगोऽपि तद्विहगस्य भूमिसंयोगजनकक्रियादशायां न भवति। 'विहगेन गम्यते भूमि:' इत्यादावाश्रय-त्वमाख्यातार्थ:, 'विहगकर्तृकव्यापारजन्यसंयोगाश्रयो भूमि:' इति बोधोदयाद् विहगनिष्ठक्रियाया: स्वजन्यत्वम्, स्वावच्छिन्नभेदसामानाधिकरण्यत्वम् एतदुभयसंबन्धेन संयोगेऽन्वय:, स्वं क्रिया, संयोगे क्रियाजन्यत्वमप्यस्ति क्रियावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यमप्यस्तीति तदुभयसंबन्धेन संयोगे क्रियान्वय:, स्वावच्छिन्नभेदपदेन पूर्वोक्त एव भूम्यादिनिष्ठ: क्रियावान्न इत्याकारक: क्रियाव-च्छिन्नप्रतियोगिताकभेदो ग्राह्य:। स च भेद: संयोगश्च भूम्यादावस्तीति संयोगे तादृशभेदसामानाधि-करण्यमप्यस्त्येव,
संयोगादिरूपफलजनकक्रियावच्छिन्नप्रतियोगिताकभेदवति भूम्यादावेव क्रियाव-च्छन्नप्रतियोगिताकभेदसामानाधिकरण्यरूपसंबन्धेन
तत्तत्क्रियाविशिष्टोक्तसंयोगादिमत्त्वोपगमात् 'विहगेन गम्यते भूमि:' इत्यादिप्रयोगो भवतीत्यर्थ:।

अयमाशय: - 'ग्रामं गच्छति चैत्र:' इत्यादौ संयोग: ग्रामे, क्रिया च चैत्रे वर्तते। तदा स्वावच्छि-न्नभेद: (स्वम् = क्रिया, स्वाश्रय: = कर्ता = चैत्र:, तद्भेद: = ग्रामे, तद्भेदवान् = क्रियाभेदवान् = ग्राम:) 'ग्राम: क्रियाश्रयो न' इति वा 'ग्राम क्रियावान्न' इति वा भेद:।



शाब्दबोध: - 'चैत्रनिष्ठकृतिजन्यव्यापारजन्यो, यो चैत्रकर्तृकव्यापारावच्छिन्नभेदसमानाधिकरण: संयोग: भेदस्याधिकरणं ग्राम:, तत्रैव संयोग-सत्त्वात् ग्रामवृत्तिसंयोगे 'क्रियावच्छिन्नभेद'सामानाधिकरण्यं विद्यते। अत: क्रियायां स्वावच्छिन्नभेद-सामानाधिकरण्यमस्ति। संयोगस्य भेदाधिकरणवृत्तित्वमर्थ:। क्रियावान्नेति भेद: ग्रामे। तथा च 'विहगेन गम्यते भूमि:' इत्यत्र 'विहगनिष्ठकृतिजन्यव्यापारजन्यो, यो विहगकर्तृकव्यापारावच्छिन्नभेदसमाना-धिकरण: य: संयोग:, तदाश्रय: भूमि:' इति शाब्दबोध:। अपि च 'चैत्रेण गम्यते ग्राम:' इत्यत्र 'चैत्र-निष्ठकृतिजन्यव्यापारजन्यो, यो चैत्रकर्तृकव्यापारावच्छिन्नभेदसमानाधिकरण: य: संयोग:, तदाश्रयो ग्राम:' इति शाब्दबोध:। (आरेख: - 04)

24. पूर्वोक्तानुरोधेन 'विहगेन (स्वेन) गम्यते विहग:' इति प्रयोगो वार्यते -

संयोगजनकक्रियाश्रयविहगे तु उक्ततादृशभेदसामानाधिकरण्यसंबन्धेन तत्क्रियाविशिष्टसंये-गादिमत्त्वबाधेन 'विहगेन (स्वेन) गम्यते विहग:' इत्यादिप्रयोगापत्तिर्नास्ति। विहगस्य उक्ततादृशभेद-प्रतियोगित्वाद् भेदाश्रयत्वमेव नास्ति, येन तादृशभेदसामानाधिकरण्यसंबन्धेन क्रियाविशिष्टत्वं विहग-निष्ठसंयोगस्य स्यात्। प्रथमान्ततृतीयान्तविहगपदात् एकैवविहगखग: गृह्यते। तत्र क्रियावच्छिन्न: प्रथमान्तविहग:, तद्भेद: तृतीयान्तविहगे नास्तीति 'विहगेन (स्वेन) गम्यते विहग:' नेत्यादिप्रयोगापत्ति:। तथा च विहगेन स्वभिन्नविहगं प्रत्यनुधावने तु 'विहगेन गम्यते विहग:' इति प्रयोग इष्ट एव।

25. परसमवेतत्वं द्वितीयार्थ इति नैयायिकमतस्य वैयाकरणरीत्या खण्डनम् -

नैयायिकानां मतं परसमवेतत्वं द्वितीयार्थ इति तत् वैयाकरणैः खण्ड्यते। तथाहि - परसमवेत-त्वस्य द्वितीयावाच्यत्वे गौरवमेको दोषः। किञ्च परसमवेतत्त्वं न द्वितीयार्थ इत्युक्तौ को दोषः? 'स्वं गच्छति चैत्रः' इति प्रयोगापत्तिरिति वक्तव्यम्। इयमापत्तिः किं द्वितीयायाः, उत शाब्दबोधस्येति विकल्प्यते। न द्वितीयायाः, परसमवेतत्वं द्वितीयार्थ इत्युक्तावपि 'गमयति कृष्ण: गोकुलम्' इतिवत् 'पाचयति कृष्णं गोप:' इत्यापत्तिसंभवात्। शाब्दबोधातिप्रसङ्गः धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थव्यापारनाधिकरणाश्रयोपस्थितिः हेतुरिति कार्यकारणभावकल्पनेन निरस्तो विज्ञातव्यः। किञ्च परसमवेतत्वस्य द्वितीयार्थत्वेऽपि परत्वस्य प्रकृत्यर्थस्य च अन्वयार्थं, परसमवेतत्वस्य व्यापारेऽन्वयार्थं च कार्यकारणभावा आश्रयणीया: भवन्ति। इति बहवो दोषाः वैयाकरणै: प्रदर्शिताः।

तत्रोच्यते - परसमवेतत्वस्य नवीनमतरीत्या द्वितीयार्थत्वाभावान्नोक्तकार्यकरणभावकल्पना प्रयुक्तगौरवं नैयायिकानाम्। शाब्दबोधातिप्रसङ्गवारणार्थं फलविशेष्यकशाब्दबोधं प्रति धात्वर्थ-व्यापारानधिकरणाश्रयोपस्थितिः कारणमिति कल्पनायामपि 'चैत्रः स्वं गच्छति' इति शाब्दापत्तिस्त-दवस्थैव। वस्तुतः धात्वर्थव्यापारानधिकरणाश्रयोपस्थितेः कारणत्वोक्तौ 'स्थाल्यां पचति' इतिवत् 'स्थाली पचति' इत्युक्तावपि स्थालीकर्मकबोधप्रसङ्गः। स्थाल्याः धात्वर्थव्यापारानधिकरणाश्रयत्वस्य वस्तुतो वर्तमानत्वात्। अतः धात्वर्थव्यापारानाधिकरणाश्रयोपस्थितिर्धात्वर्थफलविशेष्यकबोधं प्रति कारणमित्यत्र धात्वर्थव्यापारानधिकरणत्वप्रकारकाश्रयोपस्थितिः विवक्षणीया, एवञ्च क्रियानाश्रयत्वे सति आश्रयः कर्मप्रत्ययार्थ इति वैयाकरणरीत्या वक्तव्यत्वात् क्वास्ति लाघवम्।

26. वैयाकरणमतानुसारेण उक्तस्थले शाब्दबोधः -

वैयाकरणास्तु 'चैत्रः स्वं गच्छति' इति प्रयोगवारणायान्यां रीतिमाश्रयन्ते। तथाहि - यथा ग्रामः व्यापारजन्यफलाश्रयो भवति तथा चैत्रोऽपि भवत्येव, एवं सति 'चैत्र: चैत्रम् गच्छति' इति प्रयोगो न भवितुमर्हति कुतः? इति चेत् कर्तृसंज्ञया कर्मसंज्ञाया: बाधात्, तथा प्रयोगाभाव:। उक्तञ्च सुबर्थनिर्णये आश्रयोऽवधिरुद्देश्येति कारिकाव्याख्याने भूषणसारे -

"ननु 'चैत्रो ग्रामं गच्छति' इत्यत्र ग्रामस्येव चैत्रस्यापि क्रियाजन्यग्रामसंयोगरूपफलाश्र-यत्वात् कर्मतापत्तौ 'चैत्रश्चैत्रं गच्छति' इत्यापत्तिः, प्रयागतः काशीं गच्छति चैत्रे 'प्रयागं गच्छति'

इत्यापत्तिश्च, क्रियाजन्यसंयोगस्य काश्यामिव विभागस्य प्रयागेऽपि सत्त्वात्, इति चेन्न, ग्रामस्येव चैत्रस्यापि फलाश्रयत्वेऽपि तदीयकर्तृसंज्ञया कर्मसंज्ञाया बाधेन 'चैत्रश्चैत्रम्' इति प्रयोगासम्भवात्, द्वितीयोत्पत्तौ संज्ञाया एव नियामकत्वात्। अन्यथा 'गमयति कृष्णं गोकुलम्' इत्यत्रेव 'पाचयति कृष्णेन' इत्यत्रापि कृष्णपदाद् द्वितीयापत्तेः।

शाब्दबोधः 'चैत्रश्चैत्रम्' इत्यत्र स्यादिति चेन्न, तथाव्युत्पन्नानामिष्टापत्तेः। उच्यतां वा 'प्रकारतासम्बन्धेन धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थव्यापारानधिकरणाश्रयोपस्थितिर्हेतुः' इति कार्यकारणभावान्तरम्। प्रकृते चैत्रस्य व्यापारानधिकरणत्वाभावान्न दोषः। प्रयागस्य कर्मत्वन्तु सम्भावितमपि न, समभिव्याहृतधात्वर्थफलशालित्वस्यैव क्रियाजन्येत्यनेन विवक्षणस्य उक्तप्रायत्वात्"[118] इति।

27. उपसंहारः -

परसमवेतत्वं द्वितीयार्थ इति मतस्य त्याग एवेदानीं कर्तव्यः, तदर्थस्य संबन्धकोटौ निवेशात्। लाघवं च परसमवेतत्वस्य प्रकारतयाऽनिवेशात्। अस्मिन् पक्षे आधेयत्वं द्वितीयार्थ इति रक्षितं भवति, परसमवेतत्वे द्वितीयार्थे सति, तद्धटकभेदे प्रकृत्यर्थस्यान्वयस्वीकारे एकदेशान्वयो दोषो भवेत्, सोऽप्यस्मिन् मते नास्ति। अतः 'स्वम् गच्छति चैत्रः' इति प्रयोगवारणाय गदाधरमतमेवाश्रयणीयम्। एतादृशसंबन्धविशेषनिवेशस्तु गम्यादिधातुसमभिव्याहारे एव कर्तव्यः। ज्ञानाद्यर्थकधातुसमभिव्याहारे तु तथा सम्बन्धविशेषो न स्वीकर्तव्य एव। 'स्वम् इच्छति चैत्रः', 'स्वं जानाति चैत्रः' इत्यादिप्रयोगस्य प्रामाणिकत्वात्।

28. प्रामाणिकाप्रामाणिकप्रयोगसरणिः

क्र.	प्रामाणिकप्रयोगः	अप्रामाणिकप्रयोगः	व्याख्यानम्
1	ग्रामं गच्छति चैत्रः	स्वं गच्छति चैत्रः	
		चैत्रं गच्छति चैत्रः	

[118] भूसणसारः, सुबर्थनिर्णयः, कारिका- 24.

		आत्मानं गच्छति चैत्र:	
2	मल्लं गच्छति मल्लः	स्वं गच्छति मल्लः मल्लं गच्छति मल्लः	द्विमल्लसत्त्वे 'मल्लं गच्छति मल्लः' इति प्रयोग:। एकमल्लसत्त्वे तु 'स्वं गच्छति मल्लः', 'मल्लं गच्छति मल्लः' नेत्यादिप्रयोगा:।
3	द्रव्यं गच्छति चैत्र:		
4	विहगं गच्छति विहग:	स्वं गच्छति विहग: विहगं गच्छति विहग:	द्विविहगसत्त्वे 'विहगं गच्छति विहग:' इति प्रयोग:। एकविहगसत्त्वे तु 'स्वं गच्छति विहग:', 'विहगं गच्छति विहग:' नेत्यादिप्रयोगा:।
5	भूमिं गच्छति विहग:		
6	विहगेन गम्यते भूमि:		
7	विहगेन गम्यते विहग:	स्वेन गम्यते विहग: विहगेन गम्यते विहग:	द्विविहगसत्त्वे 'विहगेन गम्यते विहग:' इति प्रयोग:। एकविहगसत्त्वे तु 'स्वेन गम्यते विहग:', 'विहगेन गम्यते विहग:' नेत्यादिप्रयोगा:।
8	स्वम् इच्छति चैत्रः		
9	स्वं जानाति चैत्रः		

सन्दर्भसहायकग्रन्थावलिः

1. अन्नम्भट्टः. तर्कसङ्ग्रहः, चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, 2003.
2. अमरसिंहः, अमरकोशः, चौखम्बा-विद्याभवनम्, वाराणसी, 2015.
3. उपाध्यायः, गिरिधरः. विभक्त्यर्थनिर्णयः, चौखम्बा-संस्कृत-सीरीज, वाराणसी, 1902.
4. कामाख्यानाथ-तर्कवागीशः (सम्पादकः), गंगेशोपाध्यायः, तत्त्वचिनतामणिः (शब्दखण्डः), चौखम्बा-संस्कृत-प्रतिष्ठानम्, वाराणसी, 1990.
5. कीर्त्यानन्दः (सम्पादकः), व्युत्पत्तिवादः (गूथार्थतत्त्वलोकसंस्कृतटीकासहितः), चौखम्बा-अमर-भारति-प्रकाशनम्, वाराणसी, 1976.
6. गौडः, ज्वालाप्रसादः (सम्पादकः), व्युत्पत्तिवादः (शिवदत्तमिश्रकृतदीपिकासंस्कृतटीकासहितः), चौखम्बा-सुरभारती-ग्रन्थमाला (66), चौखम्बा-सुरभारती-प्रकाशनम्, वाराणसी, द्वितीयं संस्करणम्, 1983, पुनर्मुद्रितम्, 2010.
7. चतुर्वेदी, गिरिधरशर्मा परमेश्वरानन्दः भास्करश्च, वैयाकरणसिद्धान्तकौमुदी (वासुदेवदीक्षितकृतबालमनोरमा तथा च ज्ञानेन्द्रसरस्वतीकृततत्त्वबोधिनीसंस्कृतव्याख्यासहितः), खण्डानि 01-04, मोतीलाल-बनारसीदासः, देहली, 1958-61.
8. त्रिपाठी, ब्रह्मशङ्करः (सम्पादकः), भवानन्दः कारकचक्रम्, चौखम्बा-संस्कृत-सीरीज, वाराणसी, 1942.
9. त्रिपाठी, हेरामः (सम्पादकः), व्युत्पत्तिवादः (सुदर्शनाचार्यकृतादर्शसंस्कृतटीकासहितः), राष्ट्रिय-संस्कृत-संस्थानम्, नवदेहली, प्रथमं संस्करणम्, 2011.
10. दासः, अच्युतानन्दः (सम्पादकः), व्युत्पत्तिवादः (कृष्णभट्टकृतकृष्णभट्टीया, धर्मदत्तकृतगूथार्थतत्त्वलोकः, सुदर्शनाचार्यकृतादर्शः, जयदेवकृतजया, शिवदत्तकृतदीपिका, लक्ष्मीनाथकृतप्रकाशः, वेणीमाधवशुक्लकृतशास्त्रर्थकला च संस्कृतव्याख्यासहितः, न्यू-भारतीय-बुक-कॉरपोरेशन, देहली, प्रथमं संस्करणम्, 2004.

11. मिश्रः, सच्चिदानन्दः (सम्पादकः), व्युत्पत्तिवादः (सम्पादककृतसुनन्दाहिन्दीव्याख्यासहितः), भारतीय-विद्या-प्रकाशनम्, वाराणसी, प्रथमं संस्करणम्, 2001.
12. व्युत्पत्तिवादः (जयदेवमिश्रकृतजयासंस्कृतटीकासहितः), मिश्रः, उमेशचन्दः (सम्पादकः), प्रयागनगरम्, 1988.
13. व्युत्पत्तिवादः (वेणीमाधवशुक्लकृतशास्त्रर्थकलासंस्कृतटीकासहितः), काशी-संस्कृत-ग्रन्थमाला (115), चौखम्बा-संस्कृत -संस्थानम्, वाराणसी, तृतीयं संस्करणम्, 1968, पुनर्मुद्रितम्, 2007.
14. शब्दशक्तिप्रकाशिका (कृष्णकान्ति एवञ्च प्रबोधिनीसंस्कृतटीकासहितः), चौखम्बा-संस्कृत-सीरीज, वाराणसी, 1934.
15. शास्त्री, भीमसेनः (सम्पादकः), लघुसिद्धान्तकौमुदी (सम्पादककृतभैमीहिन्दीव्याख्यासहितः), देहली, 1950-80.
16. शास्त्री, वेम्पटिकुटुम्बः (प्रधानसंपादकः). वैयाकरणभूषणसारः (के.वी.रामकृष्णमाचार्यकृतनृसिंहप्रियासंस्कृत-व्याख्यासहितः), श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेलावलः, सोमनाथनगरम्, गुजरातराज्यम्, 2015.
17. शुक्लः, कालिकाप्रसादः (संपादकः). वैयाकरणसिद्धान्तमञ्जूषा, नागेशभट्टः, संपूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1977.
18. श्रीकृष्णवल्लाभाचार्यः (सम्पादकः), विश्वनाथपञ्चाननभट्टाचार्यः, न्यायसिद्धान्तमुक्तावली (शब्दखण्डः), चौखम्बाविद्याभवनम्, वाराणसी, 2005.
19. सतपथी, हरेकृष्णः (सम्पादकः), व्युत्पत्तिवादः (एन्.एस्.रामानुजताताचार्यकृतविद्वन्मनोरमासंस्कृतटीकासहितः), राष्ट्रिय-संस्कृत-विद्यापीठम्, तिरुपतिः, प्रथमं संस्करणम्, 2011.
20. Bhatt, V.P. Navya Nyaya Theory of Verbal Cognition (Critical Study of Gadadhar Bhattacharya's Vyutpattivada), 01-02, Deccan College, Poona, First Edition, 1996.

Source and base of Indian Philosophy-few thoughts

Prof. Madhusudan Penna

Dean, Faculty of Indian Philosophy, Religion and Culture,

KKSU, Ramtek

The innate desire to know and understand the world in and around and to find an ultimate answer to all questions has been the source of darshan in India. The uncontradicted experiences of seers, later known as Shastra, are the base.

The Chandogya Upanishad (6-8-6) exhorts:

Sanmoolamanviccha….

sanmoolah somya imaah sarvaah prajaah .

satpratishthaah….

Explore the existence itself...what causes everything to evolve? ***The very being is the source of becoming.*** **This being is the source of everything.** The deep contemplative look into this ***Sat*** has transformed many ordinary humans into seers. Several thousands of years ago Plato declared, "The true lover of knowledge is always striving after being. He will not rest at those multitudinous phenomena whose existence is appearance only".

In 'two hours with Stephen Hawking', Mr. Hawking says: We all need to understand where we come from and these observations show us glimpse of our origin'. Our Vedic seers had very long back stated the same. They reiterated that this alone can make our living complete.

Man's quest into the essence of this with all inquisitiveness is the main cause of all sciences on earth. Were Adam non- inquisitive, no creation would have taken place. Were Newton no curious, no rules of nature would have been discovered.

In India it is not just inquisitiveness or curiosity that prompted the sages to take recourse to a probe into reality leading a secluded life, but the ephemeral nature of life that they got strong inclination to make life meaningful. In search of a meaning for life, they spent years in

forests or caves or on the top of mountains and realized for themselves a meaning for life which they later passed on to their disciples.

Thus, the sacred knowledge came down through many generations. Indian Philosophy always focused on changing the outlook of man, igniting in him an eagerness to know and realize things, to appreciate things and accommodate him in it. It never teaches rigidity. All the Indian Philosophical systems have always emphasized on free thinking. For this reason only, they presented with open mind the views of other systems also, allowing the reader to choose the right one. The ancient Indian Philosophers discussed everything with catholicity of mind probing in to all possible aspects of the matter. The reader had a choice always. Later people preferred one system and thus different schools came into existence. This is the social consequence of philosophy.

Darshan is the Sanskrit word for philosophy. But, there is an obvious difference between these two words since the word philosophy is from Greek word philosophia, which means literally "love of wisdom" It is the study of general and fundamental problems concerning matters such as existence, knowledge, values, reason, mind and language. It is mostly intellectual.

Darshan is more intuitive and indicates the very way of life. Darshan means the way of looking at something. It means perception and not just seeing. This Sanskrit word means both ***the perception and means of such perception*** also. It is a kind of understanding that is beyond the normal empirical perception. ***Ritambhara tatra prajnaa*** says the Yogasutra. **All wisdom is within.** Ancient seers or sages in our country had got it through deep penance and contemplation, and always tried to enable us to get such perception which we ordinarily do not possess. Such revelations have come down to us as Scriptures. But because of our deep instincts buried in genes, most of us discard everything as rubbish and prefer to live a casual life considering it to be the most important one.

Saints and seers never lived a casual life. If any modern philosopher asserts that he too lives a pious life, then he may be revered as seer

only. Observe the life of any saint or seer; it is a very strenuous and long contemplative one which led them to realization.

The very few who cling on to the realization of the ultimate reality till their last breath practice it in their life and are recognized as saints or seers. The valid experience of some individuals becomes shastra for many aspiring souls later. Vedic seers, Lord Buddha, Mahavira and later saints have unanimously agreed on one point, that this life is transient.

Because of the transient nature of life and imminence of death, each moment of life becomes so precious that no one can afford to let such moment go off casually. This understanding makes one get inclined more towards introspection and contemplation on the final purpose of life. Realization too is so enigmatic that those who get it cannot express it perfectly and prefer to remain silent. Very few come back to the material world to express an iota of their experience for the aspiring souls. Those who made deep contemplation had some experiences and they thought of sharing them with fellow humans for a better life here and after. Thus the Darsanas have evolved and are evolving still.

Philosophy is never different from or against science. Science was in the beginning referred to as natural philosophy. When we say "science" we refer to the natural sciences. Throwing light on the relation between science and Philosophy, Will Durant had aptly said: ***"science is analytical description, philosophy is synthetic interpretation".*** "What does science do? It resolves the whole into parts, the organism into organs, and the obscure to the known…. Science gives us knowledge, but only philosophy can give us wisdom"

If one can understand this relation; one can appreciate thoroughly the place and usefulness of philosophy.

Science emerges from philosophy, because, major scientific discoveries were mere speculations at one point of time. Many scientific inventions were initially brushed aside as rubbish. Ludwig Eduard Boltzmann (February 20, 1844 – September 5, 1906) was an Austrian physicist and philosopher who developed statistical mechanics to explain and predict how the properties of atoms (such

as mass, charge, and structure) determine the physical properties of matter (such as viscosity, thermal conductivity, and diffusion). He was shamed for his theory. People did not believe him, but three years after his death by hanging, his theory was proved right. True! Arthur Schopenhauer rightly observed and said "an important idea or truth …First, it is ridiculed. Second, it is violently opposed. Third, it is accepted as being self-evident."

He also felt that an important idea or truth must 'endure a hostile reception before it is accepted'. Many are the examples to demonstrate that science grew from speculations and theories that people once rejected as useless.

When the Greek philosophers thought of the tiny atoms as the building blocks of the Universe, people were not ready to believe them thinking that it was only their idea. But, such ideas waited for many hundred years for a scientist to prove them. It was not until the 19th century that the idea was accepted and refined by modern scientists. Democritus held that everything is composed of "atoms" The atoms were believed to be physically, but not geometrically, indivisible. The atomic theory began as a philosophical concept in ancient Greece but accepted for scientific scrutiny in the early 19th century when discoveries in the field of chemistry proved that matter behaves as if it were made up of atoms.

Science is therefore the maturing point of the philosophical inquiry. But, science does not prove itself valid in all matters especially in those whose existence cannot be verified through any scientific instrument.

One should unhesitatingly admit the limitations of both science and philosophy. Philosophy relies more on subtle observation and intuition while science depends on experiment and examination. Alasdair Mackintosh, presented in Quora:

Science depends on mathematics, and mathematics imposes certain limits to our knowledge. Gödel's Incompleteness Theorem, for example, shows that there are certain limits to what we can prove.

1) **Physical Limits.** Relativity places limits on the speed at which information can be transmitted, and hence the inability of knowing

about events outside of our light cone. Heisenberg's Uncertainty Principle states that not only is it impossible to know both the momentum and position of a particle at the same time, but that these values are not even defined.

2) **Emergent Limits.** A deterministic system is one where the future state of the system depends only on its initial state. If you know the state of the system at the start, you can calculate what it will subsequently do at any future moment. However, chaos theory shows that for some systems, a very small change in initial conditions can result in a huge divergence later on, making their future behavior hard to predict. And since calculation is a physical process, there must be an upper bound to the complexity of the calculations that can be performed, given the finite size of the universe. This suggests that there must be deterministic systems whose future states cannot, even in theory, be known.

3) **Limits of Emergence.** Biology, when you get down to it, is just chemistry. And chemistry is just quantum theory. But this doesn't mean that a quantum physicist understands biology. Much of our science is the study of emergent systems, where certain low-level rules (such as quantum mechanics) can give rise to higher-level phenomena (such as biochemistry, or natural selection) which are hard or impossible to derive given the basic low-level postulates. (Darwin would not have come up with evolution by studying quantum theory.)

All of these could be considered as forming part of the limits of science. There are limits to what is theoretically knowable and there may also be limits to our own ability to understand. (Our brains just might not be big enough.)

There is a common belief among even the learned that Mathematics alone can contribute to perfect discoveries. But, Bertrand Russell in his Logical Atomism observed that mathematics also has limitations and cannot be taken as absolute authority always.

Thus, it is clear that both science and philosophy have their limitations and bear significance in their realms. They are mutually

complementary and can be studied with an integrated approach. Very surprisingly many great scientists developed an inclination towards philosophy and spiritualism in some part of their life. A true seeker of knowledge can very well understand the limitations of science and try to search for something beyond the world of experience. One who gets attracted to such reality becomes religious. Not all philosophers are religious! Religion has been understood in recent times as an expression of one's beliefs. In India however, religion is an outcome of age old beliefs that have philosophical significance and purport.

Epicurus, the great Greek philosopher is said to have remarked: Empty are the words of that philosopher who offers no therapy for human suffering. For, just as there is no use in medical expertise if it does not give therapy for bodily diseases, so too there is no use in philosophy if it does not expel the suffering of the soul.

Indian philosophy has evolved with the sole objective of removing human suffering. All the systems proclaim removal of suffering as the prime aim and recommend various methods for it. These systems do not offer any material solution for these problems, but try to strike at the very base of suffering to extirpate suffering completely. All the systems teach us to open our eyes to some reality that they preach as ultimate. After thorough study of these teachings and debate and arguments, others offer some more theories at points of difference. After all, the universe with its wonderful design is the laboratory for all these thinkers. As these thinkers try to explore the universe with all their intellectual might, the more the reality gets elusive. At some point the thinking tries to find some solace and rest there.

In Indian tradition, Darshana has Acharya or teachers who stand for the values they teach. Acharya is one who practices what he preaches. And therefore, there cannot be bad Acharya. If he is bad, he cannot be an Acharya. Thus, Darshana presupposes the firm conviction of a teacher that he or she would never deviate from what he or she teaches. Adishankara can never be expected to immerse in worldly pleasures while himself teaching that the world is mere illusion. It is believed that the Logician Gautama was so immersed in his thoughts that he seldom looked at others while walking on roads. So, he was given the

name Akshapada. The Atomist Vaisheshika was engrossed in his thoughts on Atoms that he was given the name Kanada, meaning the one who lives on the atoms, not on other food. It is said that the famous logician Gadadhara on being asked on death bed about the ultimate cause of universe murmured Atoms! Atoms!! Such is their conviction.

Thus, more than intellect, practice has been held high in Indian tradition. There are instances of many saints who never exhibited their intellectual prowess anywhere in their life time but have been regarded as next to God or god himself because of their divine virtues only. Some of such saints had never written any book nor preached anything in public. They had just blessed the disciples. They were and are still considered as the direct messengers of God.

Thus, it is to be borne in mind while studying any system of Darshan of Indian origin that the teachers had contemplated on Reality and lived to it throughout their life and passed on their wisdom to the next generations as the way of complete life on this planet. It was never some amusement for them. Darshana is always an outcome of ***rigorous spiritual training*** for a long time. Such teachers had expected the disciples also to undergo such rigorous training in order to get on to Reality.

The Upanishads also condemn such individuals who pursue philosophy as a pastime and expect to get the knowledge of reality. According to the Upanshadic seers, the understanding of reality is far from the people who are stuck in the sensual pleasures. Such people cannot have the full realization and reality will always elude them.

A very strict moral life with constant inclination to reality is regarded as a very essential prerequisite to have a glimpse of the Reality, according to the Darshana. The entire Upanishadic literature is centered on this very principle. Know the Being! Know the root of becoming! Thus say the Upanishads. *All liberation is rooted in realizing the reality.*

Knowing and realizing:

Unfortunately, many students of philosophy satisfy themselves with the verbal understanding of some texts, remember some theories from

them and believe that they possess the proclaimed wisdom. Paradoxically, the reality is beyond the reach of senses and words. Understanding the concepts and remembering them mentally or verbally is never the subject matter of Darshana.

